CC-0. In Public Domain. Digitization by eGangotri

प्रक्रियासर्वस्वम्

षष्ठो भागः

मेल्पुत्तूर् नारायणभट्टतिरिप्रणीतम्

UNIVERSITY OF KERALA

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

प्रक्रियासर्वस्वम्

षष्ठो भागः

CC-0. In Public Domain. Digitization by eGangotri

अनन्तशयनसंस्कृतग्रन्थावली ग्रन्थाङ्कः २६२

मेल्पुत्तूर् नारायणभट्टतिरिप्रणीतम्

प्रक्रियासर्वस्वम्

षष्ठो भागः

मुख्यसम्पादिका
के. इन्दिरा देवि

मूल्यम् विंशति रूप्यकाणि

CC-0. In Public Domain. Digitization by eGangotri

प्रक्रियासर्वस्वम्

मेल्पुत्तूर् नारायण भट्टतिरि

षष्ठो भागः

सम्पादिका
डाक्टर् के. विश्वेश्वरि अम्म

पौरस्त्यहस्तलिखितग्रन्थशाला
केरलसर्वकलाशाला
कार्यवट्टम्, तिरुवनन्तपुरम्

CC-0. In Public Domain. Digitization by eGangotri

Trivandrum Sanskrit Series No. 262.

General Editor

K. Indira Devi

Editor

Dr. K. Visweswari Amma

PRAKRIYASARVASVAM

Melputtur Narayana Bhattatiri

Part VI

Published by K. Indira Devi, Reader - in - Charge, Oriental Research Institute and Manuscripts Library for the University of Kerala. First published October 1989 / Thulam 1165 M. E. Rights reserved. Printed at Geeyes Printers, Kazhakuttam, Trivandrum. Price Rs. 30/-

CC-0. In Public Domain. Digitization by eGangotri

PREFACE

We are happy to place before the lovers of Sanskrit grammar the Sixth Part of Prakriyasarvasvam written by Melputtur Narayana Bhattatiri, who flourished in Kerala during the 16th and 17th Centuries A. D. Parts I to V of this book have already been published from this Institute as T. S. S. Nos. 106, 139, 153, 174 and 258. These five parts of the book constitute the Pūrvabhāga of the work. We are now publishing the first part of the Uttarabhāga as T. S. S No. 262. This book comprises the Dhātukhanda and Uṇādikhanda in complete. With one more part containing the Chāndasakhanda we will be finishing the publication of the entire work.

The following Transcript and Manuscripts have been used for the preparation of this work.

1) T. 2091 क Complete except for the Chandas Khaṇḍa
2) Ms. 5094 ख Incomplete
3) Ms. 11024 ग Extends upto the end of Dhātu Khaṇḍa
4) Ms. 874 घ Contains Dhātu Khaṇḍa and Uṇādikhaṇḍa

The Transcript T. 209/ prepared by Kerala Varma Valiya-Koil Tampuran has been used as the model. The Press Copy was long before prepared by Sri. M. Madhavan Unni, Retired Senior Research Officer. The work of seeing through the press was done by Dr. K. Visweswari Amma, Reader. The major part of the work was done under the guidance of Dr. T. Bhaskaran, Professor and Head of the Department (Retired).

Since the details regarding the life and works of Melputtur Narayana Bhattatiri have been given in the Third Part, we do not repeat them here.

Trivandrum
30-10-1989.

Dr. K. Visweswari Amma
Reader

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

श्रीनारायणभट्टप्रणीतं

प्रक्रियासर्वस्वम्

धातुखण्डः

देवनारायणक्ष्मापशासनस्थायिना मया ।
धातवोऽद्य विलिख्यन्ते माधवोक्तेन वर्त्मना ॥

उदात्तेत्त्वानुदात्तेत्त्वस्वरितेत्त्वविभागकृत् ।
एधादीनामकारोऽन्त्यः कथादीनां त्ववृद्धिकृत् ॥

अदिदीदिच्च निष्ठायामनिट्त्वार्थं कृतावुभौ ।
भावादिकर्मणोर्वेट्स्यादादितामिति भिद्यते ॥

इदित्त्वं हि नुमर्थं स्यादुदित्त्वं क्त्वेड्विकल्पकृत् ।
ऊदित्त्वं हीड्विकल्पार्थमृदिच्चङ्ह्रस्वबाधकः ॥

लृदित्त्वं लुङ्यङर्थं स्यादेदित्त्वं सिच्यवृद्धिकृत् ।
निष्ठानत्वार्थमोदित्त्वं ङित् तङर्थो द्वयाय ञित् ॥

इरित्त्वमङ्विकल्पार्थं षित्त्वं भावेऽङ्विधायकम् ।
ञिर्वर्तमाने क्तार्थोऽयं डुटुशब्दौ क्त्र्ययुच्फलौ ॥

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्च षाट्टवर्गस्तवर्गजः ॥

अनुदात्तात्मता धातोरिण्निषेधार्थमुच्यते ।
उदात्तत्वं च सेट्त्वार्थमिति सर्वत्र दृश्यताम् ॥

१ भू सत्तायामुदात्तः परस्मैभाषः इति भू इति धातुः सत्तायां वर्तते । उदात्त इति — अनुदात्ततयेण्निषेधस्याभावात् सेडित्यर्थः । परस्मैभाषः परस्मैपदी । अकर्मकोऽयम् । तदाह **कौमुदी**—

CC-0. In Public Domain. Digitization by eGangotri

सत्तासिद्धिसमृद्धिशान्तिशयनस्थानासने भासने
लज्जाजीवितरोदने च हदनेनृत्ये[1] प्रलापे क्रुधि ।
सन्तुष्टौ रुचिशोषदोषमरणस्पर्धाविहारेषु च
ज्ञातो धातुरकर्मको भयमदोन्मादप्रमादेषु च ।।

इति । भवति हरिः । जननवर्धनादीनामभावात् सदा सत्तया वर्तत इत्यर्थः । सत्तायामित्यर्थोऽवितरुपलक्षणम् । पुत्रो भवतीति जनने । भवत्यसावित्यैश्वर्यप्राप्तौ, भवतः शत्रुरस्तीति भूतिलिप्सायाम् । भूतिलिप्सोः शत्रुरस्तीत्यर्थः । क्वचिच्चार्थविशेषद्योतकमुपसर्गमपेक्ष्य धातुरर्थान्तर माह । यथा-ग्रामस्य प्रभवतीत्यैश्वर्यमेव प्रशब्दद्योतितम् । पुत्रःप्रभवत्युद्भवतीत्युत्पत्तिरश्च। एवं हिमवतोगङ्गा प्रभवतीति प्रकाशने। नहि तत्र तस्या उत्पत्तिः । मल्लो मल्लाय प्रभवतीति शक्तौ । प्रभूतमन्नमिति पर्याप्तौ । परान् पराभवति, परिभवति, अभिभवतीत्याक्रमणे। इदमेवं संभवतीत्यूह उपपत्तौ वा । स्थाली तण्डुलान् संभवतीत्यन्तर्धारणे। सुखमनुभवतीति संवेदने । अयं मिश्रीकरणार्थश्चुरादौ । तत्रैव युजादौ प्राप्त्यर्थः । इति ।

२ **एध** वृद्धौ । एतदादयः कत्थान्ता उदात्ता अनुदात्तेतः । उदात्तात्मकत्वात् सेट्त्वम् । एधेत्यकारस्यानुदात्तत्वप्रतिज्ञानादित्वाच्च । 'अनुदात्तङित—' (१-३-१२) इति तङ् । एधते श्रीः ।

स्पर्ध संघर्षे । स च पराभिभवेच्छा । पराभिभवस्य धात्वर्थान्तर्भावादकर्मकत्वम् । कृष्णेन स्पर्धते चैद्यः ।

३ **गाधृ** प्रतिष्ठालिप्सयोर्ग्रन्थे च । आत्मयापना स्थानलाभश्च प्रतिष्ठा । एकत्र स्थापनं सन्दर्भो वा ग्रन्थः । सन्दर्भश्च शब्दविषयोऽर्थविषयोऽपि स्यात् । अत्रात्मयापनास्थानलाभयोरकर्मकः । शिष्टेषु सकर्मकः । फलमूलैर्गाधते मुनिः । नद्यां गाधते तरन् । लिप्सायाम्-अन्नं गाधते भिक्षुः । ग्रन्थे-पत्राणि गाधते । श्लोकान् गाधते । अर्थविषये तु क्रियाक्रमान् गाधते, तान् सन्दृभति । सन्दर्भेण प्रतिपादयतीत्यर्थः ।

1 नृत्ते ग घ

CC-0. In Public Domain. Digitization by eGangotri

४ **बाधृलोड(ट)ने**। प्रतिघातस्तत्। बाधते दैत्यान्। बध बन्धन इत्यग्रे। बन्ध बन्धन इति श्नि। द्वावपि णौ।

५ **नाधृ नाथृ** याच्ञोपतापैश्वर्याशीष्षु। उपतापो रोग उपघातो वा। रोगः पीडाप्राप्तिः। उपघातस्तत्प्रापणमिति भेदः। आद्योऽकर्मकः। याच्ञायां–हरिं मुक्ति नाधते। रोगे-नाथते व्रणी। उपघाते-दैत्यान् नाधते। ऐश्वर्ये-लोकेषु नाधते। अधिपतिर्भवतीत्यर्थः। नियमन–रूपेश्वरत्वे तु सकर्मकत्वम्। लोकान् नाधते। आशिषि-श्रियं नाधते।

६ नाथतेस्तु–'आशिषि' (२–३–५५) इत्युक्तेर्याच्ञादौ न तङ्। [1]श्रियं नाथतीत्यादि। आशिषि तु षष्ठ्यप्युक्ता। श्रियो नाथते॥ नृति नन्दि नर्दिनक्किनाटिनाधृ नाथृनृर्वजिताः सर्वे नादयो णोपदेशाः॥ इत्युक्तेरनयोर्णोपदेशत्वाभावाद् 'उपसर्गादसमासे—' (८–४–१४) इति णत्वं न। प्रनाधते। प्रनाथति। आद्यो णोपदेश इति मते प्रणाधते।

७ **दध** धारणे। दाने च **कल्पद्रुमे**। दधते वेणुम्, मुक्ति च। अस्य दानार्थत्वं **माधव**दूषितमपि कल्पद्रुमानुसारादुक्तम्। एवमुपर्यपि ज्ञेयम्।

८ **स्कुदि** आप्रवणे। आप्लवनं तत्। उत्प्लुत्य गमनं वा। उद्धरणं वा। अन्त्ये सकर्मकः। इदित्वान्नुम्। नद्यां स्कुन्दते। स्कुन्दते कपिः। स्कुन्दते शैलम्।

९ **श्विदि** श्वैत्ये[2]। श्विन्दते पटः। धवलो भवतीत्यर्थः।

१० **वदि** अभिवादनस्तुत्योः। प्रणतिपूर्वकमाशीर्वचनमभिवादनम्। गुरुं वन्दते। लक्षणया नतिमात्रेऽपि। हरिं वन्दते। स्तुतौ–नृपं वन्दते कविः। बदि अभिवादनस्तुत्योरिति **टीकासर्वस्वे**। बन्दते। बद स्थैर्य इत्यग्रे युजादौ च।

११ **भदि** कल्याणे सुखे च। भन्दते भक्तः। मङ्गलवान् भवति, [3]सुखी भवतीति वार्थः। अयं **द्रुमभाग**णौ च।

१२ **मदि** स्तुतिमोदमदस्वप्नगतिषु। मदो गर्वः। स्वप्न

1 मुक्ति ग. घ 2 त्ये। अकर्मकः। श्वि ग. घ

3 सुख्यतीति वार्थः ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

आलस्यम् । स्तुतिगत्योः सकर्मक[1]ः । स्तुतौ–मन्दते हरिम् । मोदे-भक्तो मन्दते । गर्वे–श्रिया मन्दते । आलस्ये–क्रियासु मन्दते । गतौ-व्रजं मन्दते । कान्तौ चेत्येके । कान्तिः काम्यता । मन्दते हरिः । काम्यो भवतीत्यर्थः । मदेति हर्षग्लेप[2]नयोर्घटादौ । हर्षे श्यनि । तृप्तियोगे चुरादौ ।

१३ **स्पदि** किञ्चिच्चलने । स्पन्दते लता ।

१४ **क्लिदि** परिदेवने । क्लिन्दते पुत्रम् । शोचतीत्यर्थः । दुःखमात्रे त्वकर्मकः । क्लिन्दते विरही । उन्दने च **द्रुमे** । क्लिन्दते भुवम् । [3]अयं शप्यतङ्यपि वक्ष्यते । क्लिदू आर्द्रीभाव इति श्यनि ।

१५ **मुद** हर्षे । मोदते भक्तः । आङ्पूर्वः सुरभीभावे । आमोदते स्रक् । सं[4]सर्गार्थोऽयं चुरादौ ।

१६ **दद** दाने । धारणे चेति **द्रुमे** । ददते मुक्ति, वेणुं च ।

१७ ष्वद, स्वर्द आस्वादने । अनुभवस्तत् । 'धात्वादेः षः सः' (६–१–६४) रसमास्वदते, स्वर्दते[5] । स्वदिः प्रायेणाङ्पूर्व इत्युक्तेः स्वदते रसमित्यपि । धातूनामनेकार्थत्वात् स्वदते—रुच्यर्थत्वेऽकर्मकत्वं 'रुच्यर्थानाम्' (१–४–३३) इति चतुर्थी च स्यात् : कृष्णाय स्वदते पयः । एतावावरणार्थावित्येके । चेलेनाङ्गं स्वदते, स्वर्दते वा । अनयोराद्यः षोपदेशः । अन्यो न । तदुक्तम्–।। सृजि सृपि सृ स्तृ स्तृस्त्या सेक्तृवर्जमज्दन्त्यपराः सादयः षोपदेशाः स्मिङ् स्विदिस्वदि [6]स्वञ्जिस्वपयश्च । अच्परो दन्त्यपरश्च यः सकारस्तदादयो धातवः स्मिङादयश्च षोपदेशाः । षर्हाषधुष्व्रादिष्वच्परत्वम् । ष्ठाष्टुञ् ष्णादिषु स्था[7] स्तु स्नेति दन्त्यपरत्वत् । स्मिङादीनां त्वच्दन्त्यपरत्वाभावेऽपि षोपदेशत्वात् पृथगुक्तिः । सृज्ज्यादिवर्जमित्युक्तेः ते तु अषोपदेशा एव । एभ्योऽन्येतु सोपदेशा एव । यथा स्वर्दस्वनादयः । असिष्वदत्, सिषेध सिष्मिय इत्यादावादेशसत्वात् षत्वं षोपदेशफलम् । स्वाद आस्वादन इत्यत्रैव । स्वद स्वाद[8] इति द्वावपि ग्रसादौ ।

1 कः । हरिं मन्दते । भक्तो मन्दते । श्रिया मन्दते । व्रजं मन्दते । ग
2 पयो ग. 3 अयमतङ्यग्रे. क्लि' घ 4 सगोर्थाणौ ग घ
5 'ते वा स्वा घ 6 स्नुस्तुस्व ग 7 स्थाइति । स्वाद ग-घ
8 द इत्यग्रे घ

CC-0. In Public Domain. Digitization by eGangotri

१८–१९ **उर्द** माने क्रीडायां च। चाद् आस्वादनेऽपि। क्रीडायामकर्मकः। माने सकर्मकः। 'उपधायां च' (८–२–७८) इति दीर्घः। ऊर्दते व्रीहीन्। ऊर्दते कृष्णः। ऊर्दते रसम्।

२०–२३ **कुर्द खुर्द गुर्द गुद** क्रीडायामेव। अत्रैवकारोक्त्याऽन्य-धातुपूक्तादन्येऽप्यर्थाः सन्तीति ज्ञापनादनेकार्था धातव इति सिद्धम्। एषां दीर्घो नेत्येके, स्यादित्यन्ये। कुर्दते, खुर्दते, गुर्दते, गोदते वा कृष्णः। दीर्घे तु–कूर्दते, खूर्दते। गूर्दते। गुर्द पूर्वनिकेतने णौ।

२४ **षूद** क्षरणे। निःसरणं[1]तत्। अत्राकर्मकः। हिंसार्थेऽप्यस्ति[2]। तत्र सकर्मकः। सूदते धारा। सूदते दैत्यान्। णिजन्तस्त्वयं संस्कार-क्षारणस्वादूकरणनाशनपूर[3]णेषु च दृश्यते। हविः सूदयतीत्यादि। अयं[4]चुरादावपि।

२५ **ह्राद** अव्यक्ते शब्दे। सच वाद्यादिघोषः। ह्रादते शङ्खः। ह्रदः। ह्रदोत्तरपदादिति निपातनादचि ह्रस्वः।

२६ **ह्लादी** सुखे च। [5]चकारादव्यक्ते शब्दे च। आह्लादते भक्तः शङ्खश्च।

२७ **स्वाद** आस्वादने। स्वदिवदर्थः। रसमास्वादते। कृष्णाय स्वादते पयः।

२८ **पर्द** कुत्सिते शब्दे। स चात्र पायुरवः। पर्दते रोगी।

२९ **यती** प्रयत्ने। यतते विद्यायाम्। यत [6]निकारोपस्का-रयोरिति णौ।

३०, ३१ **युतृ जुतृ** भासने। योतते, जोतते वाग्निः। ज्युतिर् भासने इत्यग्रे।

३२, ३३ **विथृ वेथृ** याचने[7]। आद्यो धान्त इत्येके। वेथते, वेधते मुक्तिम्। आद्यान्त्ययोर्विथितो वेथित इत्याद्यगुणे भेदः[8]। विध विधान इति शे।

1 'तत् हिं' ग. 2 'स्ति सूघ' ग. घ 3 'रणासु च' द
4 'यं णौ च' ग. घ 5 'चादव्य' ग. घ 6 'निराकारो' ग. घ
7 ने। द्वयोर्वेधते मुक्तिम् विथितो घ 8 दः। विथृ याचने इति काशिकापाठः स्वामिदूषितः। विध ग.

CC-0. In Public Domain. Digitization by eGangotri

३४ **श्रथि** शैथिल्ये। तच्च विश्लिष्टता गाधता वा। श्रन्थते काञ्ची नदी च। श्रन्थेति विमोचनादौ श्नि। सन्दर्भे युजादौ च। श्रथेति प्रयत्नादौ णौ। मोक्षणादौ युजादौ। दौर्बल्ये कथादौ।

३५ **ग्रथि** कौटिल्ये। शाठ्यं वक्रता वा तत्। ग्रन्थते[1]बालो लता च। ग्रन्थ सन्दर्भ इति श्नि। ग्रन्थ ग्रथेति द्वावपि युजादौ।

३६ **कत्थ** श्लाघायाम्। साच परविषया स्वविषया[2]पि स्यात्। कृष्णं कत्थते। कत्थते शूरः। अत्राकर्मकः॥ **एधादय उदात्ता अनुदात्तेतः॥**

१ **अत** सातत्यगमने। **इतः शुन्धान्ता उदात्ता उदात्तेतः।** अत[3]त्यध्वानमध्वगः। अति बन्धने इत्य[4]त्रैव।

२ **चिती** संज्ञाने। चैतन्यं तत्। चेतति जन्तुः। स्मरणार्थेऽपि। कृष्णं चेतामि। 'नेषूनचेतन्नस्यन्तः' इति ज्ञानमात्रेऽप्याह भट्टिः। प्रायो विनाशः, तस्य सन्धानं प्रायश्चित्तमिति सन्धाना[5]र्थोऽपि। अयमाकुस्मीयश्च। चिति स्मृत्यामिति णौ।

३ **च्युतिर्** आसेचने। आर्द्रीभावनं तत्। च्योतती भूमिम्। कर्माविवक्षायामकर्मकः। च्योतति धारा।

४ **श्च्युतिर्** क्षरणे। स्रुतिस्तत्। श्च्योतति[6]। सादिरयम्। श्चुत्वेन शः। तेन त्विट् श्च्योततीत्यत्र श्चुत्वस्यासिद्ध्या डःसिधुट्प्राप्तौ 'श्चुत्वंधुटि सिद्धं वाच्यम्' (वा.)। [7]अस्मात् क्विबन्ताद् मधुश्च्युतं करोति मधुश्चयतीति णिचि ततः क्विपि वेर्लोपे प्रत्ययलक्षणेन णेर्लोपे मधुश्च्य् इति प्रातिपदिकस्य पदत्वे संयोगान्तत्वाद् यलोपे 'स्कोः—' (८-२-२९) इति सलोपे[8] मधुगिति स्यात्। शादित्वे तु चस्यापि संयोगान्तलोपे शस्य षत्वे [9]मधुडिति स्यात्। **श्युतिर्** इति चकारं विनेत्येके। श्योतति धारा*। **ज्युतिर्** भासन इत्येके ज्योतत्यग्निः।

1 'खलो' ग.घ 2 'या च स्या' ग. 3 'तति मार्गं पान्थः अति' घ. 4 'त्यग्रे' घ 5 'र्थेऽपि' ग. घ 6 'ति धाराः सादि' घ 7 'अस्य क्वि' ग. घ 8 'पेन म' ग 9 'धुट् स्यात्' घ

* श्चुतिर् इति यकाररहितोऽप्ययमित्युक्तंकेसिद्धान्तकौमुद्याम्।

CC-0. In Public Domain. Digitization by eGangotri

५ **मन्थ** विलोड(ट)ने। तच्च प्रकृतिविपर्यासो, मथनं वा। मन्थति [1]मतिः। क्षोभण तत्। मन्थति सिन्धुम्। अयं श्नि च। मथे इति ज्वलादौ। मथि, मान्थ इत्यत्रैव। माथीति **द्रुमांशश**पि।

६-१० **कुथि** पुथि लुथि मथि मान्थ हिंसासंक्लेशनयोः। **मन्थेति** चैके। कुन्थति पुन्थति लुन्थति मन्थति मान्थति दैत्यान्। अनिदितां क्ङिति न लोपः स्यादिति भेदः। **कुथ** पूतीभावे श्यनि। **कुन्थ** संश्लेषणे श्नि। **पुथेति** हिंसार्थः श्यनि। भाषार्थो ग्रसादौ।

११ **षिध** गत्याम्। सेधति व्रजम्। अयं श्यन्युदित्*।

१२ **षिधू** शास्त्रे माङ्गल्ये च। शास्त्रं शास्त्रगतशासनं शासनमात्रं वा। माङ्गल्यं मङ्गलक्रिया। शास्त्रे–निषेधति हिंसाम्। भक्तः सेधति। मङ्गलं करोतीत्यर्थः।

१३ **खादृ** भक्षणे। खादत्यन्नम्।

१४ **खद** स्थैर्ये हिंसायां च[2]। खदति शिला। खदति दैत्यान् अन्नं वा।

१५ **बद** स्थैर्ये। बदति शिला।

१६ **गद** व्यक्तायां वाचि। गदति शिष्यम्। **गद** देवशब्दे कथादौ।

१७ **रद** विलेखने। तच्च विदारणं, क्षोभणं वा। रदति वेणुं मतिं च।

१८ **णद** अव्यक्ते शब्दे। नदति शङ्खः। भाषार्थो ग्रसादौ। इदिदग्रे समृद्ध्यर्थः।

१९ **अर्द** गतौ याचने च। यातनायां च **द्रुमे**[3]। अर्दति व्रजं, मुक्तिं दैत्यं च। हिंसार्थो युजादौ।

२०-२१ **नर्द गर्द** शब्दे। नर्दति गर्दति गर्दभः। **गर्द** शब्दे णौ। आद्यो णोपदेशो **द्रुमश**पि।

२२ **तर्द** हिंसायाम्। तर्दति[4]रिपुम्।

1 'सिन्धुः। अयं श्नि च' ग 2 'च चाद्भक्षणे खदति' ग. घ
3 'मे सा च पीडा अर्दति' ग. घ 4 'ति' ति कर्द घ.

* 'संराद्धौ' के

CC-0. In Public Domain. Digitization by eGangotri

२३ **कर्द** कुत्सिते शब्दे । स च कुक्षिरवः । कर्दति रोगी ।

२४ **खर्द** दन्दशूके । दन्दशूक इति तत्कर्तृकं दंशनमुक्तम् । दंशनमात्रे **द्रुमे** । खर्दति नरं सर्पः । खर्दतीक्षुम् ।

२५-२६ **अति, अदि** बन्धने । अन्तत्यन्दति गाम् । अद भक्षणे लुकि ।

२७ **इदि** परमैश्वर्ये । इन्दति हरिः ।

२८ **बिदि** अवयवे । चतुर्थादिरित्येके । बिन्दति, भिन्दति धारा । अंशीभवतीत्यर्थः । **भिदिर्** विदारणे श्नमि ।

२९ **गडि** वदनैकदेशे* । वदनैकदेश इति तदारम्भकक्रियोच्यते, गण्डति मांसम् । गण्डात्मतया जायत इत्यर्थः । अत्यादयः पञ्च न तिङ्विषया इत्येके । अन्तो बाशः, अन्दूः पादकटकः, इन्द्रः, बिन्दुः, गण्ड इति सुब्विषया एव । **गड** सेचन इति घटादौ ।

३० **णिदि** कुत्सायाम् । निन्दति कंसम् । णिदृ णेदृ कुत्सासन्निकर्षयोरिति ह्विक्कादौ ।

३१ **टुणदि** समृद्धौ । समृद्धिर्हर्षे पर्यवस्यति । नन्दति भक्तः । लालनेऽपि । अभिनन्दति वाचम् ।

३२ **चदि** आह्लादने । दीप्तौ च । चन्दति लोकान् । चन्दति चन्द्रः । चदे याचने ह्विक्कादौ ।

३३ **त्रदि** चेष्टायाम् । त्रन्दति हरिः ।

३४-३६ **कदि क्रदि क्लदि** आह्वाने रोदने च । कन्दति, क्रन्दति, क्लन्दति कृष्णं, बालो वा । एत इदितोऽनिदितश्च वैक्लव्यार्था घटादौ । आङः क्रन्द सातत्य इति णौ ।

३७ **क्लिदि** परिदेवने । उन्दने च **द्रुमे** । क्लिन्दति पुत्रम्[1] ।

६८ **शुन्ध** शुद्धौ । शुन्धति मतिः । अयं **युजादौ द्रुमशपि** च । **शुध** शौच इति श्यन्यनिट् । **अतादय उदात्ता उदात्तेतः** ॥

1 'त्रं भुवं च । शुन्ध' ग. घ

* 'टवर्गीयान्तमध्ये पठिष्यमाणस्याप्यस्येह तवर्गीयान्तमध्ये पाठोऽतिङ्विषयत्वसाम्यादिति बोध्यम् । मतान्तरेणोत्तरत्र पठित इति वक्ष्यते' के

CC-0. In Public Domain. Digitization by eGangotri

१ **शीकृ** सेचने। श्लाघान्ता उदात्ता अनुदात्तेत:। शीकते भूमिम्। गत्यर्थोऽग्रे। मर्षणार्थो युजादौ।

२ **लोकृ** दर्शने। लोकते हारम्। भाषार्थो ग्रसादौ।

३ **श्लोकृ** सङ्घाते। स च ग्रन्थनम्। तच्च कर्मगतं कर्तृ–गतं वा। श्लोकते कथा। श्लोकते कवि: कथाम्।

४–५ **द्रेकृध्रेकृ** शब्दोत्साहयो:। द्रेकते भेरी। विद्यायां द्रेकते। शब्दोत्साह इत्येके। उत्साहो वृद्धिरौद्धत्यं वा। द्रेकते पटहध्वनि:। द्रेकते शूर:। उद्धतं ध्वनतीत्यर्थ:। एवं ध्रेकते भेरीत्यादि।

६ **रेकृ** शङ्कायाम्। रेकते दोषम्।

७–११ **सेकृ स्रेकृ स्रकि श्रकि श्लकि** गत्यर्था:। अत्र स्रङ्के: पूर्वं **श्रेकृ** इत्येके। **शीकृ** इत्यन्ये। **षेकृ** इत्यपरे। सेकते स्रेकते। स्रङ्कते। श्रङ्कते। श्रेकते। श्लङ्कते। शीकते। सेकते।*

१२ **शकि** शङ्कायाम्। त्रासे च **द्रुमे**। शङ्कते दोषम्। शङ्कते व्याघ्रात्। शक विभाषितो मर्षण इति श्यनि। **शक्लृ** शक्तौ श्नौ।

१३ **अकि** लक्षणे। गतौ च **द्रुमे**। अङ्कते पटं, व्रजं च। अयं कथादौ च। अक कुटिलायां गताविति घटादौ।

१४ **वकि** कौटिल्ये। **बकीति टीकासर्वस्वे**। वङ्कते वङ्कते लता। आद्यो गतावग्रे।

१५ **मकि** मण्डने। मङ्कते वधू:। शोभायामाह **शङ्कर:**।

१६ **कक** लौल्ये। लौल्यं गर्वश्चापल्यं च। इच्छायां च **द्रमे**। ककते मानी, स्त्रैणो; मुक्ति च। ककि गतावग्रे।

१७–१८ **कुक वृक** आदाने। कोकते वर्कते वार्थम्। कोक: कोकिल: वृक:।

१९ **चक** तृप्तौ। प्रतीघाते चैके। चकते भुक्त:। चकते दैत्यान्। घटादौ चाऽयम्।

* 'सिषेक इत्यत्र षत्वमषोपदेशादस्य विशेष:'। **के**

CC-0. In Public Domain. Digitization by eGangotri

२०–३२ **ककि, वकि, श्वकि, त्रकि, ढौकृ, त्रौकृ, ष्वष्क, वस्क, मस्क, टिकृ, टीकृ, रघि लघि,** गत्यर्थाः। श्वकिस्थाने **स्वकी**–त्येके। टिकृटीकयोः स्थाने **तिकृ तीकृ** [1]इत्यन्ये।* कङ्कते। वङ्कते। श्वङ्कते। स्वङ्कते। त्रङ्कते। ढौकते। त्रौकते। 'सुब्धातुष्ठिवुष्वष्कतीनां न' इति सत्वाभावः। ष्वष्कते। वस्कते। मस्कते। टेकते। टीकते। तेकते। तीकते। रङ्घते। लङ्घते। ककि प्रजनने इति **द्रुमे**। जन्मोपक्रमत्वाद् गर्भग्रहणं प्रजननम्। तेनाकर्मकः। कङ्कते पशुः। लघि भोजननिवृतौ च इत्येके। लङ्घते व्रती। रघिलघी भाषार्थौ ग्रसादौ। **लघि** शोषणे, **राघृ लाघृ** सामर्थ्ये इत्यग्रे। **रघ लघ** आस्वादन इति **द्रुमणौ**।

३३–३५ अघि, वघि, मघि गत्याक्षेपे। आक्षेपो निन्दा। गतौ गमनारम्भे चेत्येके। निन्दारम्भजवेषु च **द्रुमे**। गत्याक्षेपे–युद्धादङ्घते शूरः। युद्धाद्गतिं निन्दतीत्यर्थः। गतावूह्यम्। [2]गमना–रम्भे-अङ्घते भुक्त्वातिथिः। निन्दादौ-अङ्घते कंसम्, पूजाम्, मन्त्रं च। एवम्-वङ्घते, मङ्घते। मघि कैतवे च। याचने च **द्रुमे**। मङ्घते वणिक्। मङ्घते मुक्तिम्। अघ तत्कृताविति **द्रुमकथादौ**। मघि मण्डन इत्यग्रे।

३६–३८ राघृ, लाघृ, द्राघृ सामर्थ्ये। ध्राघृ इत्यप्येके। कर्तु राघते, लाघते, द्राघते, ध्राघते पटुः। द्राघृ आयामे च। स च दैर्घ्यक्रिया, कदर्थनं वा। द्राघते रज्जुम्, दैत्यान् वा।

३९ **श्लाघृ** कत्थने श्लाघते हरिम् शूरो वा।

शीकादय उदात्ता अनुदात्तेतः। ११४

१ **फक्क** नीचैर्गतौ। शिङ्घ्यन्ता उदात्ता उदात्तेतः। नीचै–र्गतिर्मन्दगमनमसद्व्यापारो वा। फक्कति स्त्री, कंसश्च।★

1 'त्यप्यन्ये' घ. 2 'गत्यारम्भे' ग. घ.

* 'पृथगप्यपरे' के

★ 'न्यग्भावोऽपि दृष्टः। फक्कति प्रांशुः कपाटे के'

CC-0. In Public Domain. Digitization by eGangotri

२ तक हसने । सहने च द्रुमे । तकति जळमपराधं च । हासः कर्माविवक्षायामकर्मकः । तकति जळः ।

३ तकि कृच्छ्रजीवने । तङ्कति निस्स्वः । अत्र शुक गताविति मैत्रेयेण पठितं माधवेन दूषितम् ।

४ बुक्क भषणे । तच्च श्वरवः । बुक्कति श्वा । अयं णौ च ।

५ कख हसने । कखति जळं जळो वा । कखे इति घटादौ ।

६–१० ओखृ, राखृ, लाखृ, द्राखृ, ध्राखृ शोषणालमर्थयोः । ओखति तरुः । ओखति धनम् । पर्याप्तं भवतीत्यर्थः । एवं राखति लाखति, द्राखति, ध्राखति । उख, उखि, रख, रखि, लख, लखि इत्यत्रैव गत्यर्थाः ।

११ शाखृ श्लाखृ व्याप्तौ । शाखति श्लाखति विश्वं हरिः ।

१२–३९ उख, उखि, वख, वखि, मख, मखि, णख, णखि रख, रखि, लख, लखि, इख, इखि, ईखि, वल्ग, रगि, लगि, अगि, वगि, मगि, तगि, त्वगि, श्रगि, श्लगि, इगि, रिगि, लिगि गत्यर्थाः। अत्र खान्तानामन्ते त्वख, त्वखि, शिखि इत्येके । रिखि इत्यप्यन्ये । एतैः सहैकोनविंशतिः खान्ताः । गान्तास्त्रयोदश । ओखति, उङ्खति, वखति, वङ्खति, मखति, मङ्खति, नखति, नङ्खति, रखति, रङ्खति, लखति, लङ्खति, एखति, इङ्खति, ईखति, त्वखति, त्वङ्खति, शिङ्खति, रिङ्खति, वल्गति, रङ्गति, लङ्गति, अङ्गति, वङ्गति, मङ्गति, तङ्गति, त्वङ्गति, श्रङ्गति, श्लङ्गति, इङ्गति, रिङ्गति, आलिङ्गति । रगे शङ्कायां घटादौ । रग लग आस्वादने णौ । लगे, सङ्गे, अग कुटिलायां गतौ इति द्वौ घटादौ । अङ्ग [1]पदे लक्षणे चेति कथादौ । लिगि चित्रीकरणे णौ ।

४० त्वगि कम्पने* । त्वङ्गति लता ।

४१–४३ युगि जुगि बुगि वर्जने । युङ्गति, जुङ्गति, बुङ्गति दोषम् ।

1 'पदलक्षणे' ग.

* 'सिद्धान्तकौमुद्यां त्वगि स्थाने त्वगि इति, ततः त्वगि कम्पने च इति पठितम्' के.

CC-0. In Public Domain. Digitization by eGangotri

४४ **दघि** पालने। त्यागे च **द्रुमे**। दङ्घति लोकं दोषं च। दघ घातने पालने चेति श्नौ।

४५ **लघि** शोषणे। लङ्घति तरुः।

४६ **घर्घ** हसने। घर्घति जळम्।

४७ **मघि** मण्डने। मङ्घति [1]वधूः।

४८ **शिघि** आघ्राणे। शिङ्घति पुष्पम्।

फक्कादय उदात्ता उदात्तेतः। १६२

१ **वर्च** दीप्तौ। ईजान्ता उदात्ता अनुदात्तेतः। वर्चतेऽग्निः।

२ **षच** सेचने, सेवनेऽपि। सचते भूमिं, हरिं वा। सक्तुः, सचिवः। समवायार्थ उदात्तेत् स्वरितेच्चाग्रे।

३ **लोचृ** दर्शने। लोचते हरिम्। ग्रसादौ भाषार्थः।

४ **शच** व्यक्तायां वाचि। शचते श्लोकम्। शची।

५–६ **श्वच** श्वचि गतौ। श्वचते, श्वञ्चते।

७ **कच** बन्धने। दीप्तौ च **द्रुमे**। कचते गाम् अग्निश्च। यूनां मनो बध्नातीति कचः। शब्दार्थोऽतङि **द्रमशपि**।

८-९ **कचि काचि** दीप्तिबन्धनयोः। कञ्चते काञ्चतेऽग्निः गां च। कञ्चुकः। काञ्चिः। काञ्चनम्।

१०–११ **मच मुचि** कल्कने। **मचीत्येके**। **मुचेत्यन्ये**। कल्कनं दम्भः शाठ्यं कत्थनं वा लोकरञ्जनार्थं कर्मानुष्ठानं दम्भः। मचते धूर्तो वेश्या शूरश्च। मचते हरिम्। एवं मुञ्चते मञ्चते मोचते। **मञ्चु मुञ्चु** गतौ द्रुमशपि[2]। प्रमोचने णौ।

१२ **मचि** धारणोच्छ्रायपूजनेषु। लृदिदित्येके। उच्छ्रायेऽकर्मकः। दीप्तौ च **द्रुमे**। मञ्चते वेणुं हरिं च। मञ्चते तरुरग्निश्च। अचि–मञ्चः।

१३ **पचि** व्यक्तीकरणे। **पचेत्येके**। पञ्चते पचते शास्त्रार्थान्। पचति व्यक्तीकरोतीत्यतङ्यपि न्यासोक्तम्। अयं पाकार्थेऽग्रे। पचि विस्तारवचने णौ।

1 'वधूम्' घ. 2 'पि। 'मुचिर्मोक्षणे शे। प्रमो' ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

१४ ष्टुच प्रसादे। षः सत्वे निमित्ताभावात् ष्टुत्वनाशः। स्तोचते हरिः।

१५ ऋज गतिस्थानार्जनोर्जनेषु। स्थाने – अर्जते व्रजः। कृष्णस्य। स्थानीभवतीत्यर्थः। आर्जनं स्वीकारः। आर्जतेऽर्थम्*। ऊर्जनं शक्तिप्राप्तिः, प्राणनं वा। अर्जते शूरो, मूर्च्छितश्च। बलवान् भवति, जीवति चेत्यर्थः। आर्जनोपार्जनेष्विति पाठे उपार्जनं स्वीकार एव। आर्जनमलब्धलाभः। आर्जते मुक्तिम्। स्थैर्ये च द्रुमे। अर्जते शिला। अर्जेत्यार्जनेऽग्रे। प्रतियत्ने णौ।

१६–१७ ऋजि भृजी भर्जने। अन्त्य ईदित्। ऋञ्जते, भर्जते मुद्गान्। भृज्जतीति शे।

१८–२० एजृ, भ्रेजृ, भ्राजृ दीप्तौ। एजते भ्रेजते भ्राजते। एजृ कम्पने इत्यतङ्यग्रे। भ्राजि फणादौ च।

२१ ईज गतिकुत्सनयोः। ईजते व्रजम् कंसं च। इदिद् द्रुमशपि। वर्चादयः पञ्चिवर्जमुदात्ता अनुदात्तेतः॥ १८३

१ शुच शोके। व्रजान्ता उदात्ता उदात्तेतः। शोचति पुत्रम्। दुःखमार्ते-शोचत्यार्तः। शुचिर् पूतीभावे श्यनि।

२ कुच शब्दे तारे। गतावित्येके। कोचति खगः सम्ब(म्प)-[1]चनाद्यर्थो ज्वलादौ। सङ्कोचनार्थः शे।

३–४ कुञ्च क्रुञ्च गतिकौटिल्याल्पीभावयोः। गतेः कौटिल्ये द्रव्यस्याल्पीभावे चेत्य[2]र्थः★। कुञ्चति सर्प ओदनो व्रजं लता च। एवं क्रुञ्चति।

1 'चने कुटादौ। कुञ्च' घ
2 'त्यर्थः। गतिकौटिल्ययोरिति द्रुमे। कुञ्च' ग. घ.
* 'अस्मिन्नर्थे केरलेषु प्रायेणाङ्पूर्व एव पाठः। औत्तराहपुस्तकेषु तु अर्जनम्, अर्जते इत्याद्यनुपसर्ग एव लेखो दृश्यते'। के.
★ 'गतिः कौटिल्यम् अल्पीभावश्चेति द्वन्द्वेन बहुवचनान्तः पाठोऽप्यभिमत इति वक्ष्यमाणोदाहरणादवगम्यते'। के.

CC-0. In Public Domain. Digitization by eGangotri

५ **लुञ्च** अपनयने। लुञ्चति दोषम्।

६ **अञ्चु** गतिपूजनयोः। अञ्चति हरिम्। अचेति पूजार्थोऽग्रे। अञ्चु अचु गतियाचनयोः, अचि गतौ इति त्रयं हिक्कादौ। अञ्चु विशेषणे णौ।

७-१४ वञ्चु, चञ्चु तञ्चु, त्वञ्चु, म्रुञ्चु म्लुञ्चु, म्रुचु, म्लुचु गत्यर्थाः। वञ्चति। अयं कौटिल्येऽपि। वञ्चति लता। प्रलम्भनेऽपीति **शङ्करः**। वञ्चति वटुम्। चञ्चतिर्लक्षणया चलने[1]। चञ्चति पल्लवः। तञ्चति, त्वञ्चति, म्रुञ्चति, म्लुञ्चति, म्रोचति, म्लोचति। अन्त्यौ निपूर्वावस्तमये। निम्रोचति निम्लोचति सूर्यः। वञ्चु प्रलम्भने चितादौ। वच परिभाषणे लुकि युजादौ च। तञ्चू संकोचने श्नमि। त्वच संवरणे शे।

१५-१८ ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे, ग्रोचति, ग्लोचति, कोजति खोजति वा घृतं हरिः।

१९-२० **ग्लुञ्चु षस्ज** गतौ। ग्लुञ्चति। सस्य[2] जश्त्वम्। सज्जति। 'यदभिप्रायेषु[3] सज्जते,' इति भाष्यप्रयोगात् तङपि। सन्नाहाऽर्थोऽस्य लक्षणया। **षश्च** इत्यप्येके। सश्चति।

२१ गुजि अव्यक्ते शब्दे। अनिदिदित्येके। गुञ्जति गोजत्यलिः। गुज शब्दे कुटादौ।

२२ अर्च पूजायाम्। अचेत्येके। अर्चत्यचति हरिम्। आद्यो युजादौ च।

२३ म्लेछ अव्यक्ते शब्दे। स चास्पष्टशब्दोऽपशब्दो वा तुक्। म्लेच्छति शुकोऽज्ञो वा। णौ चायम्।

२४-२५ लच्छ लाच्छि लक्षणे। लच्छति, लाञ्च्छति पटम्।

२६ वाच्छि इच्छायाम्। वाञ्च्छति मुक्तिम्।

२७ आच्छि आयामे। आञ्छति रज्जुम्।

1 'नेऽपि। चञ्च' ग. 2 'स्य श्चुत्वम् पुनःशस्य जश्त्वं जः सज्जति' ग
3 'येण सज्ज' ग.

CC-0. In Public Domain. Digitization by eGangotri

२८ ह्रीच्छ लज्जायाम्। ह्रीच्छति बाला।

२९ हुर्च्छा कौटिल्ये। दीर्घः। हूर्च्छति मतिः। इह कौटिल्यमपसरणमित्येके। हूर्च्छति दैत्यः।

३० मुर्च्छा मोहसमुच्छ्राययोः। मोहे—मूर्च्छत्यार्तः। उन्नतौ मूर्च्छति तापः।

३१ स्फुर्च्छा विस्मृतौ। स्फूर्च्छति पठितम्।

३२ युच्छ प्रमादे। युच्छति कार्येषु।

३३ उच्छि उञ्छे। उञ्छे धान्यानां पृथक् पृथगादानम्। व्रीहीनुञ्च्छति।

३४ **उच्छी** विवासे। स च समाप्तिः। प्रायो विपूर्वोऽयम्। व्युच्छति रात्रिः। बन्धनवर्जनातिक्रमेषु च **द्रुमे**। उच्छति गां, दोषं, नदीं च। द्वौ शेऽपि।

३५-४० **ध्रज**, **ध्रजि**, धृज, धृजि, ध्वज, ध्वजि गतौ। ध्रजति, ध्रञ्जति, धर्जति, धृञ्जति, ध्वजति, ध्वञ्जति, **व्रजि** इत्यप्येके। व्रञ्जति। अयमनिदिदग्रे णौ च।

४१ **कूज** अव्यक्ते शब्दे। कूजत्यलिः।

४२-४३ **अर्ज षर्ज** अर्जने। आर्जनमेव तत्। अर्जति सर्जति वा [1]धनम्। अषोपदेशो द्रुमेऽपि।

४४ **गर्ज** शब्दे। मेघशब्दे द्रुमे। गर्जति गजो, मेघश्च। णौ चायम्। गृजेत्यग्रे।

४५ **तर्ज** भर्त्सने। तर्जत्यरिम्। चितादौ चायम्।

४६ **कर्ज** व्यथने। तच्च भयं, दुःखं, चलनं च। कर्जति व्याघ्रात्, विरही, पल्लवश्च।

४७ **खर्ज** पूजने च। मार्जने च **द्रुमे**। खर्जति हरिम्, विरही, भूमिं च।

1 'अर्थम्' ग, घ

CC-0. In Public Domain. Digitization by eGangotri

४८ अज गतिक्षेपणयोः। अजति व्रजम्। दैत्यं च। अञ्जू इति व्यक्त्यादौ श्नमि। अजि भाषार्थो ग्रसादौ।

४९ तेज पालने तेजति विश्वम् तेजः। तिज निशातन इत्यग्रे णौ च।

५० खज मन्थे। खजति दधि।

५१ खजि गतिवैकल्ये। खञ्जति नरः। विकलं गच्छतीत्यर्थः।

५२ एजृ कम्पने। एजति पल्लवः।

५३ टुओस्फूर्जा वज्र[1]निर्घोषे। स्फूर्जति मेघः। अत्र दीर्घोवितः 'उपधायां च' (८-२-७८) इति दीर्घस्यानित्यत्वे लिङ्गम्।

५४ क्षि क्षये। ऐश्वर्ये च द्रुमे। क्षयति दैत्यः कृष्णश्च। अन्तर्गतण्यर्थत्वे सकर्मकत्वात् क्षयति दैत्यम्। अयं हिसायां श्नौ द्रुमांशश्नि च। निवासगत्योः शे। दीर्घान्तो हिंसार्थः श्नि द्रुमशपि च।

५५ क्षीज अव्यक्ते शब्दे। क्षीजति शङ्खः*।

५६–५९ लज लाजि भर्त्सने। लाज लाजि भर्त्सने च। एतौ च भर्त्सन इत्यर्थः। भजने चेति लीलाशुकः। लजति लाञ्जति [2]लाजति, लञ्जति वा रिपून् मुद्गांश्च। लजीति हिंसाद्यर्थे णौ, ग्रसादौ भाषार्थः। लज लजि प्रकाशने कथादौ। ओलजी, ओलस्जी, व्रीड[3]ने शे।

६०–६१ जज, जजि युद्धे। जजति, जञ्जति दैत्यैर्हरिः।

६२ तुज हिंसायाम् तोजति।

६३ तुजि पालने च। प्राणने च द्रुमे। तुञ्जति विश्वम्, दैत्यम्, मूर्च्छितं च। द्वौ हिंसाद्यर्थौ णौ। तुजिर्भाषार्थो ग्रसादौ।

६४–६९ गज, गजि, गृज, गृजि, मुज, मुजि शब्दार्थाः। मज, मजि [4]इत्येके। गज मदने च। गजति, गजः। शब्दायते माद्यति वेत्यर्थः। गञ्जति, गर्जति, गृञ्जति, मोजति, मुञ्जति, मजति, मञ्जति गर्जिणौ च।

1 'निष्पेषे' ग. घ. 2 'ति वा रिपून्' ग. 3 'ल' घ. 4 'इत्यप्येके' ग.
* 'क्षोज कूजेति पठितं मुशकम्।' पाठोऽत्रानेकधा दृश्यते ग्रन्थान्तरेषु' के

CC-0. In Public Domain. Digitization by eGangotri

७०-७१ **वज व्रज** गतौ। वजति, व्रजति। आद्यः संस्काराद्यर्थे णौ।

शुचादय उदात्तेत उदात्ताः क्षिवर्जम् ॥२५४॥

१ अट्ट अतिक्रमहिंसयोः। शाङ्न्ता उदात्ता अनुदात्तेतः। दोपधस्तोपधो वायम्*। तेन क्विपि संयोगान्तलोपे अद् इति स्यात्। ष्टुत्वेन टः। अट्टते नदीम् दैत्यं च। टोपधोऽपि द्रुमे। अनादरे[1] णिचि।

२ वेष्ट वेष्टने। वेष्टते वस्त्रम्। विलुठनेऽकर्मकः। विवेष्टते भूमौ।

३ **चेष्ट** चेष्टायाम्। चेष्टते हरिः ★।

४-५ **गोष्ट, लोष्ट** सङ्घाते, गोष्टते लोष्टते वा मृत्।

६ **घट्ट** चलने। णौ चायम्, घट्टते पल्लवः।

७ **स्फुट** विकसने। स्फोटते कोरकः अयम्। कुटादौ च। स्फुट स्फुटि, स्फुटिर् विशरण इत्यतङ्यग्रे। स्फुटि परिहासे णौ। स्फुटेति भेदनहिंसयोस्तत्रैव। प्रकाशविशरणयोः कथादौ।

८ अठि गतौ। अण्ठते। अयमतङ्यनिदिदग्रे।

९ **वठि** एकचर्यायाम्। सा चासहायगमनम्। वण्ठते निर्भयः। बठ स्थौल्येऽग्रे।

१०-११ **मठि, कठि** शोके। अत्र शोकः सोत्कण्ठस्मरणम्। हरिं मण्ठते उत्कण्ठते वा। उत्कण्ठामात्रे त्वकर्मकः। हरावुत्कण्ठते। मठ, कठ मदनिवासयोः। कठ कृच्छ्रजीवने इत्यग्रे। कठि शोके युजादौ।

१२ **मुठि** पालने। मुण्ठते।

१३-१४ **हेठ** विबाधायाम्। एठ च। हेठते दुष्टान्। एठते। विबाधा शाठ्यमिति **माधवः**। हेठते वेश्या। हेठिराक्रोशार्थोऽग्रे। भूतप्रादुर्भावार्थः श्नि।

१५ **हिडि** गत्यनादरयोः। हिण्डते ग्रामम्। मूढं च।

1 'रेऽयं णौ' ग. घ.

* 'टोपध इति पक्षान्तरम्' के. ★'उत्तरदेशमुद्रितपुस्तकेषु विलुठनार्थकवेष्टिस्थाने बहुशश्चेष्टेर्लेखो दृष्टः' के.

CC-0. In Public Domain. Digitization by eGangotri

१६ **हुडि** सङ्घाते । हुण्डते जनः । हुडृ, हूडृ, होडृ[1] अनादर इति चाग्रे । हुडिहूडी द्रुमशपि च ।

१७ **कुडि** दाहे । कुण्डते तरुम्, कुडीति वैकल्यार्थो[2]ग्रे । रक्षणार्थो णौ । कुडेति बाल्ये संवरणे[3] निर्मज्जने च कुटादौ ।

१८-१९ **वडि** विभाजने मडि च द्वौ वेष्टनेऽपीत्येके । वण्डते मण्डते वार्थान् वस्त्रं च । आद्यो णौ च । मडि भूषायामिति णावतङ्यग्रेऽपि ।

२० **भडि** परिभाषणे । तच्च परितोभाषणं, सनिन्दावचनं वा । परिहास [4]इत्येके । भण्डते बुधः । भण्डते रिपुम् जडं च । कल्याणे णौ ।

२१ **पिडि** सङ्घाते, पिण्डते मृत् । णौ चायम् । पिड शब्द - सङ्घातयोरित्यग्रे । पीडेति बाधनार्थो णौ ।

२२ **मुडि** मार्जने । शुद्धिर्न्यग्भावो वा तत् । मुण्डते स्नातो दुर्बलश्च । मुडि खण्डने मुड मर्दने चाग्रे । मुड उत्सर्गे कुटादौ ।

२३ **तुडि** तोडने । दारणं, हिंसनं, वा तत् । तुण्डते वेणुं रिपुं च । भाषार्थोऽयं ग्रसादौ । तुड तोडने कुटादौ । तूडृ तुडृ इत्यग्रे ।

२४ **भुडि** वरणे* । स्वीकारस्तत्, हरण इत्येके । भुण्डतेऽर्थं नृपश्चोरो वा । स्फुडि विकसने । इत्यप्येके । स्फुण्डते कोरकम् । परिहासे णौ । स्फुड, स्फुडि, स्फुडिर् विशरण इत्यतङ्यग्रे । स्फुड संवरणे कुटादौ ।

२५ **चडि** कोपे । चण्डते कृष्णाय चैद्यः । चण्डालः ।

२६ **शडि** रुजायां सङ्घाते च । शण्डते दैत्यं जनश्च ।

२७ **तडि** ताडने । तण्डते दैत्यम् । तड आघाते णौ ।

1 'डृ गतौ । अना' ग. घ. 2 'र्थोऽतङ्यग्रे' ग. घ.
3 'निमज्ज' ग. घ. 4 'इत्यग्रे' ग.
* 'हुडीति सिद्धान्तकौमुद्याम्' के

CC-0. In Public Domain. Digitization by eGangotri

२८ षडि गतौ । पण्डते । सर्वे गत्यर्था ज्ञानार्था इति पण्डितो ज्ञानी । नाशने णौ । पड व्यक्तायां वाचीत्यग्रे ।

२९ कडि मदे । कण्डते सुरापः । भेदने णौ । कड कडि मदे, कड, कडि गतौ इति चाऽतङ्यग्रे । कड मदे कुटादौ ।

३० खडि मन्थे । खुडि । इत्यप्येके । खण्डते, खुण्डते दधि । खड खडि, खुडि भेदने णौ ।

३१-३२ हेडृ होडृ अनादरे । अन्त्यो गतौ च द्रुमे । हेडते होडते मूढम् । हेडिराक्रोशार्थोऽतङ्यग्रे । वेष्टने घटादौ ।

३३ बाडृ आप्लाव्ये । आप्लवनं तत् । बाडते नद्याम् ।

३४-३५ द्राडृ ध्राडृ विशरणे । द्राडते, ध्राडते वा [1]पिण्डः । विशीर्यत इत्यर्थः ।

३६ शाडृ श्लाघायाम् । शाडते हरिम् । डलयोरभेदाच्छालते शलेति चलनादावग्रे । गतौ ज्वलादौ ।

अट्टादय उदात्ता अनुदात्तेतः । २९०

१ शौटृ गर्वे । [2]गण्डान्ता उदात्ता उदात्तेतः । शौटति मानी ।

२ यौटृ बन्धे । यौटति हरिणम् ।

३–५ मेटृ, म्रेडृ, म्लेटृ उन्मादे । मेटति म्रेडति म्लेटति विरही । आम्रेडितमिति म्रेडिरुक्तयर्थेऽपि ।

६ कटे वर्षावरणयोः । चटे । इत्यप्येके । कटति, चटति जलम् [3]देहं च [4]कटी गतावग्रे । अनिदिद् द्रुमशऽपि । भेदने हिंसने च णौ ।

७-८ अट पट गतौ । अटति पटति । पटिर्ण्यन्तो भेदने । पाटयति वेणुम् । आद्यो णौ च[5] ग्रन्थाद्यर्थः कथादौ ।

९ रट परिभाषणे । रटति बुधः । रटति रथ इति शब्द–मात्रेऽपि ।

१० लट बाल्ये । लटति हरिः । बालत्वं प्राप्नोतीत्यर्थः ।

1 'घटः' ग. घ. 2 'गण्ड्यन्ता' ग. घ. 3 'द्रव्यं च' ग

4 'कटि कटी गता' ब. 5 'च । पट भाषायां ग्रसादौ । ग्र' ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

११ **शट** रुजाविशरणगत्यवसादनेषु । अवसादनं पीडा । शटति दैत्यम् । घटो व्रजमार्तश्च ।

१२ **वट** वेष्टने । पटं वटति । परिभाषणे घटादौ । ग्रन्थादौ कथादौ । वटि विभाजन इति णौ कथादौ[1] च ।

१३-१४ **किट खिट** [2]त्रासे । त्रासनायामित्यर्थः । केटति, खेटति दैत्यान् । भीमार्थे च द्रुमे । केटति खेटति सिंहः । भीमो भवतीत्यर्थः । किट गतावग्रे । खेट भक्षणे कथादौ ।

१५-१६ **शिट, षिट** अनादरे । शेटति सेटति मूढम् ।

१७-१८ **जट झट** सङ्घाते । जटति झटति केशः । झाटः, सङ्घः ।

१९ **भट** भृतौ । भृतिर्वेतनप्राप्तिः । भटति दासः । भटः परिभाषणे[3] घटादौ ।

२० **तट** उच्छ्राये । तटति तरुः । तटम् ।

२१ **खट** काङ्क्षायाम् । खटति मुक्तिम् । खट्वा ।

२२ **णट** नृत्तौ । हिंसायां च द्रुमे । नृत्तिर्नर्तनम् । तच्चात्र नटव्यापारः । नटति नटः । घटादौ चायम् । दन्त्यादिरवस्पन्दने णौ । भाषायां ग्रसादौ । हिंसायां द्रुमशपि ।

२३ **पिट** शब्दसङ्घातयोः । पेटति शुको जनश्च ।

२४ **हट** दीप्तौ । हटति । हाटकम् ।

२५ **षट** अवयवे । सटति केशः ।

२६ **लुट** विलोट (ड)ने । एतदादयः [4]पठत्यन्ता डान्ता इत्येके, लृल इत्य[5]प्यन्ये । लोटति, लोडति, लोलति दैत्यान् । लुटि पुषादौ च । प्रतिघाते द्युतादौ । भाषायां ग्रसादौ[6] । स्तेयार्थोऽग्रे । लुण्टेति णौ द्रुमशपि च । लोटृ उन्मादे इत्यपि द्रुमशपि । लुडि स्तेये, लोडृ उन्माद इत्यप्यग्रे । लुड संश्लेषणे कुटादौ । पिट शब्दसङ्घातयोः, हट दीप्तौ इति द्वावत्रापीत्येके । तेन डान्तपक्षे पेडति हडति ।

1 'दौ । किट' ग. 2 'उत्त्रासे' ग. घ. 3 'कथादौ' घ
4 'पठ्यन्ता' ग. 5 'प्येके' ग. 6 'दौ । इदित् स्ते' ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

२६ चिट परप्रेष्ये। चेटति दासः। चेटः। डान्तमते चेडति।

२८ विट शब्दे। आक्रोशे च द्रुमे। वेटति। विटः। डान्ते वेडति।

२९ बिट आक्रोशे। हेठ इति चैके। बेटति, हेठति, बेडति, हेडति कंसः।

३०–३२ इट, किट, कटी गतौ। एटति, केटति, कटति।

इदितं कटिमिच्छन्ति केचिदन्ये तमीदितम्।
इधातुमत्र प्रश्लिष्टमीधातुं वा परे जगुः॥
प्रथमे कण्टतीति स्याद् द्वितीये [1]कट्टवानिति।
तृतीये स्वयतीतिस्याच्चतुर्थेऽयाञ्चकार च*।

डान्ते एडति, केडति, कडति, कण्डति। 'ईड स्तुतौ' इति लुकि णौ च। इण् गतौ, इङ् अध्ययने, इक् स्मरणे, ई गत्यादौ इति चत्वारो लुकि। [2]ई गतौ श्यनि।

३३ मडि भूषायाम्। मण्डति वधूम्।

३४ कुडि वैकल्ये। कुठि इत्य[3]न्ये। कुटि इत्यन्ये। कुण्डति, कुण्ठति, कुण्टति क्रिया। कुण्ठिर्गतिप्रतीघातेऽग्रे। वेष्टने शे[4] कुटेति कौटिल्ये शे[5] कुट कूट इति द्वौ चितादौ कथादौ च।

३५ मुट प्रमर्दने। मुडेत्येके★। पुड इत्य[6]न्ये★। ○मोटति, मोडति पोडति, मुण्डति, पुण्डति पल्लवम्। मुटिः कुटादौ च[7] सञ्चूर्णने णौ। मुटि[8] मर्दने द्रुमशपि। पुटि छेदन उत्सर्गे च कुटादौ। पुडि खण्डने इत्यग्रे।

1 'कटतीति वा। ग. 2 'ईङ् गतौ' ग. घ. 3 'त्येके' ग. घ.
4 'णौ' ग. घ. 5 'शे। प्रतापनेचिता' ग. 6 'न्ये। डान्ताविदितावित्यपरे। मो' ग. घ. 7 'च। मुडि सञ्चूर्णने णौ' ग.
8 'प्रमर्दने' ग.

* 'श्वीदितो निष्ठायाम् (७–२–१४) इति इण्निषेधात् कट्टवानिति 'इजादेश्च गुरुतः–' (३–१–३६) इत्यामि अयाञ्चकारेति च रूपसिद्धिः।' के.

★ 'पठत्यन्तानामुक्ते डान्तमते तदिति ज्ञेयम्' के ○मुटिमुडिइत्यपि पक्षान्तरमुदाहरणादूह्यते'। के.

CC-0. In Public Domain. Digitization by eGangotri

३६ चुटि अल्पीभावे। चुट इत्येके। चुण्टति चोटति [1]वाल्मम्। डान्ते चुण्डति चोडति। दान्तौ छेदनार्थौ[2] तत्रानिदिद् द्रुमकुटादौ च। चुड छेदने, चुड संवरणे द्वौ कुटादौ।

३७ मुडि खण्डने। पुडि इत्येके। मुण्डति पुण्डति केशान्। पुण्डरीकम्।

३८-३९ रुटि लुटि स्तेये। रुठि लुठि इत्येके। रुडि लुडी-त्यन्ये* रुण्टति, लुण्टति, रुण्ठति, लुण्ठति, रुण्डति, लुण्डति वार्थम्। ठान्तौ गत्यालस्यगतिप्रतिघातेषु च द्रुमे। आलस्यं मान्द्यम्। रुण्ठति लुण्ठति व्रजम्। क्रियासु,[3] पङ्गुश्च। रुटि दीप्तौ रुट प्रतिघाते द्वौ द्युतादौ। रुटेति रोषे णौ। भाषायां ग्रसादौ। रुठि गतौ, रुठ उपघाते, द्वावग्रे। रुठ प्रतिघाते द्युतादौ। लुठि आलस्यादौ, लुठि गतौ, लुठ उपघाते त्रयोऽग्रे। लुठ संश्लेषणे कुटादौ। रोडृ अनादरे, रोडृ उन्मादे द्वावग्रे। रुड निमज्जने कुटादौ।

४० स्फुटिर् विशरणे। स्फुट, स्फुटि स्फट इत्येके। स्फोटति, स्फुण्टति स्फुटति स्फटति घटः ★। स्फटिकम्। डान्ते स्फोडति, स्फुण्डति स्फडति।

४१ पठ व्यक्तायां वाचि। पठति वेदम्। डान्ते पडति।

४२ वठ स्थौल्ये। वठति धनी।

४३-४४ मठ कठ मदनिवासयोः। कठ कृच्छ्रजीवने चैके। मठति, कठति गजो, [4]गृहे च। कठति निःस्वः। अठ गतौ इत्यप्येके। अठति।

४५ रठ परिभाषणे। रठति बुधः।

४६ हठ प्लुतिशठत्वयोः, बलात्कारे इत्येके। हठत्यश्वो, वेश्या च। हठति रुक्मिणीं हरिः।

* 'डान्तमते तत्' के

1 'वादनम्' ग. घ. 2 'थैं। णौ।' घ. 3 'सु रिपूश्च रुटि' ग. घ.

4 'गृही' घ.

★ 'इरितो लुङि अस्फुटत् अस्फोटीत् अन्यस्याऽस्फोटीत्' के

CC-0. In Public Domain. Digitization by eGangotri

४७ रुठ लुठ उपघाते । उठ [1]इत्यप्येके★ । रोठति, लोठति, ओठति दैत्यान् । लुठ संश्लेषण इति शे । लुठ प्रतिघात इति द्युतादौ ।

४८ पिठ हिंसासंक्लेशनयोः । पेठति दुष्टम् ।

४९ शठ कैतवे च । शठति वणिक् दुष्टं वा । असंस्कारादौ णौ । श्लाघायां चितादौ । सम्यगवभाषणे कथादौ ।

५० शुठ गतिप्रतिघाते । शुठि इत्येके ।

५१ कुठि च । [2]अयं प्रतिघातमात्र एवेति माधवः । आलस्ये गतिप्रतिघाते चास्ति द्रुमे । शोठति शुण्ठति मार्गे । कुण्ठति शत्रुम् । कुण्ठति क्रियासु मार्गे वा । शुठ आलस्ये णौ । शुठि शोषण इत्यग्रे णौ च।

५२ लुठि आलस्ये प्रतिघाते च । लुण्ठति क्रियासु रिपून् वा ।

५३ शुठि शोषणे । शुण्ठति तरुः । शुण्ठिः ।

५४–५५ रुठि लुठि गतौ । रुण्ठति लुण्ठति ।

५६ चुडु भाव[3]करणे । अभिप्रायाविष्करणं तत् । चुडुति स्त्री ।

५७ अडु अभियोगे । अडुति विद्यासु ।

५८ कडु कार्कश्ये । कडुति मृत् । चुड्डादयस्त्रयो दोपधाः । डोपधाश्च द्रुमे ।

५९ क्रीडृ विहारे । क्रीडति हरिः ।

६० तुडृ तोडने । तूडृ इत्येके । तोडनमुक्तम् । तोडति तूडति वेणुं रिपुं च ।

६१–६२ हूडृ होडृ गतौ । हुडृ इत्यप्येके । हूडति होडति हुडितः ।

६३ [3]रौडृ अनादरे । [4]रौडति मूढम् ।

६४–६५ रोडृ लोडृ उन्मादे । रोडति लोडति विरही ।

६६ अड उद्यमे । अडति गन्तुम् ।

६७ लड विलासे । लडति कृष्णः । डलयोरभेदाल्ललति जिह्वोन्मथने लडिरिति घटादौ । लड उपसेवायाम्, ओलडि उत्क्षेपे इति द्वौ णौ । लण्ड[5] ग्रसादौ भाषार्थः । लल ईप्सायां चितादौ द्रुमे कथादौ च ।

★ 'ऊठ इत्यप्येक इति सिद्धान्तकौमुदी ।

1 'त्येके' घ. 2 'कुठिः' घ.

3, 4 'रो' घ. 5 'ण्डिर्ग्रं' घ.

CC-0. In Public Domain. Digitization by eGangotri

६८ **कड** मदे। **कडि** इत्येके। कडति कण्डति सुरापः। **गडि** वदनैकदेशे[1]। अयं माधवे नातिङ्विषयत्वसाम्याद् अति अदि इत्यादौ पठितः। परमतेन त्विह [2]पठितः।

शौटादय उदात्ता उदात्तेतः[3]। ३५८

१–४ **तिपृ तेपृ ष्टिपृ ष्टेपृ** क्षरणार्थाः। **ध्रिपृ धेपृ** इत्येके[4]। तेपृ कम्पने च। स्तुभान्ता अनुदात्तेतास्तिपृ[5]वर्जमुदात्ताः। तेपते धारा। द्रयोः। एवं स्तेपते, धेपते कम्पने-तेपते पल्लवः। तिपेरनिट्त्वात् तेप्ता। तिपि वेङ् द्रुमे। तेपिता। **स्तेप** क्षेप इति द्रुमणौ।

५ **ग्लेपृ** दैन्ये। ग्लेपते निस्स्वः।

६ **टुवेपृ** कम्पने। वेपते [6]पल्लवः। विपिनम्। **विप** क्षेपे द्रुमणौ।

७–९ **केपृ, गेपृ, ग्लेपृ** च। चात्कम्पने गतौ च ★। केपते, गेपते, ग्लेपते पल्लवो, व्रजं च।

१०–१२ **मेपृ, रेपृ, लेपृ** गतौ। **धेपृ** इति चैके। मेपते, रेपते लेपते, धेपते। **मेपृ रेपृ** सेचने। **लेपृ** प्लवगतौ। इत्येके। **रेपृ** शब्दे द्रुमे। मेपते भूमिं, रेपते भूमिम्, शुकश्च। लेपतेऽश्वः।

१३ **त्रपूष्** लज्जायाम्। त्रपते बाला[7]।

१४ **कपि** चलने। कम्पते। कपिः। **कपेति** सौत्रभागे च।

१५–१७ **रबि, लबि, अबि** शब्दे। रम्बते, लम्बते, अम्बते, हेरम्बः। **रबि** गतौ द्रुमश्रपि। **लबि** अवस्रंसने च। लम्बते माला। **लम्ब अम्ब** गता[8]वग्रे।

१८ **कबृ** वर्णे। स्तुतौ च द्रुमे। कबते पटः। नानावर्णो भवतीत्यर्थः। कबते हरिम्। **कम्ब** गतावग्रे।

१९ **क्लीबृ** अधार्ष्ट्ये। क्लीबते मूढः।

1 'शे। गण्डति। अयं' ख. 2 'पाठः' ग. 3 'तः अलतिस्त्वनुदात्तः' ग, अयतिस्त्वनुदात्तः घ. 4 'इत्यप्येके' घ. 5 'पि' ग.घ. 6 'देहः' ग. 7 'ला। घटादौ चायम्। कपि' घ.
8 'तावित्यग्रे' ग, 'तावित्यतङ्ग्यग्रे' घ.
★ 'सूत्रविभागात् गतावित्येतदुत्तरसूत्रादपकृष्यते' के.

CC-0. In Public Domain. Digitization by eGangotri

२० **क्षीबृ** मदे। क्षीबते शीधुपः।

२१–२२ **शीभृ** कत्थने, **चीभृ** च। शोभते, चीभते हरिम्। शीभरः।

२३ **रेभृ** शब्दे। **अभि रभी**त्यप्येके। रेभते, अम्भते, रम्भते। रभ राभस्ये इत्यनिडग्रे।

२४–२५ **ष्टभि, स्कभि** प्रतिबन्धे। स्तम्भते, स्कम्भते वा वाक्। केचित् ष्टम्भते, टष्टम्भे इत्याद्याहुः। द्वौ सौत्रौ च। आद्यो **द्रुम**शप्यनिट् च।

२६–२७ **जभ जृभि** गात्रविनामे। आद्य ईदिदित्येके। आद्ययोः 'रधिजभोरचि' (७-१-६१) इति नुम्। जम्भते, जृम्भते वा सुप्तोत्थितः। जम्भजृभि इति **द्रुम**भागशपि[1]। जम्भ वध इति च। जभ वध इति तत्र श्यनि। जभि नाशने णौ।

२८ **शल्भ** कत्थने। शल्भते हरिम्।

२९ **वल्भ** भोजने। वल्भतेऽन्नम्।

३० **गल्भ** धार्ष्ट्ये। गल्भते पटुः।

श्रन्भु पाके, स्रन्भु इत्यन्ये। स्रन्सु [2]इत्येके। श्रम्भते तण्डुलान्। एवं स्रम्भते।

३१ **ष्टुभ** स्तम्भे, स्तोभते भीत्या। अयं व्यापारे प्रसिद्धः। स्तोभते पाके। सौत्रश्चायम्।

तिप्याद्योऽनुदात्तेतस्तिपूवर्जमुदात्ताः ॥ ३९० ॥

१ **गुपू** रक्षणे। शुम्भान्ता। उदात्ता उदात्तेतः। गोपायति विश्वम्। गोपनार्थेऽग्रे **द्रुम**शपि च। व्याकुलत्वे पुषादौ। ग्रसादौ भाषार्थः।

२ **धूप** सन्तापे। धूपायति रिपुम्। ग्रसादौ भाषार्थः।

३–४ **जल्प जप** व्यक्तायां वाचि, जप मानसे च। जल्पति कथाम्। जपति कथाम् मन्त्रं च।

1 'शपि च। जभि वध' ग. घ. 2 'इत्येके'। स्रन्सु इत्यन्ये। श्रम्भते तण्डुलम्। एवं स्रम्भते। स्रंसते द्वौ द्युतादौ च। ष्टुभु स्तम्भे'। घ

CC-0. In Public Domain. Digitization by eGangotri

५ **चप** सान्त्वने। चपति राधाम्। परिकल्कनेऽयं णौ[1]। चपि गत्यां तत्रैव।

६ **षप** समवाये। **षच** इत्येके। समवायः सम्बन्धः सम्यगवबोधो वा। सपति कृष्णेन। सपति शास्त्रार्थम्। एवं सचति। [2]**सच** सम्बन्धे द्रुमशपि।

७–८ **रप लप** व्यक्तायां वाचि। रपति, लपति। रिपुः।

९ **चुप** मन्दायां गतौ। चोपति स्त्री।

१०–१७ **तुप तुम्प, त्रुप त्रुम्प तुफ, तुम्फ, त्रुफ, त्रुम्फ** हिंसार्थाः। तोपति। तुम्पति। त्रोपति। त्रुम्पति। तोफति। तुम्फति। त्रोफति। त्रुम्फति। अरेफाश्चत्वारः शे। आद्योऽर्दने णौ।

१८–३१ **पर्प, रफ, रफि, अर्ब, र्ब (प) र्ब, लर्ब, बर्ब, मर्ब, कर्ब, खर्ब, गर्ब** [3]**शर्ब, षर्ब, चर्ब** गतौ। अर्बादयो नोपधा इत्येके। रफरफी शर्बिश्च हिंसार्थाश्च द्रुमे। पर्पति। रफति। रम्फति। अर्बति, अम्बति। [4]र्ब(ब) र्बति [5]र(प)म्बति। लर्बति लम्बति। बर्बति, बम्बति। मर्बति, मम्बति। कर्बति, कम्बति। खर्बति, खम्बति, गर्बति, गम्बति। शर्बति, शम्बति। सर्बति सम्बति। चर्बति, चम्बति। सर्विर्दन्त्यादिर्द्रुमशपि। शन्ब, षन्ब सन्ब सम्बन्धे णौ। सन्ब गतौ द्रुमशपि। सन्ब सम्बन्धे द्रुमशपि णौ[6]।

३२ **कुबि** [7]आच्छादने। कुम्बति देहम्।

३३–३४ **लुबि, तुबि** अर्दने। लुम्बति, तुम्बति दैत्यान्।

३५ **चुबि** वक्त्रसंयोगे। चुम्बति मुखम्। कुम्बादयो णौ च।

३६–३७ **षृभु षृन्भु** हिंसार्थौ। सृभु सृन्भु इत्यषोपदेशावेके। **षिभु षिन्भु** इत्यन्ये। सर्भति, सृम्भति। सेभति, सिम्भति।

1 'णौ मित्। चपि' ग॰ घ. 2 'सप' ग. 3 'र्ब षर्ब' ग.
4 'पर्बति' ग. 5 'पम्बति' ग॰ घ. 6 'णौ। सन्ब गतौ द्रुमशपि सन्ब सम्बन्धे द्रुमणौ'। ग। 7 छा ग. घ

CC-0. In Public Domain. Digitization by eGangotri

३८–३९ शुभ शुन्भ भाषणे हिंसायां च। भासन इत्येके। पुन्भ इत्यन्ये। शोभति शुभति[1] कथां दैत्य[2], मणिश्च। आद्यौ शोभार्थौ शे। शुभिर्द्युतादौ च। अन्त्यो दन्त्यादिर्द्रुमशपि। मूर्धन्यादिर्द्रुम शे।

गुपादय उदात्ता उदात्तेतः ॥ ४२९ ॥

१–३ **घिणि, घुणि, घृणि,** ग्रहणे। कम्यन्ता उदात्ता अनुदात्तेतः। नुमि [3]ष्टुत्वम्, घिण्णते घुण्णते, घृण्णतेऽसिम्। घृणु [4]दीपने तनादौ।

४–५ **घुण घूर्ण** भ्रमणे। घोणते,घूर्णते मत्तः। एतावतङि शे।

६ **पण** व्यवहारे स्तुतौ च। पणते वणिक्। स्तुतौ त्वाये कृतेऽनुदात्तेत्त्वस्यान्यत्रोपक्षीणत्वादायान्तस्य तङ् न। पणायति हरिम्।

७ **पन** च। अयं स्तुतावेव। पनायति।

८ **भान** क्रोधे। कृष्णाय भामते कंस[5]ः। भामिनी। कथादौ चाऽयम्।

९ **क्षमूष्** सहने। क्षमतेऽपराधम्। अयं श्यन्यपित्।

१० **कनु** कान्तौ। कान्तिरिच्छा[6]। कामयते मुक्तिम्।

घिण्यादय उदात्ता अनुदात्तेतः ॥ ४३९ ॥

१–१० **अण, रण, वण, भण, मण, कण, क्वण, व्रण, भ्रण, ध्वण** शब्दार्थाः। धण इत्यप्येके। क्रम्यन्ता उदात्ता उदात्तेतः। अणति, रणति, वणति, भणति, मणति कणति। **कणिरार्तस्वरे द्रुमे।** कणति व्रणो। क्वणति, व्रणति, भ्रणति, ध्वणति, धणति[7]। अण प्राणने श्यनि। कणिरणी गत्यर्थौ घटादौ। **कणिर्निमीलने णौ।** व्रणिर्गात्र[8]विचूर्णने कथादौ।

११ **ओणृ** अपनयने। ओणति दोषम्।

१२ **शोणृ** वर्णगत्योः। शोणति पटोऽश्वश्च।

1 'ति सुम्भति कथां' ग. 2 'त्वमग्लिश्च' ग. घ. 3 'ष्टुः'। घ. 4 'दीप्तौ' ग. 5 'सः। कथा' ग. घ. 6 'च्छा। णिङि काम'घ. 7 ति वटुः। अण' ग. घ. 8 'त्रचूर्ण' घ।

CC-0. In Public Domain. Digitization by eGangotri

१३–१४ **श्रोणृ** सङ्घाते, श्लोणृ च। श्रोणति, श्लोणति जनः।

१५ **प्रैणृ** गतिप्रेरणश्लेषणेषु। **प्लैणृ** इत्येके। प्रैणति, प्लैणति व्रजं भृत्यं हरिणा च।

१६ ध्रन शब्दे। 'रषाभ्याम्' (८–४–१) इति णः। बण इत्यप्येके। ध्रणति, बणति वाणः।

१७ **कन** दीप्तिकान्तिगतिषु। कनत्यग्निः [1]श्रियं, व्रजं, च। ईदिद् **द्रुमे**। कान्तः। कन्या। कनकम्।

१८–१९ **ष्टन वन** शब्दे। स्तनति, वनति घनः। द्रुमघटादौ द्वावपि। स्तनिरषोपदेशः कथादौ।

२० **वन षण** सम्भक्तौ। सम्भक्तिः सेवेति **बोप्पदेवः**। वनति, सनति, हरिम्। आद्यः क्रियासामान्यार्थो घटादौ। याचने तनादौ। श्रद्धाद्यार्थो **द्रुमयुजादौ**। षणु दाने तनादौ।

२१ **अम** गत्यादिषु। आद्युक्तेः शब्दसम्भक्त्योः। रोगेऽप्यस्ति। अमति व्रजम् वटुः, हरिम्, व्रणी च। अमित्रः, अम रोगे णौ।

२२–२४ **द्रम, हम्म, मीमृ**, गतौ। मीमिः शब्देऽपीत्येके। द्रमति, हम्मति, मीमति।

२५–२८ **चमु, छमु, जमु, झमु** अदने। **जिम** इति चैके। चमति छमति जमति झमति जेमति वान्नम्। चमिः श्नौ च।

२९ **क्रमु** पदविक्षेपे। कामति मार्गे।

[2]अण्यादय उदात्ताउदात्तेतः ॥ ४६८ ॥

१–७ **अय, वय, पय, मय, चय, तय, णय** गतौ। **षय** इत्यप्येके। तय णय रक्षणे च इत्यन्ये। परे वान्ता उदात्ता अनुदात्तेतः। अयते, वयते, पयते, मयते, चयते, तयते, नयते, सयते। आद्यः स्वरितेद् **द्रुम** शपि। अन्त्यो दन्त्यादिश्च तत्रैव। **चायृ** पूजानिशामनयोर्हिक्कादौ। तायृ सन्तानपालनयोरग्रे[3]ऽत्रैव।

1 'मुक्ति' घ 2 'अणादय' घ 'ग्रे। घ

CC-0. In Public Domain. Digitization by eGangotri

८ **दय** दानगतिरक्षणहिंसादानेषु। दयते मुक्तिं, व्रजं, भक्तं दुष्टं दुग्धं च हरिः। दायृ दात इति स्वरितेद् **द्रुम** शपि।

९ **रय** गतौ। रयते।

१० **ऊयी** तन्तुसन्ताने। ऊयते पटम्।

११ **पूयी** विशरणे दुर्गन्धे च पूयते घट आरनालश्च।

१२ **क्नूयी** शब्दे उन्दे च। दुर्गन्धे च **द्रुमे**। उन्दः क्लेदः। क्नूयते पत्रं वस्त्रं च वृष्ट्या।

१३ **क्ष्मायी** विधूनने। क्ष्मायते लतां वातः। क्ष्मायी कम्पने इत्युक्त्वाकर्मकमाह **भट्टिः**। चक्ष्माये मही।

१४–१५ **स्फायी, ओप्यायी** वृद्धौ। स्फायते प्यायते श्रीः। अन्त्यं सकर्म[1]कमाह **भट्टिः**। आप्यायते रविः पद्मम्।

१६ **तायृ** सन्तानपालनयोः। सन्तानः प्रबन्धः। तायते सार्थः। त्रायते विश्वम्।

१७ **शल** चलनसंवरणयोः। शलते पल्लवो देहं च।

१८–१९ **वल वल्ल** संवरणे सञ्चरणे च। अन्त्यः प्रीतो चेति **स्वामी**। वलते, वल्लते देहं, व्रजे, हरिश्च। अनुदात्तेता तङोऽनित्यत्वाद् वलति। वलिः। वल्लभः।

२०–२१ **मल मल्ल** धारणे। मलते, मल्लते वेणुम्। माला। माल्यम्। मलयः। मल्ली।

२२–२३ **भल भल्ल** परिभाषणहिंसादानेषु। निरूपणे च **द्रुमे**। भलते भल्लते विद्वान् दैत्यं मुक्ति शास्त्रार्थं च। आद्य आभण्डने चितादौ। भल्लूकः, भल्लः।

२४ कल शब्दसंख्यानयोः। कलते, कलभः। कलते पणान्। क्षेपे णौ। गत्यादौ कथादौ। काल उपदेश इति च।

२५ **कल्ल** अव्यक्ते शब्दे। कल्लते। कल्लोलः।

२६–२७ **तेवृ देवृ** देवने। देवनं क्रीडादि। तेवते देवते हरिः। दिवि प्रीणनेऽग्रे। दिवृ क्रीडादौ श्यनि। परिकूजने चितादौ। मर्दने णौ।

1 'कमप्याह' घ

CC-0. In Public Domain. Digitization by eGangotri

२८–३३ **षेवृ, गेवृ, ग्लेवृ, पेवृ, मेवृ, म्लेवृ,** सेवने। **खेवृ प्लेवृ** ईत्यप्येके। **एवृ, शेवृ, केवृ** इत्यप्यन्ये। सेवते, गेवते, ग्लेवते, पेवते, मेवते, म्लेवते, खेवते, प्लेवते, एवते शेवते, केवते। आद्या मूर्धन्यादिर्दन्त्या दश्च द्रुमशपि स्वरितेत्। षिवि सेवन इत्यग्रे। षिवु तन्तुसन्ताने। श्यनि।

३४ **रेवृ** प्लवगतौ। सा च प्लुतगतिः। प्लुतौ गतौ च द्रुमे। रेवतेऽश्वः, कपि, व्रजं च। **पव** इति चैके। पवतेऽश्वः।

अत्रादय उदात्ता अनुदात्तेतः ॥ ५०२ ॥

१ **मव्य** बन्धने। अत्रान्ता उदात्ता उदात्तेतः। मव्यति गाम्।

२-४ **षूर्क्ष्य, ईर्क्ष्य, ईर्ष्य** ईर्ष्यार्थाः। सूर्क्ष्यति, ईर्क्ष्यति, ईर्ष्यति वा हरये चैद्यः। आद्यो दन्त्यादिश्च द्रुमशपि।

५ **हय** गतौ। भक्ति शब्दयोरित्येके। हयति व्रजम् हरिणा मानी च।

६ **शुच्य** अभिषवे। स च निष्पीडनस्नापनसुरासन्धानस्नाना[1] नि शुच्यति सोममातुरं सुरां[2] नद्यां च।

७ **हर्य** गतिकान्त्योः। हर्यति मुक्तिम्।

८ **अल** भूषणपर्याप्तिवारणेषु। अलति व[3]स्त्रम्। अलत्योदनो भोक्तुम्। अलति रिपून्। स्वरितेदित्येके। अलति, अलते।

९ **ञिफला** विशरणे। तच्च विशीर्ण[4]ता विकसनं च। फलति घटः। कोरकश्च। प्रफुल्लम्। फल निष्पत्तावग्रे। फल गतौ द्रुमज्वलादौ

१०–१३ **मील, श्मील, स्मील, क्ष्मील,** निमेषणे। सङ्कोचनं तत्। मीलति, श्मीलती स्मीलती, क्ष्मीलति दृष्टिः। मील श्लेषण इत्युदात्तेत् स्वरितेच्च शे।

१४ **पील** प्रतिष्टम्भे। रोधनं तत्। पीलति शत्रुम्।

1 'नादिः'। ग. घ. 2 'रां च। शुच्यति नद्याम् घ. 3 वधूम् ग.घ.
4 'र्णत्वं विक' घ.

CC-0. In Public Domain. Digitization by eGangotri

१५ **णील** वर्णे। नीलति पटः। [1]णील गर्हणे शे।

१६ **शील** समाधौ। समाधिर्निष्ठया करणम्। हरिसेवां शीलति। उपधारणे कथादौ। शिल उञ्छे शे। शेलृ गतावग्रे।

१७ **कील** बन्धने। कीलति गाम्। कील[2]:। किल श्वैत्यादौ शे। केलु चलनेऽग्रे।

१८ **कूल** आवरणे। कूलति प्रवाहम्। रुणद्धीत्यर्थः। कूलम्। कुल संस्त्याने ज्वलादौ।

१९ **शूल** रुजायां संघाते च। शूलति शत्रु जनश्च। शूलम्।

२० **तूल** निष्कर्षे। निष्कोषणं तत्, तूलति दाडिमम्। तुल उन्माने णौ।

२१ **पूल** सङ्घाते। पूलति शालिम्। णौ चाऽयम्। पुल महत्वे ज्वलादौ[3]।

२२ **मूल** प्रतिष्ठायाम्। मूलति गृहे। प्रतितिष्ठतीत्यर्थः। रोहणे णौ।

२३ **फल** निष्पत्तौ। फलति कामः। कामान् फलतीत्यादौ सकर्मकः।

२४ **चुल्ल** भावकरणे। चुल्लति स्त्री।

२५ **फुल्ल** विकसने। फुल्लति कोर[4]कम्।

२६ **चिल्ल** शैथिल्ये भावकरणे च। चिल्लति केशः स्त्री च।

तिल गतौ इत्येके। तिल्ल इत्यन्ये। तेलति, लिल्लति। तिल स्नेहने शे णौ च।

२७–३२ **वेलृ, चेलृ, केलृ, खेलृ, क्ष्वेलृ, वेल्ल** चलने। आद्यान्त्यवर्जं चत्वारो गत्यर्थाश्च **द्रुमे**। वेलति, चेलति, केलति' खेलति, क्ष्वेलति वेल्लति पल्लवः। वेल कालोपदेशे कथादौ। विल संवरणे शे। क्षेपे णौ। चिल वसने, किल श्वैत्यादौ[5] शे।

1 'णिल' घ. 2 'लः। कूल' ग. 3 'दौ णौ च'। घ. 4 'कः'। घ.
5 'दौ द्वौ शे' घ.

CC-0. In Public Domain. Digitization by eGangotri

३३–३४ **पेलृ, फेलृ, शेलृ** गतौ। षेलृ इति चैके। द्वितीयवर्जं त्रयश्चलने द्रुमे। पेलति फेलति शेलति सेलति। षिल उञ्छे शे।

३६ **स्खल** सञ्चलने। सञ्चये च द्रुमे। प्रतिघातेऽप्यस्ति। स्खलति धर्मात्, व्रीहीन्, मार्गे वा।

३७ **खल** सञ्चये। चलने च द्रुमे। खलति, खलः, पापसञ्चयनात्।

३८ **गल** अदने। स्रावणे च द्रुमे। गलति पिण्डं, धारां च*।

३९ **षल** गतौ। सलति। सलिलम्। दन्त्यादिर्द्रुमेऽपि।

४० **दल** विदारणे। दलति घट[1]:। **सादने** चाऽयम्।

४१-४२ **श्वल श्वल्ल** आशुगमने। श्वलति श्वल्लत्यश्वः।

४३-४४ **खोलृ खोरृ** गतिप्रतीघाते। खोलति खोरति खञ्जः। खुर च्छेदनादौ शे।

४५ **धोरृ** गतिचातुर्ये। धोरत्यश्वः। चतुरं गच्छतीत्यर्थः।

४६ **त्सर** च्छद्मगतौ। त्सरति व्याधः।

४७ **क्मर** हूर्च्छने। कौटिल्यं तत्। क्मरति मतिः।

४८-५१ **अभ्र वभ्र मभ्र चर** गत्यर्थाः। अभ्रति वभ्रति मभ्रति व्रजम्। चारर्भक्षणेऽपि। आचारे च द्रुमे। गतौ पादविक्षेपार्थत्वादकर्मकत्वम्। चरति मार्गे। चरत्यन्नम्, धर्मं वा। अथ सशये णौ।

५२ **ष्ठिवु** निरसने। आस्यान्निस्सारणं तत्। सुब्धातुष्ठिवु-(वा) इत्यसत्त्वम्। ष्ठीवति जलम्। कर्माविवक्षायां ष्ठीवत्ययम्। अस्य द्वितीयस्थकारष्ठकारो वा। तेन द्वित्वे तिष्ठेव टिष्ठेव इति स्यात्। श्यन्यप्ययम्।

५३ **जि** जये। जय उत्कर्षप्राप्तिः। जयति कृष्णः। अभिभवेऽग्र। **जीव** प्राणधारणे। जीवति जन्तुः।

* स्रवणार्थकोऽकर्मकोऽपि प्रसिद्धः। गलति धारा। के

1 'टः। प्रसादौ चाऽयम्' ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

५४-५७ **पीव, मीव, तीव, णीव** स्थौल्ये। पीवति मीवति तीवति नीवति धनी।

५८ **क्षीवु** निरसने। अनुदिद्द्रुमे। क्षेवृ इत्येके। क्षीवति क्षेवति दोषम्। क्षीवृ मदे; क्षिवु निरसने द्वौ द्रुमशपि। द्वितीयस्त-च्श्यनि च।

५९-६३ **उर्वी, तुर्वी, थुर्वी, दुर्वी, धुर्वी,** हिंसार्थाः। ऊर्वति, तूर्वति, थूर्वति, दूर्वति, धूर्वति।

६४ **गुर्वी** उद्यमने। गूर्वति गन्तुम्।

६५ **मुर्वी** बन्धने। मूर्वति गाम्।

६६-६९ **पुर्व, पर्व, फर्व, मर्व,** पूरणे। अन्त्यो गतौ च द्रुमे। पूर्वति, पर्वति, फर्वति, मर्वति घटम्। पुर्व पूर्वनिकेतने, मर्व शब्दे द्वौ णौ च।

७० **चर्व** अदने। चर्वत्यन्नम्।

७१ **भर्व** हिंसायाम्। ईदिदित्येके। भर्वति।

७२-७४ **कर्व, खर्व, गर्व** दर्पे। आद्य ईदिदित्येके। कर्वति खर्वति गर्वति शूरः। अन्त्यः कथादौ च।

७५-७७ **अर्व, शर्व, षर्व** हिंसायाम्। अर्वति शर्वति सर्वति।

७८ **इवि** व्याप्तौ। प्रीणने चैके। इन्वति विश्वं हरिः। इन्वति (भक्तान्) हरिः।

७९-८१ **पिवि, मिवि, णिवि** सेचने। सवन इत्येके। णिविस्थाने पिवि इत्यन्ये। पिन्वति, मिन्वति, निन्वति सिन्वति क्षितिं हरिं च।

८२-८५ **हिवि, दिवि, धिवि, जिवि** प्रीणनार्थाः। हिन्वति, दिन्वति, 'धिन्विकृण्व्योः-' (३-१-८०) इत्युः। अयं गतौ च द्रुमे। धिनोति। जिन्वति।

८६-८८ **रिवि, रवि, धवि** गत्यर्थाः। रिण्वति रण्वति धन्वति।

८९ **कृवि** हिंसाकरणयोश्च। चाद् गतौ। धिन्विवत्। कृणोति शत्रुं, घटं व्रजं च।

९० **मव** बन्धने। मवति गाम्।

CC-0. In Public Domain. Digitization by eGangotri

९१ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यसामर्थ्ययाचनक्रियेच्छादीप्त्यवादयालिङ्गनहिंसा[1]दहनभाववृद्धिषु। सकर्मकाकर्मकविभागेनोदाहृतिः।

गाश्चारण्यमुपाश्रितांश्च सकलं गोपीगृहं तद्वचो
गव्यं नर्म भरक्षयं मुनिनुतिं लक्ष्मीं खलान् कल्मषम्।
[2]कारुण्येन पयोरसेन जगतां दैत्यार्दने तेजसा
सत्यानन्दतया व्रजेऽप्यवति यस्तस्मै नमः शौरये॥

सर्वत्रावतीति योज्यम्। गां रक्षति। अरण्यं गच्छति। उपाश्रितान् प्रीणाति। सकलमवगच्छति। गोपीगृहं प्रविशति। तद्वचः शृणोति। गव्यं याचते। नर्म करोति। भरक्षयमिच्छति। मुनिनुतिमवाप्नोति। लक्ष्मीमालिङ्गति। खलान् निहन्ति। कल्मषं दहति। इति सकर्मकार्थेषु। दानभाववृद्धिष्विति पाठे कल्मषमित्यत्र मङ्गलमिति पठित्वा मङ्गलं ददातीति व्याख्येयम्। कान्तिः काम्यता। [3]कारुण्येन काम्यो भवति। पयोरसेन नृत्यति। जगतां स्वामी दैत्यार्दने समर्थो भवति। तेजसा दीप्यते। सत्यानन्दतया भवति। व्रजे वर्धते। इत्यकर्मकार्थेषु॥

मव्यादय उदात्तेतः, उदात्ता जयतिवर्जम्॥ ५९३॥

५९४ **धावु** गतिशुद्ध्योः। जवे च द्रुमे। उदात्तः स्वरितेत्। तेनोभयपदी। शुद्धिः शोधना। धावति, धावते व्रजं पटमश्वश्च।

१–२ **धुक्ष, धिक्ष** सन्दीपनक्लेशनजीवनेषु। घसान्ता उदात्ता अनुदात्तेतः। धुक्षते धिक्षतेऽग्निं रिपुं नरश्च।

६ **वृक्ष** वरणे। वृक्षतेऽर्कम्। वृक्षः।

४ **शिक्ष** विद्योपादाने। शिक्षते शास्त्रम्। कर्माविवक्षया शिक्षते शास्त्रे।

५ **भिक्ष** याच्ञायामलाभे लाभे च। भिक्षते धनम्। याचते, न लभते, लभते इति च तयोऽर्थः। क्लेशे व्यक्तायां वाचि च [4]इत्येके। भिक्षते रिपुम्, शिष्यं च। क्लेशेऽकर्मकश्चेत् भिक्षते निःस्वः।

1 'नदानभाव' ग. 2 'ता' घ. 3 'ता' घ
4 'इत्यप्येके'। ग. ब

CC-0. In Public Domain. Digitization by eGangotri

६ **क्लेश** व्यक्तायां वाचि। बाधन इत्येके। उपतापे च **द्रुमे**। क्लेशते शिष्यं रिपुं, रोगी च। क्लिश उपतापे श्यनि। द्रुमश्यन्युदित् स्वरितेच्च। क्लिशू विबाधने श्नि।

७ **दक्ष** वृद्धौ शीघ्रार्थे च। दक्षते श्रीः पटुर्वा। पटुस्त्वरत इत्यर्थः। दक्षः। दक्षिणः। गतिहिंसयोर्घटादौ।

८ **दीक्ष** मौण्ड्येज्योपनयननियमव्रतादेशेषु।

अस्यार्थो व्रतसम्प्राप्तिस्तद्भेदाः कथिता इमे।
सा च मौण्ड्यात् क्वचित् क्वापि दीक्षणीयादिकेज्यया॥
उपनीत्या क्वचित् क्वापि नियमग्रहमात्रतः।
क्वचिद् गुर्वादिनेदं ते व्रतमस्त्विति शासनात्॥
क्रमेण दीक्षते [1]वाग्मी (?) यजमानश्च माणवः[2]।
तपसे च महानाम्न्यै तत्र ह्यादे[3]शनाद् व्रतम्॥

९ **ईक्ष** दर्शने। ईक्षते हरिम्।

१० **ईष** गतिहिंसादर्शनेषु। ईषते। उञ्छार्थोऽतङ्यग्रे। इषेति गतौ श्यने। इच्छायां शे। आभीक्ष्ण्ये श्नि। एषृ गतावत्रैव।

११ **भाष** व्यक्तायां वाचि। भाषते वाचम्। भष भर्त्सनेऽग्रे।

१२ **वर्ष** स्नेहने। स्निग्धीभावस्तत्। वर्षते देहः। वृषु सेचनेऽग्रे। वृष शक्तिसंबन्धने चितादौ।

१३ **गेषृ** अन्विच्छायाम्। **ग्लेषृ** इति चैके। गेषते, ग्लेषते हरिं गोपी।

१४ **येषृ** प्रयत्ने। येषते विद्यायाम्।

१५–१८ **जेषृ, णेषृ, एषृ, प्रेषृ** गतौ। जेषते, नेषते, एषते, प्रेषते। जिषु सेचनेऽतङ्यग्रे।

१९–२० **रेषृ हेषृ** अव्यक्ते शब्दे। तत्र रेषिर्वृकशब्दे। हेषिरश्वशब्दे। ह्रेषृ इति चाश्वशब्दे पाठ्यम्। रेषते वृकः। हेषते, ह्रेषतेऽश्वः। रिष हिंसायामित्यग्रे पुषादौ च।

1 'वामी' घ   2 'वम्' ग   3 'शनं व्रतम्' ग

CC-0. In Public Domain. Digitization by eGangotri

२१ **कासृ** शब्दकुत्सायाम्। रोगजे कुत्सितशब्देऽयं प्रसिद्धः। कासते रोगी। **भट्टिस्तु** "रावणः कासाञ्चक्रे" कुत्सितमुक्तवा-नित्याह। "कासाञ्चक्रे पुरी सौधैः" इति शोभार्थमप्याह। दुःशब्दवत्त्वात् कासरः। कस गतौ ज्वलादौ। कस कसि गत्यादौ लुकि।

२२ **भासृ** दीप्तौ। भासते। भस भर्त्सनदीप्त्योः श्लौ।

२३–२४ **णासृ रासृ** शब्दे। नासते। रासते। नासा। रासभः। रस शब्देऽग्रे। रस आस्वादने कथादौ।

२५ **णस** कौटिल्ये। नसते लता।

२६ **भ्यस** भये। भ्यसते व्याघ्रात्।

२७ **आङःशसि** इच्छायाम्। आङ:पर एवायम्। आशंसते श्रियम्। नोपधोऽयमित्येके। तेषां किति आशस्यते। शन्सु स्तुतौ, शासु हिंसायाम्, द्वावतङ्यग्रे। आङः शास इच्छायाम्, शासु अनुशिष्टौ द्वौ लुकि।

२८–२९ **ग्रसु ग्लसु** अदने। ग्रसते, ग्लसते पिण्डम्। द्रुम-युजादौ चाद्यः। ग्रहणार्थश्चास्वदीयः।

३० **ईह** चेष्टायाम्[1]। ईहते हरिः। समीहते मुक्तिम्।

३१–३२ **बहि, महि,** वृद्धौ। बंहते मंहते श्रीः। मंहिर्ग्रसादौ। मह पूजायामग्रे कथादौ च। माहृ माने हिक्कादौ।

३३ **अहि** गतौ। अंहते। ग्रसादौ चायम्। अहृ व्याप्तौ श्नौ।

३४–३५ **गर्ह गल्ह** कुत्सायाम्। गर्हते, गल्हते कंसम्। आद्यो युजादौ च। गृहू ग्रहणेऽग्रे अनूदित् कथादौ च। ग्रहेति श्नि।

३६–३७ **बर्ह बल्ह** प्राधान्ये। बर्हते, बल्हते हरिः। सर्वे-ष्वङ्गेषु प्रधानत्वाद् [2]बर्हम्। द्वौ ग्रसादौ च। बर्ह हिंसायां णौ। बृह बृहि वृद्धावग्रे। बृंहिर्ग्रसादौ च।

३८–३९ **वर्ह, वल्ह** परिभाषणहिंसाच्छादनेषु। दाने च द्रुमे। परिभाषणमत्र वञ्चनवादः। वर्हते वल्हते वा शठं रिपुं देहं मुक्तिं च। वृहू उद्यमे शे।

४० **प्लीह** गतौ। प्लीहते।

1 'याम्। इच्छार्थेऽपि दृष्टः। ईह' घ 2 'बर्हः' घ

CC-0. In Public Domain. Digitization by eGangotri

४१-४३ **वेहृ जेहृ बाहृ** प्रयत्ने। बेहृ इत्येके। जेहिर्गतौ च। वेहते, जेहते, बाहते बेहते, वा। अचि[1] बाहा।

४४ **द्राहृ** निद्राक्षये। क्षेप इत्येके। द्राहते रोगी रिपुं च। जागर्ति क्षिपतीति चार्थः।

४५ **काशृ** दीप्तौ। काशतेऽग्निः। श्यनि चायम्। कश गत्यादौ लुकि।

४६ **ऊहृ** वितर्के। ऊहते युक्तिम्। उहिर् अर्दनेऽग्रे।

४७ **गाहू** विलोडने। क्षोभणं तत्। तेन जलाद्यवतरणं लक्ष्यते। गाहते नदीम्।

४८ **गृहू** ग्रहणे। ग्लहू इति चैके। गर्हते, ग्लहते वार्थम्।

४९ **घुषि** कान्तिकरणे। घषि इत्येके। घस इत्यन्ये। घंषते, घंसते घसते देहम्। घस्लृ अदने, घुषिर् आविशब्दनार्थ इत्यग्रे, विशब्दानार्थ इति णौ।

घुक्षादय उदात्ता अनुदात्तेतः ॥३४३॥

१ **धुषिर्** अविशब्दनार्थः। ऋदिदित्येके। अर्हान्ता उदात्तेतः, [2]शिषिविषि (घृषी) वर्जमुदात्ताश्च। आविष्कृताभिप्रायं वचनं विशब्दनम्। तद्व्यतिरिक्तेऽर्थेऽयं धातुः। स चार्थः शब्दमात्रं वा, यथाप्रयोगमन्यो वा। शब्दे-घोषति घण्टा। एवमन्य ऊह्यः। 'घुषिर् विशब्दने' इत्येवैके। अयं णौ च।

२ **अक्षू** व्याप्तौ। संघाते च द्रुमे। 'अक्षोऽन्यतरस्याम्' (३-१-७५) इति श्नुः। अक्षति। अक्ष्णोति विश्वं हरिः।

३-४ **तक्षू त्वक्षू** तनूकरणे। 'तनूकरणे तक्षः' (३-१-७३) इति श्नुः। तक्ष्णोति वृक्षम्। त्वक्षति। तनूकरणादन्यत्र तक्षति वाग्भिः। तर्जतीत्यर्थः। तक्ष त्वचनेऽग्रे।

५ **उक्ष** सेचने। उक्षति भूमिम्।

६ **रक्ष** पालने। रक्षति लोकान्।

७ **णिक्ष** चुम्बने। निक्षति मुखम्।

८-१० **तृक्ष, [3]ष्टृ (ष्टृ) क्ष, णक्ष** गतौ। तृक्षति, [4]सृ (स्तृ) क्षति। नक्षति। नक्षत्रम्।

1 'चि टापि' घ 2 'शिषिवर्ज' ग, 'शिषिविषिवर्ज' घ

3 'ष्टुक्ष णक्ष' ग 4 'स्तृक्षति' ग

CC-0. In Public Domain. Digitization by eGangotri

११ **वक्ष** रोषे। सङ्घात इत्येके। वक्षति शूरो व्रीहिश्च।

१२ **मृक्ष** सङ्घाते। **मक्ष** इत्येके। मृक्षति। मक्षति। मक्षिका। [1]म्र(मृ)क्ष च्छेदने णौ।

१३ **तक्ष** त्वचने। तच्च संवरणं त्वचो ग्रहणं वा। ग्रहणमात्रे च **द्रुमे। पक्ष** इत्यप्येके। तक्षति दोषम्। तक्षति व्रणः। त्वचं गृह्णाती-त्यर्थः। तक्षत्यर्थम्। एवं पक्षति। पक्ष परिग्रहे णौ।

१४ **षूर्क्ष** आदरे। सूर्क्षति बुधम्।

१५–१७ **काक्षि, वाक्षि, माक्षि** काङ्क्षायाम्। काङ्क्षति, वाङ्क्षति, माङ्क्षति मुक्तिम्।

१८-२० **द्राक्षि, ध्राक्षि, ध्वाक्षि** घोरवाशिते च। चात्का-ङ्क्षायाम्। द्रङ्क्षति, ध्राङ्क्षति, ध्वाङ्क्षति कालः।

२१ **चूष** [2]पाने। चूषति सुधाम्।

२२ **तूष** तुष्टौ। तूषति हरिः। तुष प्रीतौ पुषादौ।

२३ **पूष** वृद्धौ। पूषति श्रीः। पुष पुष्टावग्रे श्यनि श्नि च। धारणे ग्रसादौ।

२४ **मूष** स्तेये। मूषत्यर्थम्। मुषेति श्नि। मुष खण्डने। पुषादौ।

२५ **लूष रूष** च रूषायाम्। इत्येके। रूषा लेपनम्। लूषति रूषति देहं चन्दनेन। रूष हिंसायां णौ। रुषेति हिंसार्थोऽग्रे। रोषे पुषादौ णौ च। **शूष** प्रसवे। स चानुज्ञा। शूषति राजा भृत्यम्। अनुजानातीत्यर्थः। "या लीढा श्रवसापि सौति महतीमौत्सुक्य-दुःखासिकाम्" इत्यत्र सौतेरुत्पादनार्थप्रयोगादुत्पादनमपि प्रसवः। शूषति विश्वं हरिः। शुष शोषणे पुषादौ।

२६–२७ **यूष** हिंसायाम्। **जूष** च। यूषति, जूषति। जुषेति प्रीत्यादौ शे। परितर्कणे युजादौ।

२८ **भूष** अलङ्कारे। भूषति वधूम्।

२९ **ऊष** रुजायाम्। ऊषति रिपुम्। उष दाहेऽग्रे।

1 'मृक्ष म्लेच्छने णौ' ग-घ. 2 'दाने' ग

CC-0. In Public Domain. Digitization by eGangotri

३० **ईष** उञ्छे। ईषति व्रीहीन्।

३१–४० **कष, खष, शिष, जष, झष, शष, वष, मष, रुष, रिष** हिंसार्थाः। कषति, खषति। शेषति शेष्टा। जषति। झषति। शषति। वषति। मषति। रोषति। अयं रोषेऽपि। रोषति हरये। रेषति-शिषिर्विशेषणे श्नमि। असर्वोपयोगे युजादौ। झष आदानसंवरणयो-रिति हिक्कादौ। रुषिरिषी श्यनि णौ च।

४१ **भष** [1]भर्त्सने। तच्चेह श्वरवः। पिशुनोक्तौ च द्रुमे। भषति श्वा। खलश्च।

४२ **उष** दाहे। ओषति तरुम्।

४३–४५ **जिषु, विषु, मिषु** सेवने। जेषति, वेषति, मेषति हरिम्। विषेरनिट्त्वाद् वष्टा[2]। विष्लृ व्याप्तौ श्नौ। विष विप्रयोगे श्नि। मिषिःस्पर्धार्थः शे।

४६ **पुष** पुष्टौ। पोषति श्रीः।

४७-५० **श्रिषु, श्लिषु, प्रुषु, प्लुषु** दाहे। श्रेषति, श्लेषति, प्रोषति, प्लोषति तरुम्। श्लिषिरालिङ्गने श्यनि। श्लेषणे णौ। प्रुषिप्लुषी स्नेहने श्नि। प्लुषिः पुषादौ च।

५१–५३ **पृषु, वृषु, मृषु** सेचने। आद्यो हिंसासंक्लेशनयोश्च। [3]वृषु प्रजनैश्वर्ययोः। मृषु सहने च। मृषु हिंसासंक्लेशदैन्येषु इत्येके। पर्षति, वर्षति क्षितिं शत्रुं, चोरं च। दैन्येऽकर्मकः। मर्षत्यपराधं, निःस्वश्च। सेचनादौ प्राग्वत्। मृष तितिक्षायाम् इति श्यनि युजादौ च। स्वरितेतौ।

५४ **घृषु** सङ्घर्षणे। घर्षति पादम्।

५५ **हृषु** अलीके[4]। (हर्षति कितवः।) तुष्टौ च द्रुमे। हर्षति भक्तः। पुषादौ चायम्।

५६-५९ **तुस, ह्रस, ह्लस, रस** शब्दे। ह्रसिरल्पीभावेऽपि। तोसति, ह्रसति, ह्लसति, रसति। अल्पीभावे-ह्रसति कालः।

1 'भर्त्सने' घ 2 'ष्टा। विषु प्रजनैश्वर्ययोः। विष्लृ ग
3 'श्च। मृषु' ग.घ 4 'के। हर्षति भक्तः। पुषा' ग, 'के। तुष्टौ' घ

CC-0. In Public Domain. Digitization by eGangotri

६० [1]**लस** श्लेषणक्रीडनयोः। लसन् रामेण लसति हरिः। प्रसिद्धश्चायं शोभायाम्। शिल्पयोगेऽयं णौ।

६१ **घस्लृ** अदने। घसत्योदनम्।

अस्य शब्विषये तावद् वलादौ चार्धधातुके।
लुङि च क्मरजादौ च प्रयोगो न तु सर्वतः* ॥

तेनाऽगोर्लिङ्कर्मणियगित्यादि न।

६२–६४ जर्ज, चर्च, झर्झ परिभाषणहिंसातर्जनेषु। जर्जति वाचं रिपुं च। रिपुं तर्जति हिनस्तीति चार्थः। चर्चति। झर्झति। एतौ शेऽपि। चर्चिरध्ययने णौ।

६५–६६ **विसृ, वेसृ** गतौ। विशृ, वेशृ इत्येके। वेसति, वेसति। वेशति, वेशति। विशिर्णौ च। भाषार्थौ ग्रसादौ। विश अवयवे मुचादौ।

६७ **हसे** हसने। हसति।

६८ **णिश** समाधौ। कल्याणे च द्रुमे। नेशति मुनिः।

६९–७० **मिश, मश** शब्दे रोषकृते च। शब्दकोपयोरिति द्रुमोक्त्या रोषकृतं रोष एव। मेशति, मशति भेरी हरश्च। मशकः।

७१ [2]**शव** गतौ। शवति।

७२ **शश** प्लुतगतौ। शशत्यश्वः। शशः।

७३ **शसु** हिंसायाम्, शसति।

७४ **शन्सु** स्तुतौ। हिंसायामप्येके। शंसति हरिम्। नॄन् हिनस्तीति नृशंसः।

७५ **चह** परिकल्कने। चहति। ज्ञपादौ कथादौ चायम्।

७६ **मह** पूजायाम्। महति हरिम्। कथादौ चायम्।

७७ **रह** त्यागे। रहति दोषम्। पृथग्भाव इत्यन्ये। विरहति राधा। ज्ञपादौ कथादौ चाऽयम्।

७८ **रहि** गतौ। रंहति। ग्रसादौ द्रुमकथादौ चाऽयम्।

1 'रस स्नेहनास्वादनयोः कथादौ लस श्लेषण' ग

* अत्र च मानं 'लिट्यन्यतरस्याम्' (२–४–४०) इत्यदेर्घस्लादेशविधानम्। स्पष्टं चेदं सिद्धान्तकौमुद्याम्। के

2 'वश गतौ। वशति शश' ग

CC-0. In Public Domain. Digitization by eGangotri

७९-८२ **दृह, दृहि, बृह, बृहि** वृद्धौ। बृहिर् इत्येके। दर्हति, दृंहति, बर्हति, बृंहति श्रीः। बृंहिः शब्दे च। स च गजशब्दः। बृंहति गजः।

८३-८५ **तुहिर्, दुहिर्, उहिर्** अर्दने। तोहति, दोहति, ओहति दुष्टम्। तुहिनम्। दुह प्रपूरणे लुकि।

८६ **अर्ह** पूजायाम्। योग्यार्थेऽपि। अर्हति कृष्णम्। अर्हति पूजां कृष्णः। णौ चाऽयम्।

घुषिरादय उदात्ता उदात्तेतः।।७२९।।

१ **द्युत** दीप्तौ। कृपूपर्यन्ता उदात्ता अनुदात्तेतः। द्योततेऽग्निः।

२ **श्विता** वर्णे। श्वेतते पटः।

३ **ञिमिदा** स्नेहने। मेदते देहः। पुषादौ णौ चाऽयम्। मिदृ मेदृ इति मेधाद्यर्थे हिक्कादौ।

४ **ञिष्विदा** स्नेहनमोचनयोः। मोहनयोरित्येके। **ञिक्ष्विदा** इत्यन्ये। स्वेदते देहो गां च। स्वेदते वटुं वाग्भिः। एवं क्ष्वेदते। द्वौ पुषादौ च। क्ष्विदिरव्यक्तशब्देऽग्रे। स्नेहनमोचनयोः श्यनि। स्विदिर्गात्रप्रक्षरणे तत्रैव।

५ **रुच** दीप्तावभिप्रीत्यां च। रोचतेऽग्निः। रोचते हरये पयः। रुक्मम्।

६ **घुट** परिवर्तने। घोटतेऽश्वः। घुटिका। घुट प्रतीघाते कुटादौ। इदिद् ग्रसादौ।

७-९ **रुट, लुट, लुठ** प्रतीघाते। **रुठ** इत्येके। रोटते, लोटते लोठते, रोठते रिपुम्। **लुट** दीप्तौ इत्येके। लुटि इत्यन्ये। लोटते, लुण्टते।

१० **शुभ** दीप्तौ। शोभते।

११ **क्षुभ** सञ्चलने। तच्च प्रकृतिविपर्यासो, मन्थनं वा। क्षोभते मतिः। क्षोभते सिन्धुम्।

१२-१३ **णभ, तुभ** हिंसायाम्। नभते, तोभते। नभिरभावार्थोऽपि। नभन्तां शत्रवः। अभावरूपत्वान्नभः। क्षुभादयः पुषादौ श्नि च।

CC-0. In Public Domain. Digitization by eGangotri

१४-१६ **स्रन्सु, ध्वन्सु, भ्रन्सु** अवस्रंसने। **भ्रन्शु** इत्येके। ध्वन्सु गतौ च। अयं नाशने प्रसिद्धः। स्रंसते, ध्वंसते, भ्रंसते, भ्रंशते काञ्ची। ध्वंसते व्रजं दैत्यं च। भ्रंशु अधःपतने पुषादौ। इदिद् ग्रसादौ च।

१७ **स्रन्भु** विश्वासे। विस्रम्भते बन्धौ। न त्वां विश्वसि–मीत्यादिवत् क्वचित् कर्मापि मृग्यम्।

१८ **वृतु** वर्तने। वर्तते कालः।

१९ **वृधु** वृद्धौ। वर्धते मोदः। द्वौ ग्रसादौ च। वृतु वरणे श्यनि। वर्ध छेदने णौ।

२० **शृधु** शब्दकुत्सायाम्। शर्धते खलः। कुत्सितशब्दं करो-तीत्यर्थः। शब्दकुत्सा पायुरव इत्येके। शर्धते रोगी। प्रसहने णौ। उन्दे हिक्कादौ।

२१ **स्यन्दू** प्रस्रवणे। स्यन्दतेऽम्भः।

२२ **कृपू** सामर्थ्ये। तच्च शक्तिर्योग्यता वा। घटाय कल्पते मृत्। तत्करणे शक्तं योग्यं वा भवतीत्यर्थः। हेतुमण्ण्यन्त-स्त्वयं निष्पादनभ्रान्तिज्ञानादौ दृश्यते। घटं कल्पयति। कृष्णं मनुजं कल्पयति। णौ चायम्। दौर्बल्ये कथादौ।

द्युतादय उदात्ता अनुदात्तेतः ॥ ७५१ ॥

वृत् ॥ द्युतादिर्वृत्त इत्यर्थः। सार्वकालिकत्वात् 'क्विप्चे'ति क्विप् ॥

१ घट चेष्टायाम्। जयाय घटते। क्वचित् सङ्गमादौ। कृष्णेन घटते। एतदादयः फणान्ता 'घटादयो मितः' (ग–सू) इति मितः। आदितस्त्वरान्तानां तु 'घटादयः षितः' (ग–सू) इति षित्त्वम् अनुदात्तेत्त्वं च। घटयतीति णिचि ह्रस्वो मित्त्वफलम्। घटेत्यङ् षित्त्वफलम्।

घटादिषु त्विहाऽपूर्वपठिताः सर्वदा मितः।
बहिष्ष्ठस्येह पाठे तु मित्त्वमुक्तेऽर्थ एव हि ॥

घटिः सङ्घाताद्यर्थो हिंसार्थश्च णौ। घटिर्घण्टिश्च भाषार्थो ग्रसादौ।

१ **व्यथ** भयचलनयोः दुःखचलनयोरित्येके। व्यथते व्याघ्रात्। व्यथते विरही, पल्लवो वा।

CC-0. In Public Domain. Digitization by eGangotri

३ **प्रथ** प्रख्याने। प्रथते कीर्तिः। प्रख्यायत इत्यर्थः। विस्तारेऽप्यस्ति। प्रथते पटः। पृथुः। पृथिवी। कथादौ चाऽयम्। प्रक्षेपाद्यर्थो णौ।

४ **प्रस** विस्तारे। प्रसते पटः।

५ **म्रद** मर्दने। म्रदते माषान्।

६ **स्खद** स्खदने। विदारणं तत्। स्खदते शिला। विदीर्यत इत्यर्थः।

७ क्षजि गतिदानयोः। क्षञ्जते। गुरुमतां णिचि चिण्णमुलोर्दीर्घविकल्पो मित्त्वफलम्। क्षञ्जयति। अक्षाञ्जि, अक्षञ्जि। क्षाञ्जं क्षाञ्जम्, क्षञ्जं क्षञ्जम्। **क्षज** इत्येके। क्षजते व्रजं, मुक्तिं च। क्षजि कृच्छ्रजीवने णौ।

८ **दक्ष** गतिहिंसनयोः। वृद्ध्याद्यर्थे प्रयुक्तोऽयमनयोरर्थयोर्मिदित्यर्थः। दक्षते। [1]क्षजिवन्मित्त्वफलम्।

९ **क्रप** कृपायां, गतौ। क्रपते दीनं, व्रजं च।

१०–१२ **कदि, क्रदि, क्लदि** वैक्लव्ये। वैकल्य इत्येके। त्रयोऽप्यनिदित इत्[illegible]ये। कन्दते, क्रन्दते, क्लन्दते मतिः, क्रिया वा। अनिदित्त्वे कदत इत्यादि।

१३ **ञित्वरा** सम्भ्रमे। त्वरते गन्तुम्। अस्य 'रुष्यमत्वर–' (७–२–२८) इति निष्ठायां वेट्त्वाद्यङ्लुकि तोतूर्ण इत्यनिट्त्वार्थमादित्त्वम्॥

घटादयः षित उदात्ता अनुदात्तेतश्च ॥ ७६४ ॥

१ **ज्वर** रोगे। फणान्ता उदात्ता उदात्तेतः। ज्वरति तनुः।

२ **गड** सेचने। तच्चात्र जलादेः पतनमात्रम्। तेनाकर्मकः। गडत्यम्भः।

३ **हेड** वेष्टने। हेडति लता। [2]णिचि मित्त्वाद् ह्रस्वे हिटयति।

४ **वट, भट** परिभाषणे। वटति, भटति। प्राक्पठितयोरनयोर्मित्त्वार्थोऽनुवादः। वटयति भटयति भृत्यं राजा। परिभाषयतीत्यर्थः। **श्वट** इत्येके। श्वटति। श्वटयति।

1 'क्षञ्जिवर्जं' ग 2 'णौ मि' घ

CC-0. In Public Domain. Digitization by eGangotri

३ णट नृत्तौ। पूर्वत्र नटव्यापारेऽयं धातुरुक्तः। अत्र तु नर्तकव्यापारश्चलनादिश्च नृत्तिः। तत्र मित्त्वम्। नटयति नर्तकं, पल्लवं च। णट गतावित्येके। नतावित्यन्ये। नटयति व्रजं राधाम्। नटयति शाखाम्। गमयति नमयतीतिचार्थः। नटव्यापारार्थस्य[1] (हिंसार्थस्य च) अमित्त्वान्नाटयतीति स्यात्।

७ ष्टक प्रतिघाते। स्तकति। दन्त्यादिर्द्रुमशपि।

८ चक तृप्तौ। प्रतिघात इत्येके। चकति भुञ्जानः शत्रुर्वा। णौ चकयति। मित्त्वं वेति **द्रुमे**। चाकयति।

९ कखे हसने। कखति। णौ कखयति। प्राक्पठितस्य काखयति। अस्य त्वेदित्त्वाद्धा वन्तरत्वम्।

१० रगे शङ्कायाम्। रगति दोषम्।

११ लगे सङ्गे। लगति पादे शिला।

१२–१५ ह्रगे, ह्लगे, षगे, ष्ठगे संवरणे तच्चात्र तिरोधानमेव। स्थगेर्ण्यन्तस्य तिरोधाना[2]र्थदर्शनात्। ह्रगति, ह्लगति, सगति, स्थगति हरिर्वने। अन्त्यौ दन्त्यादी द्रुमशपि।

१६ कगे नोच्यते। अस्यायमर्थ इति नोच्यते। क्रियासामान्यार्थत्वादनेकार्थत्वाद्वा। हरिसेवां कगति, करोतीत्यर्थः नोच्यत इत्यवचनमर्थ इत्यन्ये। दोषं कगेत्।

१७–१८ अक, अग कुटिलायां गतौ। अंकति अगति वा सर्पः।

१९–२० कण, रण गतौ। कणयति रणयति। गमयतीत्यर्थः। शब्दार्थे गतयोः काणयति। राणयति।

२१–२३ चण, शण, श्रण दाने। चणति, शणति, श्रणत्यथम्। आद्यो गतिहिंसयोः द्रुमघटादौ। श्रणिर्णौ।

२४–२७ श्नथ, क्नथ, क्रथ, क्लथ हिंसार्थाः। श्नथति, क्नथति, क्रथति, क्लथति दैत्यम्। णौ श्नथयतीत्यादि। क्रथेस्तु 'जासिनिप्रहण' (२–३–५६) इत्यत्र क्राथेत्युक्तेर्णौ दीर्घः। क्राथयति। मित्त्वफलम् अक्राथि अक्रथीति। तत्र क्राथेर्हिंसार्थत्वसूत्रणाण्ण्यन्तानामप्येषां हिंसामात्रमर्थः। क्रथिर्युजादौ च।

1 'स्य अमि' ग. घ 2 'नार्थत्वात्। ह्रगयति। ह्लगयति। सगयति स्थगयति हरि' ग

CC-0. In Public Domain. Digitization by eGangotri

२८ [1]चनु च। हिंसायामिति शेषः। चनति चनयति रिपुम्। श्रद्धाद्यर्थो युजादौ। शब्दे द्रुमशपि।

२९ [2]वनु च। नोच्यते। कगिवदयमपि क्रियासामान्याद्यर्थ इत्यर्थः। हरिसेवां वनति। णौ मित्त्वे त्वनुपसर्गस्यास्य वनेर्वा मित्त्वं वक्ष्यत इति सोपसर्ग एवात्र ग्राह्यः। प्रवनयति संवनयति वा स्त्रियम्। अनेकार्थत्वाद्वशीकरणमर्थः।

३० **ज्वल** दीप्तौ। चलने च **द्रुमे**। ज्वलति। प्रज्वलयति। ज्वलह्वलह्मलामनुपसर्गे वा मित्त्वं वक्ष्यत इति सोपस[3]र्गणामेषां नित्यं मित्त्वार्थमिह पाठः।

३१–३२ **ह्वल, ह्मल** चलने। ह्वलति ह्मलति वा पल्लवः। विह्वलयति। प्रह्मलयति।

३३ **स्मृ** आध्याने। स्मृ चिन्तायामित्यस्योत्कण्ठापूर्वकस्मरणे मित्त्वम्। स्मरयति राधां हरिः। अन्यत्र स्मारयति [4]मुनिः।

३४ **दृ** भये। दरति नरः। दरयति तम्। विदारणे श्नि, द्रुमश्यनि च। दृङ् आदरे शे।

३५ **नॄ** नये। नरति व्रजं पशुम्। नरयति। अयं श्नि च।

३६ **श्रा** पाके। पाको विक्लित्तिः। श्रायति श्रात्योरस्मिन्नर्थे मित्त्वम्। श्रपयति तण्डुलान्। विक्लेदयतीत्यर्थः। अन्यत्र श्रापयति देहम्। स्वेदयतीत्यर्थः।

३७ मारणतोषणनिशामनेषु **ज्ञा**। निशामनं प्रदर्शनम्। निशातनेष्वित्येके। पशुं संज्ञपयति। विष्णुं विज्ञपयति। प्रज्ञपयति रूपम्, रोपं (शरं) वा। श्रवणे च द्रुमे। उपसर्गोऽतन्त्रमित्येके। अन्यत्र शास्त्रं ज्ञापयति बोधयतीत्यर्थः। 'ज्ञप मिच्च' इति बोधनाद्यर्थो णौ। तेन बोधने ज्ञपयतीत्यपि। तत्रैव ज्ञा नियोग इत्यमित्।

३८ कम्पने **चलिः**। ज्वलादौ वक्ष्यमाणश्चलिरस्मिन्नर्थे मित्। चलयति लताम्। अन्यत्र चालयति शीलम्, धनम्, सूत्रं वा। अन्यथाकरोति, हरति क्षिपतीति चार्थः।

1 'चन' घ 2 'वन' ग 3 'पसर्गस्य नित्यं' घ
4 'मुनिम्' घ

CC-0. In Public Domain. Digitization by eGangotri

३९ **छदिरूर्जने**। युजादिगतस्य स्वरितेतः संवरणार्थस्यास्य ऊर्जने मित्त्वम्। छदयति दीनं, मृतं वा हरिः। बलवन्तं, प्राणवन्तं वा करोतीत्यर्थः। अन्यत्र छादयति छत्रग्राहिभिरातपम्। संवारयतीत्यर्थः। संवरणार्थोऽयमनिदित् कथादौ, इदिण्णौ।

४० जिह्वोन्मथने **लडिः**। विलासे पठितोऽयमस्मिन्नर्थे मित्। उन्मथनं क्षोभणम्। तच्च जिह्वायाः क्षोभणं, जिह्वया क्षोभणं वा। लडयति जिह्वामहिः। लडयति जिह्वयाऽस्यलग्नम्। जिह्वोन्मथनयोरिति पाठे जिह्वा तद्विषयो व्यापारः। उन्मन्थनं हिंसनम्। आद्ये लडयति जिह्वामिति प्राग्वत्। हिंसायाम् लडयति शत्रून्। एभ्योऽन्यत्र लाड(ळ)यति पुत्रम्।

४१ **मदी** हर्षग्लेपनयोः। ग्लेपनं दैन्यम्। दैवादिको मदिरनयोर्मित्। मदयति भक्तं, दुष्टं च हरिः। हर्षयति दीनयति चेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। एवमुन्मादयति, प्रमादयति[1], निमादयति शिष्यम्। स्पष्टमुच्चारयतीत्यर्थः।

४२ **ध्वन** शब्दे। ध्वनयति घण्टाम्। अन्यत्र ध्वानयति शिष्यम्। अस्पष्टाक्षरमुच्चारयतीत्यर्थः।

४३ **स्वन** अवतंसने च। स्वनयति बर्हम्, वेणुं च हरिः। अन्यत्र स्वानयति। द्वयोर्वा मित्त्वं **द्रुमे**। ध्वानयति घण्टामित्यादि। ध्वनिस्वन्योरग्रे वक्ष्यमाणयोरनुवादोऽयम्। ध्वनिः कथादौ च। दलिवलिस्खलित्रपिक्षपयश्च **भोजोक्ताः**। दलयति पत्रम्। वलयति दृशौ। स्खलयति पादम्। त्रपयति वधूम्। क्षैक्षय इत्यस्यात्वे पुकि मित्त्वम्। क्षपयति दोषम्। क्षपिवर्जं मन्ये वा मितो **द्रुमे**। दालयति पत्रमित्यादि। क्षपिः क्षान्त्यां णौ। क्षप प्रेरणे कथादौ।

॥ घटादयो मितः॥ (ग. सू)।

॥ जनीजृष्क्नसुरञ्जोऽमन्ताश्च ॥ (ग. सू)।

जन्यादयश्चत्वारोऽमन्ताश्च रम्यादयो मितः। आद्यास्त्रयः श्यनि। रञ्जिः शपि च। जनयति। जृष् वयोहानौ। जरयति नरम्।

1 'ति तथा निमा' ग॰घ

CC-0. In Public Domain. Digitization by eGangotri

क्नमु ह्वरणदीप्त्यो:। ह्वरणं कौटिल्यम्। क्नसयति मतिमग्निश्च। रञ्जेस्तु अरञ्जि, अराञ्जि इति[1] दीर्घौ मित्त्वफलम्। रञ्जेर्णौ मृगरमणे' (वा·) इति नलोपे रजयति मृगानिति ह्रस्वोऽपि। अमन्तेषु गमयति, रमयति। श्यनि ष्णसु निरसन इत्येके पठन्ति। तेऽत्रापि 'जृष्णस्वि'ति पठन्ति। स्नसयति भृत्यै: शत्रुम् निरासयतीत्यर्थ:। अस्य मित्त्वं वेति द्रुमे। स्नासयति।

॥ ज्वलह्वलह्मलनमोऽनुपसर्गा वा ॥ (ग· सू)।

मित: स्यु:। ज्वलयति, ज्वालयति। ह्वलयति, ह्वालयति, ह्मलयति, ह्मालयति। नमयति, नामयति। सोपसर्गे तु ज्वलादे: प्राक्पाठान्नमेरमन्तत्वाच्च नित्यं मित्त्वम्। प्रज्वलयतीत्यादि।

॥ ग्लास्नावनुवमश्च ॥ (ग·सू)।

अनुपसर्गा वा मित:। ग्लपयति, ग्लापयति देहं ज्वर: क्षीणशक्ति करोतीत्यर्थ:। स्नपयति, स्नापयति हरिं गोपी। स्नायतेर्वेष्टनार्थत्वे तु स्नपयति हरिणा [2]पदम् इत्यादि। वनयति, वानयति। क्रियासामान्यार्थो वनुरयम्। वमयति वामयति रोगिणा पथ्यं वैद्य:। सोपसर्गात्तु ग्लास्नोरमित्त्वात् प्रग्लापयति प्रस्नापयति। वनुवमोस्तु स्वतो मित्त्वात् प्रवनयति, प्रवमयतीत्येव।

॥ न कम्यमिचमाम् ॥ (ग· सू.) ॥

एषाममन्तत्वेऽपि मित्त्वं न। कामयते। आमयति। आचामयति।

॥ शमिर्दर्शने ॥ (ग–सू)।

अयं दर्शने न मित्। निशामयति रूपम् अन्यत्र निशमयति [3]वाच:। शमयति कोपम्। शमु उपशमे पुषादौ। आलोचने चितादौ।

॥ यमोऽपरिवेषणे ॥ (ग-सू)

परिवेषणादन्यत्रायं न[4]मित् परिवेषणं भोजनम्। आयामयति रज्जुम् भृत्यं वा। द्राघयति, व्यापारयतीत्यर्थ:। परिवेषणे तु मित्त्वमेव। यमयति ब्राह्मणान्। नियमयतीति स्ववन्तात् 'तत्करोति—' (वा)-इति णौ। यम उपरम इत्यग्रे। परिवेषणे ज्ञपादौ।

1 'ति चिण्णमुलोदर्घो' घ
2 'पटमित्यादि' ग. घ
3 'वच:' घ
4 'मित्। आया' घ

CC-0. In Public Domain. Digitization by eGangotri

॥ स्खदिरवपरिभ्यां च ॥ (ग-सू)।

अपावपरिभ्यश्चेत्येके। एभ्यः परस्य स्खदेः प्राक्पाठप्राप्तं मित्त्वं न। अवस्खादयति, परिस्खादयति, अपस्खादयति। अन्यत्र-स्खदयति, प्रस्खदयति। विदारयतीति सर्वत्रार्थः।

फण गतौ। फणति व्रजम्। फणयति। गतेरन्यत्रामित्त्वात् फाणयति। [1]स्नेहयतीत्यर्थः॥ वृत्॥ घटादिर्वृत्त[2]इत्यर्थः।
ज्वरादय उदात्ता उदात्तेतः॥ ८०८॥

८०९ राजृ दीप्तौ। उदात्तः स्वरितेत्। राजति, राजते।

८१०-८१२ टुभ्राजृ, टुभ्राशृ, टुभ्लाशृ दीप्तौ। उदात्ता अनुदात्तेतः। भ्राजते, भ्राशते, भ्लाशते।

१-३ **स्यम, स्वन, ध्वन, शब्दे। क्षरान्ता उदात्ता उदात्तेतः।** स्यमति। अस्य शविकरणत्वं चोक्तं द्रुमे। तेन स्यमति स्यमन्तीति नुम्विकल्पादि फलम्। स्वनति। ध्वनति। स्यमिश्चितादौ वितर्कार्थः। **स्वनान्ताः सप्त फणादयः।**

४-५ **षम, ष्टम** अवैक्लब्ये। समति, स्तमति धीरः। अविक्लबो भवतीत्यर्थः। आद्यो **द्रुम**कथादौ च। दन्त्यादिः परिणामे पुषादौ। साम सान्त्व इति कथादौ **द्रुम**णौ च।

६ **ज्वल** दीप्तौ घटादिपठितस्यापीह पाठो 'ज्वलितिकसन्तेभ्यः' (३-१-१४०) इति **ण**विकल्पार्थः। ज्वालः, ज्वलः।

७ **चल** कम्पने। गतौ च **द्रुमे**। चलति। विलसने शे। भृतौ **णौ**।

८ **जल** घान्ये। घान्यमतैक्ष्ण्यम्*। जलति मन्दः। लडयोरभेदाज्जडति। जलम्। जडः। अपवारणे **णौ**।

९-१० **टल, ट्वल** वैक्लब्ये। टलति, ट्वलति क्रिया।

११ **ष्ठल** स्थाने। स्थलति द्वारका कृष्णस्य।

1 'निस्ने' घ 2 'त्तः। ज्व' घ

* 'घनशब्दाद् भावे ष्यञ्। सिद्धान्तकौमुद्यां जल घातन इति पठित्वा घातनं तैक्ष्ण्यमिति व्याख्यायि'। के।

CC-0. In Public Domain. Digitization by eGangotri

१२ **हल** विलेखने। कर्षणं तत्। हलति भूमिम्।

१३ **णल** गन्धने। नलति माला। नल(ळ)दमुशीरमूलम्। नलि(ळि)नम्। बन्धन इत्येके। नलति गाम्। नाल(ळ)म्। नड भाषायां ग्रसादौ।

१४ **पल** गतौ। पलति। पाल रक्षणे णौ।

१५ **बल** प्राणने, धान्यावरोधने च। बलति मूर्छितः। धान्यावरोधनं कुसूलादिव्यापारः। बलति कुसूलः। धान्यधारणे व्याप्रियत इत्यर्थः। ज्ञपादौ चाऽयम्। दाने द्रुमशपि।

१६ **पुल** महत्त्वे। पोलति देहः। महान् भवतीत्यर्थः। पुलि(ळि)न्दः। विपुलम्। पुलि(ळि) नम्। पुल(ळ)कः। अयं णावपि। शेऽपीत्येके।

१७ **कुल** संस्त्याने, बन्धुषु च। सन्तान इत्येके। संस्त्यानं सङ्घातः। कोलन्ति मृगाः। कोलः। एकजातीयानां प्रवाहः सन्तानः। कोलन्ति सार्थाः। प्रवाहरूपेणायान्तीत्यर्थः। कोलन्ति जनाः। बन्धुत्वेन संबध्नन्तीत्यर्थः। कुलम्।

१८–२० **शल, ह्वल, ह्मल, पत्लृ** गतौ। ह्वलतिर्हिंसासंवरणयोश्च। हुल हिंसासंवरणगतिषु इत्येके। मित्सूक्तयोरपि ह्वलिह्मल्योर्णविकल्पार्थः[1] पाठः। शलति, ह्वलति, ह्मलति, होलति। पतिरधोगत्यर्थः। कूपं पतति। कर्माविवक्षया वृक्षात् पतति। अभिपतति शत्रुमित्यादौ च गत्यर्थत्वमेव। ऐश्वर्यार्थश्च द्रुमे। पतति हरिः। अयं श्यनि कथादौ च।

२१ **क्वथे** निष्पाके। क्वथति तण्डुलः। विक्लिद्यतीत्यर्थः। अस्य घटादिपाठान्मित्त्वमिति **माधवः**। क्वथयति। घटादौ चाऽयं न दृश्यते।

२२ **पथे** गतौ। पथति। पथो मार्गः। पथ प्रक्षेपे, पथे गतौ द्वौ णौ।

1 'ल्पाय' ग

CC-0. In Public Domain. Digitization by eGangotri

२३ **मथे** विलोडने। मथति।

२४ **टुवम** उद्गरणे। वमति भुक्तम्। केचिदुद्गिरण इति पठित्वा निपातनादित्त्वमाहुः। वमेरुदित्त्वं फणादित्वं चास्ति **द्रुमे**। ववमुः, वेमुः।

२५ **भ्रमु** चलने। भ्रमति दृष्टिः। 'वा भ्राश'–(३–१–७०) इति श्यनि भ्र(ा)म्यति। भ्रमरः। भ्रूः। अयमनवस्थाने श्यनि।

२६ **क्षर** सञ्चलने। गळनं तत्। क्षरत्यम्भः। क्वचित् सकर्मकोऽपि। क्षरति धाराम्। क्षल सञ्चये इति चैके। चलने च **द्रुमे**। क्षलति व्रीहीन्। शौचकर्मणि णौ।

स्यमादय उदात्ता उदात्तेतः॥ ८३८

८३९ **षह** मर्षणे। उदात्तोऽनुदात्तेत्। सहतेऽपराधम्। अयं युजादौ श्यनि च।

८४० **रम** क्रीडायाम्। उदित्त्वमस्यानार्षम्। अनुदात्तोऽनुदात्तेत्। रमते। रामः। रमा। रथः। [1]रतम्।

१ **षद्लृ** विशरणगत्यवसादनेषु। 'पाघ्रा'– (७-३-७८) इति सीदादेशः। सीदति घटो, व्रजं, देहश्च। अयं शे युजादौ च।

२ **शद्लृ** शातने। तीक्ष्णीभावस्तत्। विशीर्णतायामित्येके। गतावप्यस्ति। 'शदेः शितः' (१-३-६०) इति तङ्। शीयादेशः। शीयते। शे चाऽयम्।

३ **क्रुश** आह्वाने रोदने च। क्रोशति कृष्णं बालश्च।

सदादयोऽनुदात्ता उदात्तेतः॥ ८४३।

१ **कुच** सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति मुक्त्वा भक्तम्। कोचति लता। कोचति शत्रुम्। कोचति भूमिम्। कुच शब्दे तारे इति पठितस्यपि एष्वर्थेषु णार्थः पाठः।

२ **बुध** अवगमने। अयमकर्मकः सकर्मकश्च **माधवस्येष्ट** इत्युद्बोधो ज्ञानं चार्थः। बोधति सुप्तः, पद्मो वा। बोधति धर्मम्। हिक्कादौ श्यनि चाऽयम्।

1 'रत्नम्' घ

CC-0. In Public Domain. Digitization by eGangotri

३ रुह बीजजन्मनि। रोहति वृक्षः। अयन्तारोहार्थे सकर्मकः। आरोहत्य[1]श्वम्।

४ कस गतौ। कसति व्रजम्। अयं विकासार्थेऽकर्मकः। विकसति कोरकः।

कुचादय उदात्तेतः, उदात्ता रुहिवर्जम् ॥ ८४७ ॥

वृत्। ज्वलादिर्वृत्तः।

१ **हिक्क** अव्यक्ते शब्दे। गुहान्ता उदात्ताः स्वरितेतः। हिक्कति हिक्कते कपिः।

२ **अञ्चु** गतौ याचने च। अचु इत्येके। **अचि** गतौ इत्यन्ये। अञ्चति, अञ्चते। अचति अचते। इदितः कुङिति भेदः।

३ **टुयाचृ** याच्ञायाम्। **डुयाचृ** इत्येके। याचति, याचते।

४ **रेटृ** परिभाषणे याचने च द्रुमे। रेटति, रेटते।

५-६ **चते, चदे** याचने। चतति चतते। चदति, चदते।

७ **प्रोथृ** पर्याप्तौ। प्रोथति, प्रोथतेऽन्नम्। अयं शब्दार्थोऽपि। प्रोथत्यश्वः। प्रोथः 'हलश्च' (३-३-१२१) इति करणे घञ्। अपपूर्वस्तु मारणे हुङ्कारणे वा। अपप्रोथति रिपुम्।

८-९ **मिदृ मेदृ** मेधाहिंसयोः। **मिथृ मेथृ** इत्येके। **मिधृ मेधृ** इत्यन्ये। मेदति, मेदते वटुः। मेधावान् भवतीत्यर्थः। एवं मेथ(ध)ति, मेथ(ध)ते। मेधृ सङ्गमे च। मेधति मेधते कृष्णेन। मेथिश्च सङ्गमे[2]।

१०-११ **णिदृ णेदृ** कुत्सासन्निकर्षयोः। नेदति, नेदते कृष्णेन। सन्निकृष्यत इत्यर्थः।

१२-१३ **शृधु मृधु** उन्दे। शर्धति, शर्धते, मर्धति, मर्धते भूमिः।

१४ **बुधिर्** बोधने। तत्तु ज्ञानमेव। बोधति, बोधते [3]शास्त्रार्थम्।

1 'हति गिरिम्' घ   2 'मे द्रुमे, णिदृ' ग·घ

3 'शास्त्रम्' ग·घ

CC-0. In Public Domain. Digitization by eGangotri

१५ **उबुन्दिर्** निशामने। दर्शनं तत्। बुन्दति बुन्दते हरिम्।

१६ **वेणृ** गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। **वेनृ** इत्येके। वादित्रग्रहणं वाद्यानां वादनार्थं ग्रहणम्। वेणति, वेणते, वेनति वेनते व्रजं, [1]शास्त्रार्थं कृष्णं रूपं मुरलीं च। गच्छतीति वेणिः।

१७ खनु अवदारणे। खनति खनते भूमिम्*।

१८ **चीवृ** आदानसंवरणयोः। अनृदिदित्येके। चीवति, चीवते। चीवरम्। ग्रसादौ चाऽयम्।

१९ **चायृ** पूजानिशामनयोः। चायति, चायते हरिम्।

२० **व्यय** गतौ। व्ययति, व्ययते, वित्तत्यागे त्वस्य नित्यं तङेव। व्ययतेऽर्थम्★। अयं कथादौ चा क्षयार्थो णौ।

२१ **दाशृ** दाने। दाशति, दाशते। दाश हिंसायां श्नौ।

२२ **भेषृ** भये। गतावित्येके। भेषति, भेषते व्याघ्रात्।

२३ **भ्रेषृ** गतौ। चलन इत्येके। **भ्लेषृ** इत्यप्यन्ये। भ्रेषति। भ्रेषते, भ्लेषति, भ्लेषते।

२३ (?) **अस** गतिदीप्त्यादानेषु। **अष** इत्येके। असति, असते। अषति, अषते। असु क्षेपणे श्यनि। अंस समाघाते कथादौ। अस भुवि, आस उपवेशने द्वौ लुकि।

२४ **स्पश** बाधनस्प[2]र्शनयोः। **पष** इत्येके। **पश** इत्यन्ये[3]। स्पर्शनं हिंसार्थं दोषसूचनम्। स्पशति, स्पशते। पषति पषते। पशति, पशते शत्रुम्। तं हन्तुं दोषं सूचयतीत्यर्थः। आद्यो ग्रहणाद्यर्थश्चितादौ। द्वितीयो[4] बन्धने युजादौ। अन्त्यो बन्धने णौ द्रुमकथादौ च।

1 'शास्त्र कृष्णं' ग-घ 2 'स्पशन' ग-घ

3 'न्ये। ग्रन्थे च द्रुमे। स्पशनं' ग-घ

4 'यो णौ बन्धने। युजा' ग

* अत्रदार्यग्रहणेऽपि दृष्टः। उत्खनति कन्दम्। के

★ अनुदात्तेदयतिर्विपूर्वो वाऽस्त्वयम्। के

CC-0. In Public Domain. Digitization by eGangotri

२५ **लष** कान्तौ। कान्तिरिच्छा। अभिलषत्यभिलषते श्रियम्। लष शिल्पयोगे णौ।

२६ **चष** भक्षणे। चषति, चषते, चषकः।

२७ **छष** हिंसायाम्, छषति, छषते।

२८ **झष** आदानसंवरणयोः। झषति, झषते।

२९ **भ्लक्ष** अदने। **भ्रक्ष** इत्येके। **भक्ष** इत्यन्ये। **प्लक्ष** इत्यपरे। भ्लक्षति, भ्लक्षते। भ्रक्षति, भ्रक्षते। भक्षति, भक्षते। प्लक्षति, प्लक्षते। भक्षिणौं च।

३० **दासृ** दाने। दासति, दासते। दसु उपक्षये पुषादौ[1]। दसिदंसनदर्शनयोश्चितादौ।

३१ **माहृ** माने। माहति, माहते व्रीहीन्।

३२ **गुहू** संवरणे। गुणेकृते 'ऊदुपधाया–' (६–४–८९) इत्यूत्त्वम्। गूहति, गूहते दोषम्। उपपूर्व आलिङ्गने। उपगूहति प्रियाम्। **हिक्कादय उदात्ताः स्वरितेतः।। ८७९।।**

८८० **श्रिञ्** सेवायाम्। उदात्त उभयतोभाषः। श्रयति, श्रयते कृष्णम्। श्रीञ् पाके श्नि।

१ **भृञ्** भरणे। अयं पूरणे षिदिति **भट्टिः**। भरति भरते भारम्, घटं च। अयं ड्विच्च्श्लौ। भृ[2]भर्त्सने श्नि।

२ **हृञ्** हरणे। तच्च प्रापणं स्वीकारः स्तेयं नाशनं च। आद्ये द्विकर्मकः। हरति हरते भारं ग्रामम्। अंशं हरति। धनं हरति चोरः। पापं हरति। विहाराहारनिर्हारप्रहारादावुपसर्गात् क्रीडाभुक्ति[3]हानताडनाद्यर्थता। हृ प्रसह्यह(क)रणे श्लौ।

३ **धृञ्** धारणे। धरति धरते वेणुम्। [4]धृष् इति द्रुमणौ। धृङ् इत्यवध्वंसनेऽग्रे। अवस्थाने शे। धृवयोर्हानौ श्नि।

४ **णीञ्** प्रापणे। तच्च गमना। नयति नयते व्रजं गाम्। **भृञादयोऽनुदात्ता उभयतोभाषाः।। ८८४।।**

1 'दौ। दस दसि' घ
2 'भर्त्सने' ग. घ
3 'हृदन' घ
4 'धृ इति' ग. घ

CC-0. In Public Domain. Digitization by eGangotri

१ धेट् पाने । ज्ञयत्यन्ता अनुदात्ताः परस्मैभाषाः । धयति पयः । डुधाञ् धारणादौ श्लौ ।

२-३ ग्लै, म्लै हर्षक्षये । स च शक्तिक्षयः[1] । ग्लै, म्लै गात्रविनाम इत्येके । स च कान्तिहानिः । ग्लायति, म्लायति देहः ।

४ द्यै न्यक्करणे । द्यायति रिपुम् । न्यङ्गविधान इत्येके । न्यङ्ग कुत्सिताङ्गम् । विरूपीकरणमित्यर्थं ऊहितः । द्यायति नरं रोगः ।

५ द्रै स्वप्ने । निद्रायति श्रान्तः । लुकि चाऽयम् ।

६ ध्रै तृप्तौ । ध्रायति भुक्तः ।

७ ध्यै चिन्तायाम् । ध्यायति कृष्णम् ।

८ रै शब्दे । रायति । की इति रायतीति कीरः । 'सुपि' इति योगविभागात् कः । रादाने लुकि ।

९-१० स्त्यै, ष्ट्यै शब्दसंघातयोः । स्त्यायति । तिष्ट्यासती-त्यादौ षोपदेशफलम् । ष्ट्यैधातोः ष्षत्वं नेति **कौमुदी** । ष्ट्यायति । टष्ट्यौ ।

११ खै खदने । तच्च स्थैर्यहिंसे । खायति शिला, शत्रुं च । खै खनन इति **शङ्करः** । खायति भूमिम् ।

१२-१४ क्षै, जै, षै क्षये । क्षायति, जायति, सायति दोषम् । षो अन्तकर्मणि श्यनि ।

१५-१६ कै, गै शब्दे । कायति । काकः । कातरः । गायतेः शब्दविशेषार्थत्वात् सकर्मकत्वम् । गायति रागम् । उपगायति हरिम् गाङ् गतावग्रे । गा स्तुतौ श्लौ ।

१७-१८ श्रै, स्रै पाके । श्रायति, स्रायति तण्डुलः । विक्लि-द्यतीत्यर्थः । श्रै[2]स्वेदन इति **द्रुमे** । श्रयति देहः । अयं लुकि णौ च ।

१९ पै ओवैशोषणे । पायति, वायति वृक्षः । पा पाने, वेञ् तन्तुसन्ताने द्वावग्रे । पा रक्षणे वा गतिगन्धनयोः द्वौ लुकि । वा [3]सुखाप्तिगतिसेवासु द्रुमणौ ।

1 'यः । म्लै' घ   2 'स्वेद इति' घ
3 'सुखव्याप्ति' ग

CC-0. In Public Domain. Digitization by eGangotri

२० ष्टै वेष्टने। ष्गै इत्येके। स्तायति, स्नायति पटम्। ष्णै शौच इत्येके। स्नायति नद्याम्। लुकि चाऽयम्।

२१ दैप् शोधने। पकारो दाबित्ति सामान्यग्रहार्थः। शोधनं शुद्धिः। 'यस्य कीर्तिरवदायति स्म सा' इति नैषधीयोक्तेरवदायति पटम्*। दाण् दाने, देङ् रक्षणं द्वावग्रे। दाप् लवने लुकि। डुदाञ् दाने श्लौ। दो अवखण्डने श्यनि।

२२ पा पाने। पिबति जलम्।

२३ घ्रा गन्धोपादाने। जिघ्रति गन्धम्।

२४ ध्मा शब्दाग्निसंयोगयोः। इह शब्दः शब्दना। पाणिं धमति। शब्दयतीत्यर्थः। अग्निसंयोगश्च मुखवायुना। अग्निं धमति। मुखवायुनाग्निं धूनयतीत्यर्थः। लक्षणया विधूननमात्रेऽपि। नाडीं धमति। रिपून् विधमति। तथा सन्तापनेऽपि। स्वर्णं धमति। शङ्खादिशब्दने मुखवायुना पूरणसम्भवाल्लक्षणया पूरणेऽपि दर्पाध्माता इति।

२५ ष्ठा गतिनिवृत्तौ। तिष्ठति हरिः।

२६ म्ना अभ्यासे। प्रायेणाङ्पूर्वः। आमनति वेदम्।

२७ दाण् दाने। दाणिति विशेषणार्थो णः। यच्छति।

२८ ह्वृ कौटिल्ये। ह्वरति मनः।

२९ स्वृ शब्दोपतापयोः। स्वरति वेणुः, स्वरति शत्रुम्।

३० स्मृ चिन्तायाम्। स्मरति कृष्णम्। अयं विस्मरणे चित्तादपक्रमणेऽपि। विस्मरति पठितम्। न स्मरति हरिर्भक्तस्य। चित्तान्नापगच्छतीत्यर्थः[1]। प्रीत्यादौ[2] श्नि। द्वृ वरणे इत्येके। द्वरति दोषम् द्वारम्।

* अत्र सकर्मकता। 'उच्चरत्कळरवाळिकैतवाद् वैजयन्तविजयार्जिता जगत्' इति कर्मोक्तेः। यस्य सौधस्य कीर्तिर्जगद् धवलयति स्मेत्यर्थः। शुद्ध्यर्थकत्वे तु अकर्मकतैव। अवदायति पटः।' के

1 'स्मृ प्री' घ 2 'श्नौ' घ

CC-0. In Public Domain. Digitization by eGangotri

३१ सृ गतौ। सरति। शीघ्रगतौ 'पाघ्रा'दिना धावादेशः। धावति योद्धुम्।

३२ ऋ [1]गतिप्रापणयोः। ऋच्छति व्रजं, मूर्च्छितं च। द्वौ श्लौ च। ऋगतौ श्नि।

३३-३४ गृघृ सेचने। गरति भूमिम्। घृधातोस्तु घरति घृतं, घृणा, घर्म इत्येतेष्वेव प्रयोगो, नान्यलकारादिष्विति भाष्ये। गॄ निगरणे शे। गॄ शब्दे श्नि। घृ क्षरणदीप्त्योः श्लौ। घृ प्रस्रवणे णौ।

३५ ध्वृ हूर्च्छने। कौटिल्यं तत् हिंसार्थेऽप्यस्ति। ध्वरति।

३६ स्रु गतौ स्रुतौ च द्रुमे। शु, स्रु गतौ इत्येके। स्रवति, शवति।

३७ षु प्रसवैश्वर्ययोः। सवति राजा। अनुजानाति, ईश्वरो भवतीति वार्थः। गतौ चाह देवः। लुकि चाऽयम्। षुञ् अभिषवे श्नौ। षिञ्, सुञ् गतौ, सु प्रसवादौ त्रयं द्रुमशपि। षूङ् प्राणिगर्भ-विमोचने लुकि। प्राणिप्रसवे श्यनि। षू प्रेरणे शे।

३८ श्रु श्रवणे। 'श्रुवः शृच' (३-१-७४) इति श्नुः। शृणोति कथाम्। अयं गतौ द्रुमशपि।

३९ ध्रु स्थैर्ये। ध्रवति स्थाणुः। अयं कुटादौ गत्यर्थः।

४०-४१ दु, द्रु गतौ। अन्त्यः स्रुतौ च द्रुमे। दवति द्रवति। दुङ्शब्देऽग्रे। टुदुउपतापे, दुञ् हिंसायां द्वौ श्नौ। दूङ् परितापे श्यनि। द्रु हिंसायां श्नौ। द्रूञ् हिंसायां श्यनि। गतिहिंसयोर्द्रु मश्नौ।

४२-४३ जि, ज्रि अभिभवे। जयति, ज्रयति रिपुम्। जि ज्रि अभिभव इति लीलाशुकः। जिगादुवज्रयति[2] गोरपीच्यम्। ज्रो[3] वयोहानौ युजादौ[4]। (आद्यो) दीर्घान्तो द्रुमयुजादौ।

धयत्यादयोऽनुदात्तः परस्मैभाषाः ॥ ९२७ ॥

१ [5]ष्मिङ् ईषद्धसने। त्रै ङन्ता अनुदात्ता। आत्मनेभाषाः। स्मयते कृष्णः अनादरेऽयं णौ।

२ गुङ् अव्यक्ते शब्दे। गवते। गुपुरीषोत्सर्गे कुटादौ, द्रुम-कुटादौ तु दीर्घान्तः।

३ गाङ् गतौ। शपा सवर्णदीर्घः। गाते।

1 'प्राणनयोः' घ 2 'जिगोदु' ग, 'जिगादुपज्र' घ
3 'ज्रि' घ. 4 'दौ। धयत्या' ग 5 'स्मिङ्' ग

CC-0. In Public Domain. Digitization by eGangotri

४-७ घुङ्, कुङ्, उङ्, ङुङ् शब्दे। घवते, कवते, अवते, ङवते। कुङ् अव्यक्तशब्दार्थ इत्येके। लुक्यङित्। कुङ्, कूङ् इत्यार्तशब्दे कुटादौ।

८-११ च्युङ्, ज्युङ्, प्रुङ्, प्लुङ् गतौ। क्लुङ् इति चैके। ज्ञुङ् इति चान्ये। च्यवते, ज्यवते, प्रवते, प्लवते क्लवते ज्ञवते। च्यु हसने णौ।

१२ रुङ् गतिरेषणयोः। रेषणं हिंसा। रवते। रुशब्दे लुकि।

१३ धृङ् अवध्वंसने। धरते रिपुम्।

१४ मेङ् प्रणिदाने। तच्च विनिमयः प्रत्यर्पणं वा। व्रीहिभिस्तिलान् स्वर्णेन रूप्यं वा विनिमयते। तिलानां व्रीहीन् प्रणिमयते। प्रत्यर्पयतीत्यर्थः। मा माने लुकि। श्लौ श्यनि च ङित्।

१५ देङ् रक्षणे। दयते।

१६ श्यैङ् गतौ। श्यायते। आङ्पूर्वोऽयं शोषणे। आश्यायते पङ्कः।

१७ प्यैङ् वृद्धौ। प्यायते मोदः।

१८ त्रैङ् पालने। त्रायते।

[1]ष्मिङादयोऽनुदात्ता आत्मनेभाषाः॥ ९४५॥

१ पूङ् पवने। शोधनं तत्। पवते सोमम्। अयं द्रुमश्यनि च। श्नायां ञित्।

२ मूङ् बन्धने। मवते।

३ डीङ् विहायसा गतौ। डयते खगः। श्यनि चाऽयम्।

पूङादय उदात्ता आत्मनेभाषाः॥९४८॥

९४९ तॄ प्लवनतरणयोः। अभिभवे च द्रुमे। उदात्तः परस्मैभाषः। प्लवनं जलादावमङ्क्त्वा गमनम्। तरति जले। तरति नदीं रिपुं च।

१ गुप गोपने। २ तिज निशातने। ३ मान पूजायाम्।

४ बध बन्धने। एषां क्रमान्निन्दायां, क्षमायां, पूजितविचारे,

1 'स्मिङ' ग

CC-0. In Public Domain. Digitization by eGangotri

दुर्गन्धादिजचित्तविकारे च सनुक्तः। नित्यसनन्तत्वसाधनाच्च धातोः पृथक्प्रयोगाभावाद् गोपनाद्यर्थपाठो व्यर्थ इति हरादयः। एषामनुदात्तेत्वात् सनन्तानां तङेव। जुगुप्सते पापात्। तितिक्षते पीडाम्। मीमांसते धर्मम्। बीभत्सते दुर्गन्धेन। द्रुमे तु—

निशातने बन्धनेऽपि तिजिबध्योः सनीरितः।
ततस्तितिक्षते खड्गं वत्सान् बीभत्सते तथा॥
मानेस्तु पूजनविचारणयोरेव सन्विधिः।
तेन मीमांसते शौरिं श्लोकार्थं चेति सिध्यति॥

मान पूजायां युजादौ। मनेति ज्ञाने श्यनि। अवबोधने तनादौ। स्तम्भे चितादौ। गर्वे द्रुमशपि।

गुपादयोऽनुदात्तेतः॥ ९५३॥

१ रभ राभस्ये। उपक्रमस्तत्। तत्रायं प्रायेणाङ्पूर्वः। आरभते हरिपूजाम्। सम्पूर्वः कोपे। परिपूर्वः परिष्वङ्गे। संरभते शूरः। परिरभते राधाम्।

२ डुलभष् प्राप्तौ। लभतेऽर्थम्। लाभप्रेरणे कथादौ। लभि शब्दे द्रुमशपि। लभ क्षेपे[1] तत्कथादौ।

३ ष्वञ्ज परिष्वङ्गे। 'दंशसञ्ज–' (६–४–२५) इति नलोपः। स्वजते वधूम्।

४ हद पुरीषोत्सर्गे। हदते गौः। रभादयोऽनुदात्ता अनुदात्तेतः। हदिस्तु वानुदात्तेदित्येके। तन्मते हदतीत्यपि॥ ९५७॥

९५८ ञिक्ष्विदा अव्यक्ते शब्दे। उदात्त उदात्तेत्। क्ष्वेदति।

१ स्कन्दिर् गतिशोषणयोः। मिहान्ता अनुदात्ता उदात्तेतः। स्कन्दति।

२ यभ विपरीतमैथुने। तच्च पुरुषायितम्। यभ मैथुन इत्येवैके। यभति स्त्री, पुमान् वा।

३ णम प्रह्वत्वे। शब्दे च द्रुमे। नमति कृष्णम्।

1 'पे द्रुमकथादौ' ग

CC-0. In Public Domain. Digitization by eGangotri

४–५ **गम्लृ**, **सृप्लृ** गतौ । '[1]इषगमि–' (७–३–७७) इति छः । गच्छति, सर्पति ।

६ **यम** उपरमे । उदिदित्येके । यच्छति शत्रुम् ।

७ **तप** सन्तापे । तपति स्वर्णम् । ऐश्वर्यापतापयोश्च **द्रुमे** । तपति हरिः । ऐश्वर्ये श्यनि । दाहे युजादौ **द्रुमश**पि च ।

८ **त्यज** हानौ । त्यजति दोषम् ।

९ **षञ्ज** सङ्गे । सजति कृष्णे ।

१० **दृशिर्** प्रेक्षणे । पश्यति कृष्णम् ।

११ **दंश** दशने । दशनं तद्व्यापारः । दशतीक्षुम् । चितादौ ग्रसादौ चाऽयम् ।

१२ **कृष** विलेखने । तच्चेहाकर्षणम् हलकर्म च **द्रुमे** । कर्षति व्रजं वत्सान् । कर्षति भूमिम् । अयं शेऽपि ।

१३ **दह** भस्मीकरणे । दहति काष्ठम् ।

१४ **मिह** सेचने । मेहति भूमिम् ।

स्कन्धादयोऽनुदात्ता उदात्तेतः ।। ९७२ ।।

९७३ **कित** निवासे रोगापनयने च । अयमुदात्तन्नित्यसनन्तः । उदात्तेत्त्वात्सनः परस्मैपदमेव । अत्र च निवासार्थो व्यर्थः । रोगापनयने ह सनुच्यते । संशयनिग्रहापनयननाशनादयश्चास्यार्थाः । व्याधि चिकित्सति । संशये–धर्मं विचिकित्सति । निग्रहादौ–शत्रुं, दोषं, तृणं, वा चिकित्सति । तृणं नाशयत्युन्मूलयतीत्यर्थः । निग्रहादयो लक्षणया वा । केत आमन्त्रणे कथादौ । केततीति **द्रुमशपि** ।

१ **दान** अवखण्डने । **शान** तेजने । इमावपि नित्यसनन्तौ स्वरितेतौ । दानेरार्जवे सनुक्तेरवखण्डनार्थोक्तिर्व्यर्था । शानेर्निशातने सनुक्तः । तच्च तेजनमेव । दीदांसति, दीदांसते मतिः । शीशांसति, शीशांसते [2]शस्त्रम् । दानिर्द्रुमशपि स्वरितेत् । इमौ चुरादौ च ।। ९५७ ।।

1 'इषुगमि' ग·घ 2 'खड्गम्' ग·घ

CC-0. In Public Domain. Digitization by eGangotri

१ डुपचष् पाके। वहान्ता अनुदात्ताः स्वरीतेतः। पचति, पचते।

२ षच समवाये। सचति, सचते कृष्णेन।

३ भज सेवायाम्। विभजने च द्रुमे। भजति, भजते कृष्ण-मर्थं च। भज विश्राणने णौ। भाज पृथक्कर्मणि कथादौ। भञ्जिः श्नमि ग्रसादौ च।

४ रञ्ज रागे। रजति, रजते पटम्।

५ शप आक्रोशे। शपति, शपते वा रिपुम्। द्वौ श्यनि च।

६ त्विष दीप्तौ। त्वेषति। त्वेषते वाग्निः। अवपूर्वोऽयं दान-निरसनयोः। अवत्वेषत्यर्थं शत्रुं च।

७ यज देवपूजासङ्गतिकरणदानेषु। यजत्यग्निम्। ध्यानेन परमात्मानं यजति। इन्द्राय हविर्यजति, अर्थं यजति। एवं यजते।

८ डुवप बीजसन्ताने। तच्च (सच) क्षेत्रे बीजानां[1] विकरणम्। अयं केशखण्डनेऽपि। वपति, वपते व्रीहीन् केशांश्च।

९ वह प्रापणे। वहति वहते वा भारं ग्रामम्।

पचादयोऽनुदात्ताः स्वरितेतः। सचिस्तूदात्तः॥ ९८४॥

९८५ वस निवासे। अनुदात्त उदात्तेत्। वसति गृहे। आच्छादने लुकि। स्तम्भे पुषादौ। स्नेहनादौ णौ। वस निवासे, वस उपसेवायाम् द्वौ कथादौ।

१ वेञ् तन्तुसन्ताने। वयति वयते वा पटम्। खमूयुर्वसु-धामूवुः सायकाः इति व्याप्तौ च्छादने चाह भट्टिः।*

२ व्येञ् संवरणे। व्ययति, व्ययते वा देहम्।

३ ह्वेञ् स्पर्धायां शब्दे च। शब्दः शब्दनम्। तच्चाह्वानम्। ह्वयति ह्वयते कृष्णेन कृष्णं वा।

वेञादयोऽनुदात्ता उभयतोभाषाः॥ ९८८॥

1 'नां किरणम्' ग. घ

* 'वश्चास्यान्यतरस्यां किति' (६-१-३९) इति वयो यस्य वैकल्पिके वत्वे द्वैरूप्यम्' के

CC-0. In Public Domain. Digitization by eGangotri

९८९ वद व्यक्तायां वाचि। उदात्त उदात्तेत्। वदति।

९९० टुओश्वि गतिवृध्योः। उदात्तः परस्मैभाषः। श्वयति व्रजं, देहश्च ॥ वृत् ॥ यजादयो वृत्ताः। भूवादयस्त्ववृत् कृताः। तेन चुलुम्पादीनामपि शप्सिद्धिः ॥

॥ इति भ्वादयः ॥

१ अद भक्षणे। 'अदिप्रभृतिभ्यः–' (२–४–७२) इति शपो लुक्। अत्त्यन्नम्। व्यत्यदन्ति वृका मेषानित्यादौ हिंसार्थोऽपि।

२ हन हिंसागत्योः। हन्ति। अनुदात्तावुदात्तेतौ। २

१ द्विष अप्रीतौ। द्वेष्टि, द्विष्टे रिपुम्।

२ दुह प्रपूरणे। तच्च पात्रादिपूरणार्थं क्षारणम्। गां दोग्धि, दुग्धे वा पयः।

३ दिह उपचये। सच लेपनम्। देग्धि, दिग्धेऽङ्गं तैलेन।

४ लिह आस्वादने। लेढि, लीढे वा पयः।

द्विषादयोऽनुदात्ताः स्वरितेतः॥ ६

७ चक्षिङ् व्यक्तायां वाचि। तत्र प्रायेणाङ्पूर्वः। आच–ष्टेऽर्थम् अयं दर्शनार्थोऽपि। चष्टे हरिम्। अयमनुदात्तोऽनुदात्तेत्। ७

१ ईर गतौ। कम्पने च द्रुमे। पृच्यन्ता उदात्ता अनुदात्तेतः। ईर्ते। क्षेपे युजादौ।

२ ईड स्तुतौ। ईडे हरिम्।

३ ईश ऐश्वर्ये। ईष्टे जगतां हरिः।

४ आस उपवेशने। आस्ते व्रजे।

५ आङः शास इच्छायाम्। उदिदित्येके। आशास्तेऽर्थम्। प्रायेणाङ्पूर्व इत्युक्तेः प्रशास्त इत्यपि।

६ वस आच्छादने। वस्ते पटम्।

७ कसि गतिशासनयोः। कश इत्येके। कस इत्यन्ये। कंस्ते, कष्टे, कस्ते शिष्यम्।

CC-0. In Public Domain. Digitization by eGangotri

८ णिसि चुम्बने। निंस्ते मुखम्।

९ णिजि शुद्धौ। निङ्क्ते पटः। श्लनौ चायम्।

१० शिजि अव्यक्ते शब्दे। (सिजि इत्येके)। शिङ्क्ते काञ्ची। अनुदात्तेतां तङोऽनित्यत्वात् "शिञ्जद्वलय" इति।

११ पिजि वर्णे। पिङ्क्तवं तत्। पिङ्क्ते ज्वाला। सम्पर्चन इत्येके। पिङ्क्ते भक्त्या भुक्तम्। अवयव इत्यन्ये। पिङ्क्ते मांसम्। अव्यक्ते शब्द इत्यपरे। पिङ्क्ते काञ्ची। वृजि इत्येके। वृङ्क्ते ज्वाला। पिञ्जर्ग्रसादौ च। पिजिपिञ्जी द्वौ णौ।

१२ वृजी वर्जने। इदिदित्येके। द्वौसम्पर्चन इत्येके। वृक्ते, वृङ्क्ते ईदित् श्नमि युजादौ च।

१३ पृची सम्पर्चने। इदिदित्येके। पृक्ते, पृङ्क्ते। आद्यः श्नमि च। पृच[1] सम्पर्चने युजादौ।

ईरादय उदात्ता अनुदात्तेतः ॥ २०

१ षूङ् प्राणिगर्भ विमोचने, सूते पुत्रम्।

२ शीङ् स्वप्ने। शेते श्रान्तः। शीङ् [?]शातने श्नौ।

उदात्तावात्मनेभाषौ ॥ २२ ॥

१ यु मिश्रणे। अमिश्रणेऽपीत्येके। यौति दध्ना सक्तून्। यौति खलान्। विश्लेषयतीत्यर्थः। "तावुभौ युतौ" इत्यादि मिश्रीभावेऽपि दर्शनादकर्मकोऽपि। युञ् बन्धने श्नि। यु जुगुप्सायां चितादौ।

२ रु शब्दे। रौति।

३ णु स्तुतौ। नौति। दीर्घान्तोऽयं कुटादौ।

४ टुक्षु शब्दे। क्षौति।

५ क्ष्णु तेजने। क्ष्णौति खड्गम्।

६ ष्णु प्रस्रवणे। क्षारणं तत्। स्नौति गाम्।

योत्यादय उदात्ताः परस्मैभाषाः ॥ २८ ॥

२९ ऊर्णुञ् आच्छादने। उदात्त उभयतोभाषः। ऊर्णौति, ऊर्णोति। [ऊर्णोतेर्विभाषा (७-३-९०) इति वा वृद्धिः]। ऊर्णुते।

1 'संयमने' च

CC-0. In Public Domain. Digitization by eGangotri

१ द्यु अभिगमने। द्यौति शत्रुम्।

२ षु प्रसवैश्वर्ययोः। सौति राजा।*

३ कु शब्दे। कौति।

अनुदात्ताः परस्मैभाषाः ॥ ३२ ॥

१ ष्टुञ् स्तुतौ। स्तौति, स्तुते।

२ ब्रूञ् व्यक्तायां वाचि। ब्रवीति ब्रूते।

अनुदात्तावुभयतोभाषौ ॥ ३४ ॥

१ इण् गतौ। वक्ष्यन्ता अनुदात्ताः परस्मैभाषाः। इङ् त्वात्मनेभाषः। 'इणो गा लुङि' (२-४-४५)इत्यादौ विशेषणार्थो णः। एति।

२ इङ् अध्ययने। अधीते वेदम्।

३ इक् स्मरणे। 'अधीगर्थ-' (२-३-५२) इति विशेषणार्थः कः। अध्येति कृष्णम्। इङिकावधिपूर्वाविव।

४ वी गतिप्रजनकान्त्यशनखादनेषु।★ व्याप्तिक्षेपयोश्च द्रुमे। गर्भग्रहणं प्रजनः। तत्राकर्मकः। वेति व्रजं, पशुः, श्रियम्, अन्नम्, इक्षुम्, विश्वं, रिपुं च। अत्र वी ई इत्यपि प्रश्लेषाद् एति ईतः इयन्तीत्याद्यपि गत्याद्यर्थेषु। वी गतौ शे।

५ या प्रापणे। इह प्रापणं गतिः। याति व्रजम्।

६ वा गतिगन्धनयोः। वाति वायुर्दिशम्। वाति माला। वाति गन्धं करोतीति सहस्रनामभाष्ये शङ्करः। अर्दनं हिंसा च गन्धनमिति लीलाशुकः। वाति शत्रुम्।⊗

७ भा दीप्तौ। भाति।

८ ष्णा शौचे। स्नाति।

* प्रसवोऽनुज्ञा। 'या लीढा श्रवसापि सौति महतीमत्सौख्यदुःखासिका' मिति प्रयोगादुत्पादनमपि प्रसवः।

★ 'असनेति क्वचित् पाठः' के

⊗ 'गन्धनं सूचनमिति सिद्धान्तकौमुद्याम्। के

CC-0. In Public Domain. Digitization by eGangotri

९ श्रा पाके। स्वेदे च द्रुमे। श्राति तण्डुलो देहश्च।

१० द्रा कुत्सितायां गतौ। सा च पलायनस्वापौ। स्वापे निपूर्व। द्राति रणात्। निद्राति श्रान्तः।

११ प्सा भक्षणे। प्साति।

वृत्तौ शर्पर इत्यस्मिन्नद्भिः प्सातमितीरणात्।
द्रप्सादेरत्र सिद्धेश्च धातोः सादित्वधीर्भ्रमः॥

१२ पा रक्षणे। पाति।

१३ रा दाने। राति।

१४ ला आदाने। लाति खड्गम्। द्वावपि दानार्थावित्येके।

१५ दाप् लवने। अदाबित्युक्त्यर्थः पः। दाति व्रीहीन्।

१६ ख्या प्रकथने। क्शा इत्यप्येके। आख्यात्याक्शाति कथाम्। ख्या प्रख्यान इति द्रमे। प्रख्याति नृपः।

१७ प्रा पूरणे। प्राति घटम्।

१८ मा माने। मानमिहान्तर्भावः। तेनाकर्मकः। घटे माति तण्डुलः। मुखमुपमाति, अग्निमनुमाति, गृहं निर्माति, भावान् प्रमाति जानातीत्यर्थः, तण्डुलान् परिमाति इत्यादावर्थभेदात् सकर्मकत्वमपि।

१९ वच[1] परिभाषणे। वक्ति कथाम्।

इणादयोऽनुदात्ताः परस्मैभाषाः इङ्त्वात्मनेभाषः॥ ५३॥

१ विद ज्ञाने। वेत्ति धर्मम्। सत्तायां श्यनि। विचारे श्नमि। लाभे शे। वेदनाख्याननिवासेषु चितादौ।

२ अस भुवि। अस्ति हरिः।

३ मृजू शुद्धौ। शोधना सा। मार्ष्टि भुवम्। शौचालङ्कारयोर्युजादौ। मार्ज शब्दार्थो णौ।

४ रुदिर् अश्रुविमोचने। 'रुदादिभ्यः-' इतीट्। रोदिति दुःखी।

विदादय उदात्ता उदात्तेतः॥ ५७॥

५८ ञिष्वप शये। उदात्तेदनुदात्तः। स्वपिति श्रान्तः। 'हलन्त्यमिति पस्येत्त्वप्रसङ्गाञ्ञिष्वप् शय इत्यपपाठः।

1 'च भाषणे' घ

CC-0. In Public Domain. Digitization by eGangotri

१. श्वस प्राणने। श्वसिति जन्तुः।

२. अनच। प्राणिति जन्तुः। श्यनि चायम्।

३. जक्ष भक्षहसनयोः। जक्षिति। रुदादिपञ्चकं गतम्।

४. जागृ निद्राक्षये। जागर्ति रोगी।

५. दरिद्रा दुर्गतौ। दरिद्राति निस्स्वः।

६. चकासृ दीप्तौ। चकास्ति।

७. शासु अनुशिष्टौ। विविच्य ज्ञापनं तत्। शिष्यं धर्मं शास्ति।

श्वसादय उदात्ता उदात्तेतः॥ ६५॥

१. दीधीङ् दीप्तिदेवनयोः। देवनं क्रीडा। दीधीतेऽग्निर्बालश्च।

२. वेवीङ् वेतिना तुल्ये। वी गतिप्रजनकान्त्यशनखादनेष्वित्युक्तेन वेतिना तुल्येऽर्थ इत्यर्थः। वेवीते व्रजमित्यादि।

उदात्तावात्मनेभाषौ। जक्षित्यादयो गताः॥ ६७॥

१.२. षस सस्ति स्वप्ने। सस्ति। इदित्वात् सकारात् प्राङ् नुम्। संस्ति, संस्तः*। संस्तन्ति।

३. वश कान्तौ। वष्टि सुखम्। वाशृ शब्दे श्यनि "षसादय उदात्ता उदात्तेतः। दीधीङादयः पञ्च च्छान्दसा इत्येके। षसेः सहस्यादीनां वशेश्च वष्ट्युशन्तिवशादीनां दर्शनात् ससिवशी लोकेऽपि॥ ७०॥

चर्करीतं च। यङ्लुगन्तमपि परस्मैपदयुतमादादिकं स्यादित्यर्थः।

७.१. ह्नुङ् अपह्नवे। अनुदात्त आत्मनेभाषः। कृष्णाय निह्नुते॥ १०६१॥ [1]इत्यदादयः॥

1 'दादिभागः' ग

* सिद्धान्तकौमुद्यां तु नुमि कृते 'स्कोः-' इति सलोपे 'झरो झरि' इति पाक्षिके तलोपे च सन्ति सन्तः इत्युदाहृत्य 'बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोः-' इति लोपाभावात् संस्ति, संस्तः इत्येके इत्युक्तम्'। के

CC-0. In Public Domain. Digitization by eGangotri

[जुहोत्यादयः]

१. हु दानादानयोः। दानमग्न्यादौ प्रक्षेपः। हविर्जुहोति। आदाने धनं जुहोति। प्रीणनेऽपीति **भाष्ये**। देवान् जुहोति

२. **ञिभी** भये। बिभेति व्याघ्रात्।

३. ह्री लज्जायाम्। जिह्रेति बाला।

ह्वादयोऽनुदात्ताः परस्मैभाषाः॥

४. पृ पालनपूरणयोः। पिपर्ति, पिपूर्तः। **ह्रस्वान्त** इत्येके। पिपर्ति पिपृतः। दीर्घान्तः श्नि णौ च। पृ प्रीतौ श्नौ। पृङ् व्यायामे शे।

परस्मैभाषो दीर्घान्त उदात्तः, ह्रस्वान्तस्त्वनुदात्तः।

४. **डुभृञ्** धारणपोषणयोः। **टुभृञिति** द्रुमे। अनुदात्ताबुभयतोभाषौ 'भृञामित्' (७-४-७६)। बिभर्ति, बिभृते भारं, भृत्यं च॥

१. **माङ्** माने शब्दे च। मिमीते व्रीहीन् वीणा च।

२. **ओहाङ्** गतौ। जिहीते।

अनुदात्तावात्मनेभाषौ। भृञादित्रयं गतम्॥७॥

८. **ओहाक्** त्यागे। अनुदात्तः परस्मैभाषः। 'हश्च व्रीहि'-(३-१-१४८) इत्यत्र हाङा सहग्रहार्थः कः जहाति दोषम्।

१. **डुदाञ्** दाने। ददाति दत्ते।

२. **डुधाञ्** धारणपोषणयोः। दानेऽपीत्येके। दधाति, धत्ते।

अनुदात्तावुभयतोभाषौ ॥१०॥

९. **णिजिर्** शौचपोषणयोः। नेनेक्ति, नेनिक्ते पटं श्रियं च।

२. **विजिर्** पृथग्भावे। वेवेक्ति, वेविक्तेऽर्थान्। ओविजी भयचलनयोरिति शे श्नमि च।

३. **विष्लृ** व्याप्तौ। उदिदित्येके। **द्रुमे** त्विरिच्च। वेवेष्टि, वेविष्टे[1]

1. 'ष्टे। निवृत्। निजा' ग. घ

CC-0. In Public Domain. Digitization by eGangotri

निजादयः स्वरितेतोऽनुदात्ताः ॥ १३ ॥

इतः परं गणान्ताः छान्दसाः ।

१. **घृ** क्षरणदीप्त्योः । जिघर्ति । 'जिघर्म्यग्निं (हविषा घृतेन)' दीपयामीत्यन्तर्गतव्यर्थः ।

२. **हृ** प्रसह्यकरणे । ('अयं स्रुवोऽभि) जिहर्ति होमान्' । हृ प्रसह्य हरण इति द्रुमे ।

६.४. **ऋ, सृ** गतौ । आद्यो लोकेऽपीति **भाष्ये*** । इयर्ति । इयृतः । 'प्रबाहवा पृथुपाणिः सिसर्ति' ।

घृप्रभृतयोऽनुदात्ताः **परस्मैभाषाः** ॥ १७ ॥

१८. **भस** भर्त्सनदीप्त्योः । उदात्त उदात्तेत् । बभस्ति । भसितम्, भस्म, भस्त्रा, नभ इति लोकेऽपि ॥

१९. **कि** ज्ञाने । अनुदात्तः परस्मैभाषः । चिकेति ।

१. **तुर** त्वरणे, तुतोर्ति । तुरो वेगवानिति लोकेऽपि । तूरी गतित्वरणहिंसनयोः श्यनि ।

२. **धिष** शब्दे । दिधेष्टि ।

३. **धन** धान्ये । देधन्ति । अस्य मरणार्थत्वाल्लोकेऽपि । निधनम् । प्रधनं युद्धमिति **स्वामी** । शब्दे **द्रुम**शपि ।

४. **जन** जनने । जजन्ति । अस्यापि मित्त्वमस्ति **द्रुमे** । प्रादुर्भावे श्यनि ।

तुरादय उदात्ता उदात्तेतः ॥ २३ ॥

२४. **गा** स्तुतौ । जन्मनि च **द्रुमे** । अनुदात्तः परस्मैभाषाः । "देवान् जिगाति सुम्नयुः" । एषु 'बहुलं छन्दसि' इत्यभ्यासस्येत्त्वम् ॥

छन्दसि । घृष्प्रभृतयश्छन्दसीत्यर्थः । **वृत्** जुहोत्यादयो वृत्ताः[1] । १०८४ ॥

1 'त्ताः इति जुहोत्यादयः' । घ.

* 'अत्र च ज्ञापकमर्तिपिपर्त्यो'श्चेति इत्त्वविधानम् । छन्दोमात्र विषयत्वे 'बहुलं छन्दसी'त्येव सिद्धेः ।

CC-0. In Public Domain. Digitization by eGangotri

(दिवादयः)

१. **दिवु** क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिगतिषु। झषन्ता उदात्ता उदात्तेतः। व्यवहार उक्तिः क्रयादिश्च। दीव्यति हरिः शत्रून्, गोपान्, धनं, व्रजे, राधां, वनं च। दिविरैश्वर्यार्थं इति देवतान्तादि (५–४–२४) सूत्रे[1] प्राह हरः* ।

२. षिवु तन्तुसन्ताने। सीव्यति भस्त्राम्।

३. स्रिवु गतिशोषणयोः[2]। स्रीव्यति ग्रामं, व्रीहींश्च।

४. ष्ठिवु निरसने। ष्ठीव्यति जलम्।

५. ष्णुस अदने। अदर्शन आदाने चैके। स्नुस्यत्यन्नम्, घटः, खड्गं च। ष्णसु निरसने इत्येके। स्नस्यति रिपुम्। अस्य मित्त्वमस्तीति प्रागुक्तम्।

६. **क्नसु** ह्वरणदीप्त्योः। क्नस्यति। वणिगग्निश्च।

७.८. **व्युष** दाहे, **प्लुष** च। व्युष्यति, प्लुष्यति तरुम्। व्युष स्थाने। व्युस विभागे। इत्येके। व्युस्यत्यर्थम्। आद्यान्त्यौ पुषादौ च।

९. **नृती** गात्रविक्षेपे। नृत्यति नटी।

१०. **त्रसी** उद्वेगे। त्रस्यति भीरुः। धारणे णौ। उदित् ग्रसादौ।

११. **कुथ** पूतीभावे। कुथ्यति शवः। दुर्गन्धीभवतीत्यर्थः।

१२. **पुथ** हिंसायाम्। पुथ्यति[3] दुष्टम्।

१३. **गुध** परिवेष्टने। गुध्यन्ति हरिं गोप्यः। रोषे श्नि।

१४. **क्षिप** प्रेरणे। तच्च निरसनम्। क्षिप्यति रिपून्। अयं शे स्वरितेत्।

१५. **पुष्प** विकसने। पुष्प्यति लता।

१६-१८. **तिम, ष्टिम, ष्टीम** आर्द्रीभावे। **तीम** इत्यप्येके। तिम्यति, स्तिम्यति, स्तीम्यति, तीम्यति वा भूमिः।

1 'दिति सूत्रे' घ. 2 'योः। सकर्मकः घ 3 'ति। गुध' घ.

* सिद्धान्तकौमुदीपाठे मोदमदस्वप्नकान्तयोऽप्यर्थाः सन्ति। के

CC-0. In Public Domain. Digitization by eGangotri

१९. व्रीड चोदने। लज्जा [1]तत् व्रीडयति बाला।

२०. इष गतौ इष्यति। इष इच्छायां शे। इष आभीक्ष्ण्ये श्नि।

२१. षुह चक्यर्थे। चक तृप्तावित्युक्तेस्तृप्त्यर्थ इत्यर्थः। षह इत्यप्येके। सुहयति, सहयति[2] वा भुञ्जानः। अन्त्यो मर्षणे च द्रुमे।

२२-२३. जॄष् झॄष् वयोहानौ। जीर्यति, झीर्यति वा नरः। जॄष् अषित् श्नि युजादौ च। जॄ न्यक्करणे द्रुमश्चपि॥ **दिवादय उदात्तेतः, उदात्ताः क्षिपिवर्जम्।**

१. षूङ् प्राणिप्रसवे। प्रीङन्ता आत्मनेभाषाः। षूङ्दूङ्डीङ्-वर्जमनुदात्ताः। सूयते गौः। प्राणिग्रहणमतन्त्रम्। पुष्पं सूयते लता। अयमसूयार्थोऽपि। कृष्णाय सूयते चैद्यः।

२ दूङ् परितापे। दूयते दुःखी।

३ दीङ् क्षये। दीयते रिपुः।

४ डीङ् विहायसा गतौ। डीयते पक्षी। गतिमात्रे च द्रुमे। डीयते व्रजं कृष्णः।

५ धीङ् आधारे। धीयते भूमौ। तदाधारत्वेनावतिष्ठत इत्यर्थः। अनादरे च द्रुमे। धि धारणे शे।

६ मीङ् हिंसायाम्[3]। मीयते रिपुम्[4]। श्नायां ञित्। मी गतौ युजादौ। डुमिञ् प्रक्षेपणे श्नौ।

७ रीङ् स्रवणे। रीयतेऽम्भः। श्रवण इत्येके। रीयते गीतिम्। री गतिरेषणयोः श्नि। रि हिंसायां श्नौ। रि गतौ शे।

८ लीङ् श्लेषणे। लीयतेऽङ्गे पङ्कः। ली श्लेषणे श्नि। द्रवीकरणे युजादौ।

९ व्रीङ् वृणोत्यर्थे। छादनं, परिग्रहो वायम्। व्रीयतेऽङ्गमर्थं च। व्री वरणे श्नि। **स्वादय ओदितः।** तेनैषां निष्ठानत्वम्।

1 'तत्' प्रेरणे च द्रुमे, व्री, ग, घ
2 'ति भुञ्जा' घ
3 'याम् हिंसात मृतिः। मी' घ
4 'रिपुः' व

CC-0. In Public Domain. Digitization by eGangotri

१० **पीङ्** पाने। पीयते सुधाम्।

११ **माङ्** माने। मायते व्रीहीन्।

१२ **ईङ्** गतौ। ईयते।

१३ **प्रीङ्** प्रीतौ। कामनायां च **द्रुमे**। प्रीयते हरिः। प्रीयते हरिं राधा। प्रीञ् तर्पणे श्नि युजादौ च॥

षूङादय आत्मनेभाषाः, पूङ्दूङ्डीङ्वर्जमनुदात्ताः ॥ ३६ ॥

१ **शो** तनूकरणे। श्यति वृक्षं तक्षा।

२ **छो** छेदने। छ्यति तरुम्।

३ **षो** अन्तकर्मणि। तच्च नाशो नाशनं वा। अवस्यति दोषः। अवस्यति रिपुम्।

४ **दो** अवखण्डने। द्यति।

श्यत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ ४० ॥

१ **जनी** प्रादुर्भावे, वाश्यन्ता उदात्ता अनुदात्तेतः। जायते घटः। अयमुत्पादनायामपि। पुत्रं जायते जनयित्री। जननकृते सबन्धेऽपि सकर्मकः। राममनुजायते कृष्णः। अनुजननेन तत्सम्बन्धं प्राप्नोतीत्यर्थः।

२ **दीपी** दीप्तौ। दीप्यते।

३ **पूरी** आप्यायने। अकर्मकोऽयम्। पूर्यते कुम्भः। 'वेणून् पूर्यते' इति सकर्मकमप्याह **भट्टिः**। ग्रसादौ चायम्। पुर अग्रगमने शे।

४ **तूरी** गतित्वरणहिंसनयोः। त्वरणमात्रे च **द्रुमे**। तूर्यतेऽश्वः। तूर्यतेऽरीन्।

५-६ **धूरी, गूरी** हिंसागत्योः। धूर्यते गूर्यते शत्रुं ग्रामं च। गूर [1]उद्यमने चितादौ[2]।

७-८ **घूरी**, जूरी हिंसावयोहान्योः। घूर्यते, जूर्यतेऽरीन् नरश्च। घुर भीमार्थशब्दयोः शे।

1 'उद्यमे' ग.घ 2 'दौ। गुरी उद्यमने कुटादौ। पूरी' ग.घ

CC-0. In Public Domain. Digitization by eGangotri

९ शूरी हिंसास्तम्भनयोः। शूर्यते सेनां नृपो, मान्त्रिकश्च। शूर विक्रान्तौ कथादौ।

१० चूरी दाहे। चूर्यते काष्टम्। चुर स्तेये णौ द्रुमशपि च।

११ तप ऐश्वर्ये वा[1] तङ्श्यनौ प्राप्नोतीत्यर्थः। तप्यते हरिः। विकल्पाच्छप् परस्मैपदं च। तपति हरिः। उपतापे च द्रुमे। तप्यते, तपति रोगी। पत ऐश्वर्ये वा इत्येके[2]।

१२ वृतु वरणे, वृत्यतेऽङ्गम्। केचित् पूर्वत्र वाग्रहणमस्यादिं कृत्वा वावृतु वरणे इत्याहुः। वावृत्यते देहम्। द्वौ सम्भक्त्यर्थाविति द्रुमे। वृत्यते हरिमित्यादि।

१३ क्लिश उपतापे। क्लिश्यते रोगी।

१४ काशृ दीप्तौ। उदिद् द्रुमे। प्रकाश्यते।

१५ वाशृ शब्दे। वाश्यते।

जन्यादय उदात्ता अनुदात्तेतः तपिस्त्वनुदात्तः ॥५५॥

१ मृष तितिक्षायाम्। मृष्यति, मृष्यतेऽपराधम्।

२ ईशुचिर् पूतीभावे। शौचविशरणक्लेदनेषु च द्रुमे। ईकार ईदित्त्वार्थः। शुच्यति, शुच्यते देहो, मतिर्घटो गुडश्च। द्वावुदात्तौ।

३ णह बन्धने। नह्यति, नह्यते।

४ रञ्ज रागे। रज्यति, रज्यते[3]।

५ शप आक्रोशे। शप्यति शप्यते खलम्।

त्रयोऽनुदात्ताः॥ मृषादयः स्वरितेतः ॥ ६०॥

१ पद गतौ। लिशान्ता अनुदात्ता अनुदात्तेतः। पद्यते। कथादावप्ययम्।

२ खिद दैन्ये। खिद्यते निस्स्वः। अयं श्नमि च। परिघाते शे।

३ विद सत्तायाम्। विद्यते हरिः।

४ बुध अवगमे। ज्वलादिगतबोधय[4]तिवदुद्बोधो ज्ञानं चार्थः। बुध्यते सुप्तः, पद्मो वा। बुध्यते धर्मम्।

1. वो तपिरस्मिन्नर्थे तङ् ग. घ 2 'के। पत्यते पतति हरिः। वृतु' ग.घ
3 'ते पटः। शप' ग. घ. 4 'धतिब' ग.

CC-0. In Public Domain. Digitization by eGangotri

५ **युध** सम्प्रहारे। युध्यते रिपुणा। युध्यतीति तु युधमिच्छतीति क्यचि।

६ **अनौ रुध** कामे। अनुपूर्वो रुधिः कामेऽर्थे तङ्श्यनौ भजते। अनुरुध्यते हरिं राधा। काम इति तत्कार्यमनुसरणमप्युक्तम्। रुधिर् आवरणे श्नमि।

७ **अण** प्राणने। अन इत्येके। अण्यते, अन्यते वा जन्तुः।

८ **मन** ज्ञाने। मन्यते हरिम्।

९ **युज** समाधौ। अकर्मकोऽयमिति **माधवः**। युज्यते मुनिः। युजिर् योगे श्नमि। संयमनार्थो युजादौ।

१० **सृज** विसर्गे। स चोत्पादनत्यागौ। सृज्यते मालाम्। विसृज्यते दोषम्। संपूर्वः संसर्गे। संसृज्यते कृष्णेन। अयं शेऽपि[1]।

११ **लिश** अल्पीभावे। लिश्यते दोष। गतौ शे।

पदादयोऽनुदात्तेतः; अध्यनिवर्जमनुदात्ताः॥ ७१॥

१ **राधोऽकर्मकाद् वृद्धावेव**। वृद्ध्यर्थ [illegible]ाकर्मकादेव राधेः श्यन्। अस्य तु सिद्धिद्रोहदैवपर्यालोचनादयोऽर्थाः। राध्यत्योदनः। यन्तद्द्यमपराध्यति। कृष्णाय राध्यति गर्गः। श्नौ चायम्। रध हिंसासंराद्ध्योरग्रे।

२ **व्यध** ताडने। तच्च प्रायेण विदारणपर्यन्तम्। शरेण विध्यति रिपुम्।

३ **पुष** पुष्टौ। इतो गणान्ताः पुषादयः। पुष्यति श्रियम्। अयमकर्मकोऽपि[2]।

४ **शुष** शोषणे। शुष्यति तरुः।

५ **तुष** प्रीतौ। तुष्यति हरिः।

६ **दुष** वैकृत्ये। विकृतता तत्। दुष्यति खलः।

७ **श्लिष** आलिङ्गने। श्लिष्यति प्रियाम्।

८ **शक** विभाषितो मर्षणे। विभाषित इत्युभयपदिनां पूर्वाचार्यसंज्ञा। शक्यति, शक्यतेऽपराधम्।

1 'शे च'। ग. घ. 2 'पि। पुष्यति श्रीः। शुष' ग. घ.

CC-0. In Public Domain. Digitization by eGangotri

९ ञिष्विदा गात्रप्रक्षरणे। स्विद्यति देहः।

१० क्रुध कोपे। क्रुध्यति हरये।

११ क्षुध बुभुक्षायाम्। क्षुध्यति निस्स्वः।

१२ शुध शौचे। शुध्यति बुद्धिः।

१३ षिधु संराद्धौ। संसिद्धिः सा। सिध्यति भक्त्या मुक्तिः।

राधादयोऽनुदात्ता उदात्तेतः ।। ८४ ।।

१ रध हिंसासंराद्ध्योः। संराद्धिः पाकः। रध्यत्यरिम्, तण्डुलांश्च।

२ णश अदर्शने। नश्यति घटः।

३ तृप प्रीणने। तच्च तृप्तिस्तर्पणं वा[1]। तृप्यति [2]विप्रः तृप्यति विप्रमन्नैः। अयं शे युजादौ द्रुमश्नौ च।

४ दृप हर्षणमोहनयोः। मोहनं गर्वः। दृप्यति भस्त्वक्तः। दृप्यति दुष्टः। मोचनयोरित्येके। दृप्यति गाम्। अयमुत्क्लेशे शे। सन्दोपने युजादौ।

५ द्रुह जिघांसायाम्। कृष्णाय द्रुह्यति कंसः। कृष्णमभि- द्रुह्यति वा।

६ मुह वैचित्त्ये। अविवेकस्तत्। मुह्यत्यज्ञः।

७ ष्णुह उद्गिरणे। स्नुह्यति भुक्तम्।

८ ष्णिह प्रीतौ। स्निह्यति कृष्णे। णौ चायम्।

* वृत्। **विकल्पितेट उदात्तेतो रधादयो वृत्ताः ।। १२ ।।**

१ शमु उपशमे। गृधान्ता उदात्ता उदात्तेतः। शाम्यति कोपः।

२ तमु काङ्क्षायाम्। ताम्यति श्रियम्। ग्लानावेव प्रयोगः। ताम्यत्यार्तः। मुरारिस्तु 'द्रष्टुं....बहूत्ताम्यतः[3]।' इति काङ्क्षायामेवाह।

1 'च'. घ 2 'भुक्त': ग.घ 3 'तीति' ग

* 'रधादिभ्यश्च' (७-२-४५) इति' के

CC-0. In Public Domain. Digitization by eGangotri

३ दमु उपशमे। दाम्यति दुष्टान्। अकर्मकोऽपि। दाम्यति मुनिः।

४ श्रमु तपसि खेदे च। श्राम्यति मुनिरार्तश्च।

५ भ्रमु अनवस्थाने। अयमकर्मकः सकर्मकश्च। भ्राम्यति मतिः। भ्राम्यति ग्रामम्। "बभ्राम कृष्णो नवनीतभिक्षाम्"। वा भ्राश- (३-१-७०) इति वा श्यनि भ्रमति।

६ क्षमू सहने। अयमषित्। क्षाम्यति धीरः।

७ क्लमु ग्लानौ। क्लाम्यति, क्लामति मतिः। प्राग्वद् वा श्यन्। शपि 'ष्ठिवुक्लमु'–(७-३-७५) इति दीर्घः।⊗

८ मदी हर्षे। हर्षोऽत्र मदः। माद्यति सुरापः।

वृत्। शमादयो वृत्ताः।

९ असु क्षेपणे। अस्यति रिपुम्।

१० यसु [1]प्रयत्ने। यस्यति धर्मे।

११ जसु मोक्षणे। जस्यति वत्सम्। जसि रक्षणे, जसु हिंसायाम्, जसु ताडने इति त्रयं णौ।

१२-१३ तसु उपक्षये, दसु च। तस्यति, दस्यति। दस्युः। तसि अलङ्कारे णौ।

१४ वसु स्तम्भे। बसु इत्येके। वस्यति, बस्यति भीत्या। शमादयः क्षमिमदिवर्जमुदितः।

१५ व्युष विभागे। व्युस इति व्यस इति चैके। व्युष्यति, व्युस्यति, व्यस्यति वार्थम्।

१६ प्लुष दाहे। प्लुष्यति तरुम्। व्युषिव्युसिप्लुषीणां पुषाद्यङर्थ इह पाठः।

१७ बिस प्रेरणे। बिस्यति भृत्यम्।

⊗ 'तेनैव श्यन्यपि दीर्घे सिद्धेऽस्य शमादिषु पाठस्य घिनुण् फलम्।' के

1 'सु यत्ने' घ

CC-0. In Public Domain. Digitization by eGangotri

१८ **कुस** संश्लेषणे। कुस्यति कुशाग्र। ग्रसादौ चायम्।

१९ **बुस** उत्सर्गे। बुस्यति दोषम्।

२० **मुस** खण्डने। **मुष** इत्येके। मुस्यति, मुष्यति।

२१ **मसी** परिणामे। परिमाण इति **द्रुमे**। मस्यति मृत् घटतया। मस्यति व्रीहीन्। **समी** परिणामे इति दन्त्यादिरित्येके। सम्यति मृत्।

२२ **लुट** बिलोट(ड)ने। लुट्यति रिपून्। लुट्यति भूमौ लुटतीति **शङ्करः**।

२३ **उच** समवाये। उच्यति जनः।

२४-२५ **भृशु, भ्रुन्श** अधःपतने। भृश्यति, भ्रश्यति घटः।

२६ **वृश** वरणे। वृश्यति।

२७ **कृश** तनूकरणे। कृश्यति दोषम्।

२८ **ञि तृष** पिपासायाम्। तृष्यति पथिकः।

२९ **हृष** तुष्टौ। हृष्यति भक्तः।

३० **रुष** रोषे। हरये रुष्यति। **रिष** हिंसायां च। इत्येके। रिष्यति। चाद् व्यथादावपि। न रिष्यति न व्यथते।

३१ **डिप** क्षेपे। डिप्यत्यरिम्। अयं कुटादौ णौ च। इदित् सङ्घातार्थश्चितादौ द्रुमणौ च।

३२ **कुप** क्रोधे। हरये कुप्यति। ग्रसादौ चायम्। **कुपि** स्मृत्यां द्रुमणा।

३३ **गुप** व्याकुलत्वे। गुप्यति मतिः।

३४-३६ **युप, रुप, लुप** विमोहने। युप्यति, रुप्यति लुप्यति मूर्खम्। लुप्लृ छेदने शे।

३७ **लुभ** गार्ध्ये लुभ्यत्यर्थम्। भुवादेरवृत्कृतत्वाल्लोभतीत्यपीति **माधवः**। विमोहनार्थः शे।

CC-0. In Public Domain. Digitization by eGangotri

३८ **क्षुभ** सञ्चलने। क्षुभ्यति सेना।

३९-४० **णभ, तुभ** हिंसायाम्। नभ्यति, तुभ्यति।

४१ **क्लिदू** आर्द्रीभावे। क्लिद्यति गुलः।

४२ **ञिमिदा** स्नेहने। 'मिदेर्गुणः'। मेद्यति देहः।

४३ **ञिक्ष्विदा** स्नेहनमोचनयोः। क्ष्विद्यति देहो गां च।

४४ **ऋधु** वृद्धौ। ऋध्यति श्रीः। श्नौ चायम्।

४५ **गृधु** अभिकाङ्क्षायाम्। गृध्यति श्रियम्।

गर्धेति णो॥ १३७॥ **वृत्**॥ पुषादयो दिवादयश्च वृत्ताः। दिवादयस्त्ववृत्कृता इत्येके। तेन क्षीयते मृश्यतीत्यादि॥

शमादय उदात्ता उदात्तेतः॥ १२२२॥

पुषादिषु [14]दुषिदर्पिर्मनुमिताः शमाद्या व्युसि-
स्त्वसावुदुपधो [6]बिसाद्यतुरुचादयोऽष्टौ च ते।
[6]कुपादिषडथेन्द्रियप्रतिमिताः क्लिदाद्याश्च ते
द्रुमे त्विरित ईरितास्तत इहाङ्विकल्पो भवेत्॥

॥ इति दिवादयः॥

स्वादयः

१. **षुञ्** अभिषवे। अभिषव उक्तः। धूञन्ता अनुदात्ता उभयतोभाषाः। धूञ् तूदात्तः। सुनोति, सुनुते सोमम्, आतुरम्, सुराम्, नद्याम् च।

२ **षिञ्** बन्धने। सिनोति, सिनुते गाम्।

३ **शिञ्** निशातने। तनूकरणं तत्। शिनोति, शिनुते शस्त्रम्।

४ **डुमिञ्** प्रक्षेपणे। मिनोति, मिनुते शिलाम्।

५ **चिञ्** चयने। चिनोति, चिनुते व्रीहीन्[1]।

1 'हीन्। ज्ञपादौ चायम्। स्तृञ्' ग. घ

CC-0. In Public Domain. Digitization by eGangotri

६ **स्तृञ्** छादने। स्तृणोति, स्तृणुते तृणैर्भूमिम्[1]। स्तृणोतीति लक्षणया विक्षेपे। दीर्घान्तः प्वादौ।

७ **कृञ्** हिंसायाम्। कृणोति, कृणुते रिपुम्। अयं करणार्थ-स्तनादौ **द्रुमश**पि च। कृञिति (कृ इति च) हिंसार्थः प्वादौ। अञिद् विक्षेपे शे। विज्ञाने **द्रुमणौ** तङि।

८ **वृञ्** वरणे। स्वीकारः छादनं वा तत्। वृणोति, वृणुते कन्याम्, दोषं च। युजादौ चायम्। वृङ् सम्भक्तौ वृ वृञ् वरणे त्रयं प्वादौ।

९ **धुञ्** कम्पने। **धूञ्** इत्येके। धुनोति, धुनुते, धूनोति, धूनुते शाखाम्। दीर्घान्तः श्नि युजादौ च। कुटादौ धू विधूनने।

स्वादय उभयतो भाषाः, अनुदात्ता धूञ्वर्जम्।

१ **टुदु** उपतापे। दुनोति रिपुम्।

५ **हि** गतौ वृद्धौ च। हिनोति व्रजं श्रीश्च। प्रपूर्वः प्रेरणे। प्रहिणोति भृत्यम्।

३ **पृ** प्रीतौ। पृणोति हरिम्।

४ **स्पृ** प्रीतिपालनयोः। स्पृणोति हरिम् लोकं च। प्रीति-बलनयोरित्येके। बलनं [2]जीवनमिति **स्वामी**। स्पृणोत्यश्वः। **स्मृ** इत्येके। स्मृणोति हरिं, लोकम्, अश्वश्च। स्पृ हिंसायां प्वादौ। त्रयश्छान्दसा इत्येके।

द्वादयोऽनुदात्ताः परस्मैभाषाः ॥ १३ ॥

१ **आप्लृ** व्याप्तौ। आप्नोति लोकान्। परिपूर्वः शक्तौ रक्षायां च। पर्याप्नोति कर्तुम् लोकांश्च। लम्भने युजादौ।

1 'मिम्। तृणं स्तृणो' घ 2 'जवन' ग.घ.

CC-0. In Public Domain. Digitization by eGangotri

२ शक्लृ शक्तौ। शक्नोति कर्तुम्। अस्य तुमुनन्तधातुकर्मण सकर्मकत्वात् कर्मणि लादयः स्युः। शक्यते कर्तुं घटः। अस्य शकेरङ्विकल्प इड्विकल्पश्चास्तीति द्रुमे।

३.४. राध, षाध संसिद्धौ। राध्नोति, साध्नोत्योदनः। सिषात्सतीति साधेः षोपदेशफलम्। कालापास्त्वषोपदेशमाहुः।

आप्यादयोऽनुदात्ता उदात्तेतः ॥ १७ ॥

१ अशू व्याप्तौ सङ्घाते च। अश्नुते लोकान्, व्रीहिश्च। भोजनै श्नि।

२ ष्टिघ आस्कन्दने। अभिभवस्तत्। स्तिघ्नुते शत्रुम्।

उदात्तावनुदात्तेतौ ॥ १९ ॥

१-२ तिक तिग च एतावप्यास्कन्दने। हिंसार्थौ च द्रुमे। तिक्नोति, तिग्नोति।

३ षघ हिंसायाम्। सघ्नोति।

४ ञिधृषा प्रागल्भ्ये। धृष्णोति वटुः। धृष प्रसहने युजादौ।

५ दन्भु दम्भे। दम्भ उक्तः। दभ्नोति धूर्तः। दभ, दभि प्रेरणे द्रुमणौ। दन्भ सङ्घाते द्रुमचितादौ।

६ ऋधु वृद्धौ। अयमकर्मकः सकर्मकश्च। ऋध्नोति श्रीः, श्रियं च।

छन्दसि। आगणान्तमधिकारः।

७ अह व्याप्तौ। अह्नोति लोकान्।

८ दघ घातने पालने च। दघ्नोति रिपुं लोकांश्च।

९ चमु भक्षणे। चम्नोत्यन्नम्।

१०-१६ रि, क्षि, चिरि, जिरि, दाश, दृ हिंसायाम्। दुङ्

CC-0. In Public Domain. Digitization by eGangotri

इत्यत्येके। आद्यः ऋक्षि इत्यन्ये। रिणोति। क्षिणोति। ऋक्षिणोति। चिरिणोति। जिरिणोति। दाश्नोति। द्रुणोति। दुनुते। केचित् 'छन्दस्यहव्याप्तौ' इति पठित्वा दघादीन लोकेऽप्याहुः। क्षिणोतिः सर्वथा [1]लोकेऽप्यस्ति। "पञ्चबाणः क्षिणोसि"*।

तिकादय उदात्तेतः, रिक्षिद्रुदुङ्वर्जमुदात्ताः,

दुङ् स्वात्मनेभाषः। ३४॥ वृत्। स्वादयो वृत्ताः॥ १२५६॥

॥ इति स्वादयः॥

तुदादयः

१ तुद व्यथने। तुदति, तुदते मतिम्।

२ णुद प्रेरणे। नुदति, नुदते भृत्यम्। अतङ्यग्रे।✡

३ दिश अतिसर्जने। दानं तत्। दिशति, दिशते।

४ भ्रस्ज पाके। शस्य ङित्वात् प्रसारणम्। भृज्जति, भृज्जते तण्डुलान्।

५ क्षिप प्रेरणे। क्षिपति, क्षिपते भृत्यम्।

६ कृष विलेखने। सदल हलकर्म। कृषति, कृषते भूमिम्।

तुदादयोऽनुदात्ताः स्वरितेतः।

७ ऋषी गतौ। उदात्त उदात्तेत्। ऋषति ग्रामम्।

१ जुषी प्रीतिसेवनयोः। जुषते हरिम्। परितर्कणे युजादौ।

२ ओविजी भयचलनयोः। प्राय उत्पूर्वः। उद्विजते व्याघ्रात्, पल्लवश्च।

1 'केऽस्ति' ग.घ. 2 'तेस्त्वी। शपि' ग.घ.

'*न तद्यशः शस्त्रभृतां क्षिणोति' के। ✡'स च कर्त्रभिप्रायेऽपि परस्मैपदार्थः' के

CC-0. In Public Domain. Digitization by eGangotri

३.४ **ओलजी ओलस्जी** व्रीलने। लजते, लज्जते[1] बाला। शपि पठितानामत्र पाठः स्वराद्यर्थः। शप्याद्युदात्तः। शे मध्योदात्तः। ओनजी, ओनस्जी व्रीलन इति **चान्द्रमतं माधवदूषितम्**।

जुषादय उदात्ता अनुदात्तेतः ॥ ११ ॥

१ **ओव्रस्चू** छेदने। **रुडान्ता उदात्ता उदात्तेतः**। वृश्चति।

२ **व्यच** व्याजीकरणे। विचति कार्यम्।

३ **उच्छि** उञ्छे। उञ्छति व्रीहीन्।

४ **उच्छ** विवासे। अतिक्रमबन्धनवर्जनेषु च **द्रुमे**। उच्छति [2]रात्रिम्। उच्छति नदीमित्यादि।

५ **ऋच्छ** गतीन्द्रियप्रलयमूर्तिभावेषु। इन्द्रियप्रलयो मोहः, मूर्तिभावः काठिन्यम्। हिंसायां च **द्रुमे**। ऋच्छति व्रजं, रोगी पङ्को, रिपुं च।

६ **मिच्छ** उत्क्लेशे। स च पीडा। मिच्छति रिपून्।

७.९ **जर्ज, चर्च, झर्झ** परिभाषणसन्तर्जनयोः। आद्यान्त्यावपि चान्तावित्येके। जर्जति, चर्चति, झर्झति, जर्चति, झर्चति रिपुम्।

१० **त्वच** संवरणे। त्वचति दोषम्।

११ **ऋच** स्तुतौ। ऋचति हरिम्।

१२ **उब्ज** आर्जवे। उब्जति देहः। ऋजूभवतीत्यर्थः।

केऽप्यमुं दोपधं कृत्वा स्तोः श्चुनाश्चुविधेः परम्।
उज्जेर्भ इति चेच्छन्ति भस्य जश्त्वादिहोब्जति ॥

उपध्मानीयोपधत्वपक्षो **भाष्यदूषितः**।

१३ **उद्झ** उत्सर्जने। दस्य श्चुत्वम्। उज्झति दोषम्।

1 केऽस्ति ग.घ 2 'रात्रिः' घ

CC-0. In Public Domain. Digitization by eGangotri

१४ **लुभ** विमोहने। आकुलीकरणं तत्। लुभति जनान् सिंहः।

१५ **रिफ** कत्थनयुद्धनिन्दाहिंसादानेषु। श्लाघायां च **द्रुमे**। रिफति गिरम्, शत्रुणा, दुष्टम्, शत्रुम्, धनम्, हरिं च। रिह इत्येके। रिहति।

१६.१७ **तृप, तृन्फ** तृप्तौ। प्रीणने **द्रुमे**। आद्यः तृफ इत्येके। तृपति। नोपधत्वाच्छे नुम्। तृम्फति। तृफति।

१८.२१ **तुप, तुन्प, तुफ, तुन्फ** हिंसायाम्। तुपति, तुम्पति, तुफति तुम्फति वा रिपुम्।

२२.२३ **दृप दृन्फ** उत्क्लेशे। आद्योऽपि फान्त इत्येके। दृपति, दृम्फति, दृफति वा चोरः।

२४.२५ **ऋफ, ऋन्फ** हिंसायाम्। ऋफति, ऋम्फति[1] रिपुम्।

२६.२७ **गुफ, गुन्फ** ग्रन्थे। गुफति, गुम्फति स्रजम्।

२८.२९ **उभ, उन्भ** पूरणे। उभत्युम्भति कुम्भम्।

३०.३१ **शुभ, शुम्भ** शोभार्थे। हिंसायां च **द्रुमे**। शुभति, शुम्भति।

३२ **दृभी** ग्रन्थे। दृभति स्रजम्। युजादौ चायम्। दृभ वध इति **द्रुमे**ऽपि।

३३ **चृती** हिंसाग्रन्थनयोः। अनीदिद् **द्रुमे**। चृतति रिपुं स्रजं च। विपूर्वो विमोचने।

३४ **विध** विधाने। विधति यज्ञम्।

1 ति। 'आद्यो दानश्लाघानिन्दायुद्धेषु द्रुमे। गुफ' घ

CC-0. In Public Domain. Digitization by eGangotri

३५ **जुड** गतौ । **जुन** इत्येके । जुडति, जुनति वा ग्रामम् । जुडिर्बन्धने कुटादौ । प्रेरणे णौ ।

३६ **मृड** सुखे, **पृड च** । मृडति, पृडति धनी । मृड क्षोभे श्नि ।

३७ **पृण** प्रीणने । वृण इति च **भाष्ये** । पृणति, वृणति हरिम् ।

३८ **मृण** हिंसायाम् । मृणति । मृणाळम् ।

३९ **तुण** कौटिल्ये । तुणति । तूण पूरणे चितादौ ।

४० **पुण** कर्मणि शुभे । पुणति धार्मिक[1]ः । अस्मादौणादिके यकि कृते पुण्यमिति स्यादिति **लक्ष्मीधरः** ।

४१ **मुण** प्रतिज्ञाने । मुणत्यरिवधम् ।

४२ **कुण** शब्दोपकरणयोः । कुणति वेणुः । कुणति दण्डः । वाद्यवादनस्योपकरणीभवतीत्यर्थः । आमन्त्रणे कथादौ । कूण सङ्कोचने चितादौ ।

४३ **शुन** गतौ । शुनति ।

४४ **द्रुण** हिंसागतिकौटिल्येषु । द्रुणति ।

४५ **घुण, घूर्ण** भ्रमणे । घुणति घूर्णति नौः ।

४६ **षुर** ऐश्वर्यदीप्त्योः । सुरति हरिः । सुरः ।

४७ **कुर** शब्दे । कुरति श्वा । कौटिल्ये **द्रुमश**पि ।

४८ **खुर** च्छेदने । खननविलेखनयोश्च **द्रुमे** । खुरति भूमिम् । खुरः ।

४९ **मुर** संवेष्टने । मुरति पाशेन रिपून् ।

५० **क्षुर** विलेखने । खनने च **द्रुमे** । क्षुरति भूमिम् ।

1 'कः । निपुणम् । अस्मा' । ग.घ

CC-0. In Public Domain. Digitization by eGangotri

५१ **घुर** भीमार्थशब्दयोः। घुरति। भीमो भवति, शब्दायते वेत्यर्थः। "जुघुरे चातिभैरवम्" इत्यत्र घुर भीमार्थ-शब्दयोरनुदात्तेदित्युक्त्वा "तेऽघोरिषुर्महाघोरम्" इत्यत्र घुरिस्तुदादि-रुदात्तेदिति **शङ्करेणोक्तेः** शप्यन्यत्र वा तङ्वान् घुरिरूह्यः।

५२ **पुर** अग्रगमने। पुरति विद्वान्।

५३ **वृहू** [1]उद्यमने। स चोन्मूलनम्। वृहति वृक्षम्। बकारादित्वपक्षो निरस्तः।

५४-५६ **तृहू, स्तृहू, तृन्हू** हिंसार्थाः। **स्तृन्हू** इत्यप्येके। तृहति। स्तृहति। तृंहति। स्तृंहति।

अत्र तृन्हेर्नोपधानाशनादृत्य तु शे नुमम्।
शस्य ङित्त्वान्नलोपेन तृहतीत्याह **माधवः**॥

तच्चिन्त्यम्। तृंहेः श्नमि च।

५७ **इष** इच्छायाम्। केचिदुदितमाहुः। तत् 'इषुगमी' ति 'तीषसहे' ति च विशेषणार्थम्। अनुदित्पाठिनां सूत्रद्वये ऽकारपाठः। इच्छति श्रियम्।

५८ **मिष** स्पर्धायाम्। मिषति हरिणा। मेषः। अयमुन्मील-नार्थोऽपि दृश्यते। उन्मिषति दृष्टिः।

५९ **किल** श्वैत्ये। श्वैत्यक्रीडनयोरित्येके। किलति पटः कृष्णश्च।

६० **तिल** स्नेहने। तिलति देहः।

६१ **चिल** वसने। चिलति पटम्। चेलम्।

६२ **चल** विलसने। चलति स्त्री।

1 'द्यमे' ग.घ

CC-0. In Public Domain. Digitization by eGangotri

६३ **इल** स्वप्नक्षेपणयोः। गतौ च **द्रुमे**। इलति श्रान्तः, शिलां वा। प्रेरणे णौ।

६४ **विल** संवरणे। विलति। क्षेपणे णौ।

६५ **बिल** भेदने। अस्याकर्मकार्थत्वं **स्वाम्याह**। बिलति भूमिः। णौ चायम्।

६६ **णिल** गह्वने। निलत्यटवी। गहनीभवतीत्यर्थः।

६७ **हिल** भावकरणे। हिलति स्त्री।

६८.६९ **शिल, षिल** उञ्छे। शिलति, सिलति।

७० **मिल** श्लेषणे। मिल (ळ) ति हरिणा। स्वरितेदग्रे।

७१ **लिख** अक्षरविन्यासे। लिखति ग्रन्थम्।

७२ **कुट** कौटिल्ये। **इतः कूडन्ताः कुटादयः**। कुटति।

७३ **पुट** संश्लेषणे। पुटति पद्मच्छदः। ग्रसादौ चायम्। संसर्गार्थः कथादौ।

७४ **कुच** सङ्कोचने। कुचति पद्मः।

७५ **गुज** शब्दे[1]। गुजति।

७६ **गुड** रक्षायाम्। प्रतिघाते च **द्रुमे**। गुडति। गुडि वेष्टने णौ।

७७ **डिप** क्षेपे। डिपति।

७८ **छुर** छेदने। छुरति। छुरिका।

७९ **स्फुट** विकसने। स्फुटति।

८० **मुट** आक्षेपप्रमर्दनयोः। मुटति।

८१ **त्रुट** छेदने। तच्च द्वैधीभावः। त्रुटति रज्जुः।

८२ **तुट** कलहकर्मणि। तुटति हरिणा।

1 'ब्दे अव्यक्त इत्येके। गुजति' ग.घ

CC-0. In Public Domain. Digitization by eGangotri

८३.८४ **पुड, चुड** छेदने। पुडति, चुडति।

८५ **जुड** बन्धने। जुडति।

८६ **कड** मदे। कडति।

८७ **लुठ** संश्लेषणे। लुठति हरिणा। लुड इत्येके। संवृतौ च द्रुमे।

८८ कृड घनत्वे। सान्द्रता तत्। कृडति दधि।

८९ **कुड** बाल्ये। सङ्घात इत्यप्येके। भक्षणे च द्रुमे कुडति कृष्णः इत्यादि।

९० **पुड** उत्सर्गे। **मुड** इत्येके। पुडति, मुडति दोषम्।

९१ **घुट** प्रतीघाते। घुटति।

९२ **तुड** तोडने। तुडति।

९३–९४ **थुड**, स्थुड संवरणे। **कुड छुड** इत्येके। थुडति, स्थुडति कुडति छुडति।

९५–९६ स्फुर, स्फुल सञ्चलने। स्फुर स्फुरणे, स्फुल सञ्चलने इत्येके। तत्र स्फुरणं शोभा। **स्फर** इत्यदुपधमेके। स्फुरति, स्फुलति स्फरति।

९७–९९ **स्फुड, चुड, ब्रुड** संवरणे। क्रुड इत्यप्येके। स्फुडति चुडति, ब्रुडति, क्रुडति। **कुड रुड** निमज्जने इति चैके। कुडति, रुडति जले*।

व्रश्चादय उदात्ता उदात्तेतः ॥ ११०॥

* 'अत्र पाठो बहुविधो दृश्यते' के

CC-0. In Public Domain. Digitization by eGangotri

१११ गुरी उद्यमने । उद्धरणं तत् । उद्‌गुरते खड्गम् । उदात्तोऽनुदात्तेत् ।

१ णू स्तवने । उवङ् । नुवति ।

२ धू विधूनने । धुवति हस्तम् । उदात्तौ ।

३ गु पुरीषोत्सर्गे । गुवत्यर्शसः ।

४ ध्रु गतिस्थैर्ययोः । ध्रुवति । ध्रुव इत्येके । अनजन्तत्वाद् ध्रुवितेत्यादाविट् भेदः । गुध्रू अनुदात्तौ । ध्रुव उदात्तः ।

णूप्रभृतयः परस्मैभाषाः । ॥ ११५ ॥

१ कुङ् आर्तशब्दे । कूङ् इत्येके । द्वयोः कुवते भीतः । ऊदन्तस्य सेट्त्वं भेदः । वृत् । कुटादिर्वृत्तः ।

२ पृङ् व्यायामे । स च प्रवृत्तिमात्रम् । प्रायेण व्याङ्पूर्वोऽयम् । व्याप्रियते पाके✿ ।

३ मृङ् प्राणत्यागे । म्रियते जन्तुः । मृ मरणे घटादौ ।

आत्मनेभाषाः अनुदात्ताः कूवर्जम् ॥ ११८ ॥

१.२ रि, वि गतौ । रियति । वियति ।

३ धि धारणे । गताविति द्रुमे । धियति वेणुम्, व्रजं च ।

४ क्षि निवासगत्योः । क्षियति गृहे, व्रजं च । **अनुदात्ताः ॥**

५ षू प्रेरणे । सुवति ।

६ कॄ विक्षेपे । किरति पांसून् ।

७ गॄ निगरणे । गिरति ग्रासम् ॥

रियत्यादयः परस्मैभाषाः ॥ १२५ ॥

✿'रीङि इयङि च रूपम्' के

CC-0. In Public Domain. Digitization by eGangotri

१ दृङ् आदरे। आद्रियते बन्धून्।

२ धृङ् अवस्थाने। धारणे च द्रुमे। ध्रियते पीठे, वेणु च।

अनुदात्तावात्मनेभाषौ ।। १२७ ।।

१ प्रच्छ ज्ञीप्सायाम्। तुक्। पृच्छति धर्मम्। वृत्। किरादिर्वृत्ताः। इतः शीयत्यन्ता उदात्तेतः अनुदात्ता विच्छिवर्जम्

२ सृज विसर्गे। विसर्ग उक्तः। सृजति विश्वम्। विसृजति दोषम्।

३ टुमस्जो शुद्धौ। मज्जति जले।

४ रुजो भङ्गे। रुजति रिपुम्। निष्पूर्वोऽयं व्याधिप्रशमने। नीरुजति मिताशी। हिंसार्थो ग्रसादौ।

५ भुजो कौटिल्ये। भुजति लता। मूलानि विभुजतीति सकर्मकोऽपि। श्नमि चायम्।

६ छुप स्पर्शे। प्रथमादिपाठो भाष्यनिरस्तः: छुपति देहम्।

७.८ रुश, रिश हिंसायाम्। रुशति। रिशति। आद्यो ग्रसादौ च।

९ लिश गतौ। लिशति।

१० स्पृश संस्पर्शने। स्पृशति देहम्। ण्यन्तोऽयं दाने। स्पर्शयति धनम्।

११ विच्छ गतौ। तुक्। 'गुपूधूपि–' (३-१-२८) इत्यायः। विच्छायति व्रजम्। ग्रसादौ चायम्।

१२ विश प्रवेशने। विशति पुरीम्।

CC-0. In Public Domain. Digitization by eGangotri

१३ **मृश** आमर्शने। स्पर्शनं तत्। मृशति देहम्।

१४ **णुद** प्रेरणे। नुदति। कर्त्रभिप्राये परस्मैपदार्थोऽस्य पुनः पाठः।

१५ **षद्लृ** विशरणगत्यवसादनेषु। सीदति घटो, व्रजं, देहश्च।

१६ **शद्लृ** शातने। शीयति खड्गम्✡।

पृच्छ्यादय उदात्तेतः अनुदात्ता विच्छिवर्जम्॥ १४३॥

१४४ **मिळ** सङ्गमे। **उदात्तः स्वरितेत्**। मिळति, मिळते जनः।

१ **मुच्लृ** मोक्षणे। इतः परं मुचादित्वान्नुम्। मुञ्चति, मुञ्चते गाम्।

२ **लुप्लृ** छेदने। लुम्पति। लुम्पते।

३ **विद्लृ** लाभे। विन्दति, विन्दते धनम्।

४ **लिप** उपदेहे। लिम्पति, लिम्पते भूमिम्। अस्य दहनार्थत्वमप्याह **शङ्करः**।

५ **षिच** क्षरणे। सिञ्चति, सिञ्चते भूमिम्।

मुचादयोऽनुदात्ताः स्वरितेतः। विदिः सेडित्येके॥ १४९॥

१५० **कृती** छेदने। उदात्त उदात्तेत्। कृन्तति। वेष्टने श्नमि। कृत संशब्दने णौ।

✡'सीदतिशीयत्योर्भौवादिकयोरपि रूपतौल्ये पुनराद्यस्येह पाठः सीदन्ती, सीदतीति नुम्विकल्पार्थं उदात्तार्थश्च। परस्य तु 'शदेः शितः' (१-३-६०) इति तङुक्तेः शत्रभावादुदात्तार्थ एव। सीदतेर्ज्वलादौ पाठस्तु – साद इति णार्थः'।

CC-0. In Public Domain. Digitization by eGangotri

१५१ **खिद** परिघाते। **अनुदात्त उदात्तेत्**। खिन्दति रिपुम्।

१५२ **पिश** अवयवे। **उदात्त उदात्तेत्**। पिंशति मांसम्। अवयवशः करोतीत्यर्थः। अयं दीपनायामपि। पिंशति तनुम्॥ १५२॥

वृत्। **तुदादयो मुचादयश्च वृताः** ॥ १४०८॥

॥ इति तुदादयः॥

रुधादयः

१ **रुधिर्** आवरणे। रुणद्धि, रुन्धे गाम्।

२ **भिदिर्** विदारणे। भिनत्ति, भिन्ते वेणुम्।

३ **छिदिर्** द्वैधीकरणे। छिनत्ति, छिन्ते तरुम्। छेद द्वैधीकरणे कथादौ।

४ **रिचिर्** विरेचने। रिणक्ति, रिङ्क्ते पात्रीम्। वियोजनसम्पर्चनयोर्युजादौ।

५ **विचिर्** पृथग्भावे। विनक्ति, विङ्क्ते पदार्थान्।

६ **क्षुदिर्** सम्पेषणे। क्षुणत्ति, क्षुन्ते माषान्।

७ **युजिर्** योगे। युनक्ति, युङ्क्ते हरिणा मतिः। **रुधादयोऽनुदात्ताः**।

८ **उछृदिर्** दीप्तिदेवनयोः। देवनं क्रीडा। छृणत्ति हरिरित्यादि। दीप्तिवमनयोरित्येके। छृणत्ति भुक्तम्। एवं छृन्ते। छृदी सन्दीपने युजादौ। छर्द वमने णौ।

९ **उतृदिर्** हिंसानादरयोः। तृणत्ति, तृन्ते। **उदात्तौ**। **रुधादयः स्वरितेत इरितश्च**।

१० **कृती** वेष्टने। उदात्त उदात्तेत्। कृणत्ति पटम्।

११ **ञि इन्धी** दीप्तौ। दीपनायामपि[1]। उदात्तोऽनुदात्तेत्। इन्धेऽग्निरग्निं च।

1 'पि। इन्धे' घ

CC-0. In Public Domain. Digitization by eGangotri

१ खिद दैन्ये । खिन्ते ।

२ विद विचारणे । विन्ते [1]धर्मम् ।

अनुदात्तावनुदात्तेतौ ॥ १३ ॥

१ शिष्लृ विशेषणे । विशिनष्टि गुणान् ।

२ पिष्लृ संचूर्णने । पिनष्टि माषाम् ।

३ भञ्जो आमर्दने । भनक्ति शाखाम् ।

४ भुज पालनाभ्यवहारयोः । भुनक्ति लोकान् । भुङ्क्तेऽन्नम् 'भुजोऽनवने' (१-३-६६) इति तङ् । अनुभवेऽप्यनवनत्वात् तङ् । भुङ्क्ते प्रियाम् ।

शिषादयोऽनुदात्ता उदात्तेतः ॥ १७ ॥

१.२ तृह, हिसि हिंसायाम् । तृणेढि✲ । हिनस्ति ।

३ उन्दी क्लेदने । उनत्ति भूमिम् ।

४ अञ्जू व्यक्तिमृक्षणगतिषु । व्यक्तिः प्रकाशनम् । मृक्षणं मिश्रीकरणम् । व्यनक्त्यर्थम् । अनक्त्यङ्गं तैलेन ।

५ तञ्चू संकोचने । तञ्जू इत्येके । तनक्ति पटीम् । आतनक्ति क्षीरम् ।

६ ओविजी भयचलनयोः । विनक्ति ।

७ वृजो वर्जने । वृतो च द्रुमे । वृणक्ति । वृची वरण इत्येके । वृणक्ति ।

८ पृचो सम्पर्के । सकर्मकोऽयं भट्टिनोक्तः । पृणक्ति गोपीः कृष्णः ।

तृहादय उदात्ता उदात्तेतः ॥ २५ ॥

वृत् । रुधादयो वृत्ताः। अवृत्कृता इत्येके । तेन लुनक्ति इति सिद्धम् ॥ १४३३ ॥

॥ इति रुधादयः ॥

तनोत्यादयः

१ तनु विस्तारे । तनोति, तनुते वा पटम् । विस्तारयती·

1'धर्मम् । इन्ध्यादयोऽनुदात्ता अनुदात्तेतः । शिष्लृ' घ

✲'तृणह इम्' के

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थः। अयं कृञर्थेऽपि। तनोति हरिसेवाम्। तनु श्रद्धोपकरणयोर्युजादौ।

२ षणु दाने। सनोति, सनुते।

३.४ क्षणु हिंसायाम्। क्षिणु च। क्षणोति, क्षणुते। क्षेणोति, क्षेणुते।

५ ऋणु गतौ। अर्णोति, अर्णुते।

६ तृणु अदने। तर्णोति, तर्णुते।

७ घृणु सन्दीपने। घणु इत्येके। घर्णोति, घर्णुते, घणोति घणुतेऽग्निः। उप्रत्यये कृञ एव गुण इत्यापिशल्युक्तेः संज्ञापूर्वकत्वेन गुणस्यानित्यत्वाद्वा क्षिण्वादीनां चतुर्णां विकरणकृतो गुणो नेत्येके। क्षिणोति, क्षिणुते, तृणोति तृणुते। ऋणोति, ऋणुते। घृणोति घृणुते। क्षण्वादयो नोपदेशाः। णत्वं तु रषाभ्यां जातम्। तेन [1]चङ्क्षन्ति, [2]चेक्षेन्ति इत्यादौ नकारश्रुतिः। तृणिर्णोपदेश इत्येके क्षण्वादयः सर्वेऽपि णोपदेशाश्च द्रुमे। तदा चङ्क्षण्टि इत्यादि।

तनादय उदात्ता स्वरितेतः।

१ वनु याचने। वनुते।

२ मनु अवबोधने। मनुते धर्मम्।

उदात्त वनुदात्तेतौ। वनुः परस्मैपदीति चान्द्राः। वनोति॥ ९॥

१० डुकृञ् करणे। अनुदात्त उभयतोभाषः। करोति कुरुते घटम्। प्रकरोत्यधिकरोतीत्यारम्भे। अपकरोत्युपकरोतीति प्रातिकूल्यानुकूल्ययोः। निष्करोतीति प्रायश्चित्ते। निराकरोतीति प्रत्याख्याने। व्याकरोतीति व्याख्याने। इत्यादिष्वर्थभेदा उपसर्गवशाद् द्रष्टव्याः॥ १०॥ १४४३॥

॥ इति तनादयः॥

क्र्यादयः

१ डुक्रीञ् द्रव्यविनिमये। क्रीणाति, क्रीणीते पटम्।

1 'चाङ् क्षन्ति,' ग.घ 2 'चेक्षेयन्ति' घ

CC-0. In Public Domain. Digitization by eGangotri

२ **प्रीञ्** तर्पणे, कान्तौ च। कान्तिः कामना। प्रीणाति, प्रीणीते हरिं राधा। तर्पयति, कामयते इति वार्थः।

३ **श्रीञ्** पाके। श्रीणाति, श्रीणीते।

४ **मीञ्** हिंसायाम्। मीनाति, मीनीते।

५ **षिञ्** बन्धने। सिनाति, सिनीते गाम्।

६ **स्कुञ्** आप्रवणे। आप्रवणमुक्तार्थम्। '[1]आस्कुनाच्चेषु द्विभिः इत्यत्रावरण इत्येके। 'स्तन्भुस्तुन्भु–'. (३-१-८२) इति वा श्नुः। [2]स्कुनाति, स्कुनुते वा नद्याम्, वानरो, भारं, देहं च।

७ **युञ्** बन्धने। युनाति, युनीते।

क्र्यादयोऽनुदात्ता उभयतोभाषाः।

१ **क्नूञ्** शब्दे। क्नूनाति, क्नूनीते।

२ **द्रूञ्** हिंसायाम् इत्यप्येके। गतौ च **द्रुमे**। द्रूणाति, द्रूणीते। पूञ् पवने। 'प्वादीनां ह्रस्वः' (७–३–८०)। पुनाति, पुनीते व्रीहीन्।

३ **लूञ्** छेदने। लुनाति, लुनीते व्रीहीन्।

४ **स्तॄञ्** छादने। स्तृणाति, स्तृणीते तृणैर्भूमिम्।

५ **कॄञ्** हिंसायाम्। कृणाति, कृणीते।

६ **वॄञ्** वरणे। भरण इति **द्रुमे**। वृणाति, वृणीते।

७ **धूञ्** कम्पने। धुनाति, धुनीते शाखाम्।

क्नूञादय उदात्ता उभयतोभाषाः॥ १४॥

१ **शॄ** हिंसायाम्। शृणाति।

२ **पॄ** पालनपूरणयोः। पृणाति।

३ **स्पॄ** हिंसायाम्। स्पृणाति।

४ **वॄ** वरणे। वृणाति। बॄ वरणभरणयोः इत्येके। बृणाति।

1 'अस्कुना' घ

2 'स्कुनाति स्कुनीते स्कुनोति स्कुनुते वा नद्यां वानरो' घ

CC-0. In Public Domain. Digitization by eGangotri

५ भ्ऋृ [1]भर्त्सने। भरण इत्येके। भृणाति।
६ म्ऋृ हिंसायाम्। मृणाति।
७ द्ऋृ विदारणे। भये च द्रुमे। दृणाति।
८ ज्ऋृ वयोहानौ। धॄ इत्येके। जृणाति, धृणाति मुनिः। अत्र [2]ज्रो इति नरी* इति युजादावाह माधवः। ज्रिणाति (नरणाति)।
९ नॄ नये। नॄणाति गां वनम्।
१० कॄ हिंसायाम्। कॄणाति।
११ ॠ गतौ[3] दाघत्वादिजादेराम्। अराञ्चकार।
१२ गॄ शब्दे। गॄणाति कृष्णनामानि।
शॄप्रभृतय उदात्ताः परस्मैभाषाः॥ २६॥
१ ज्या वयोहानौ। श्नायां ङित्त्वाद् ग्रहिज्यादिप्रसारणे 'हलः' (६–४–२) इति दीर्घे प्वादिह्रस्वः। जिनाति।
२ री गतिरेषणयोः। रेषणं वृकशब्दः। रिणाति वृकः।
३ ली श्लेषणे। लिनाति हरौ।
४ व्ली वरणे। गतौ श्लेषणे च द्रुमे। व्लिनाति।
५ प्ली गतौ। प्लिनाति। वृत्। ल्वादयो वृत्ताः प्वादिस्तु गणान्तः।
६ व्री वरणे। गतौ च द्रुमे। व्रिणाति।
७ भ्री भये। भ्रिणाति। ल्वादित्वमप्यस्ति द्रुमे। भ्रीणः।
८ क्षीष् हिंसायाम्। क्षिणाति।

1 'भत्सने' ग.घा 2 ज्री 'इति नन्दी इति युजादावाह माधवः' ग.घ
3 'तौ ॠणाति। दीर्घ' ग.घ
*'नॄ इत्येतत्स्थाने' के।

CC-0. In Public Domain. Digitization by eGangotri

९ **ज्ञा** अवबोधने। जानात्यर्थम्⊗।

१० **बन्ध** बन्धने। 'अनिदितां–' (६–४–२४) इति। नलोपः। बध्नाति।

ज्यादयोऽनुदात्ताः परस्मैभाषाः ॥ ३६ ॥

३७ **वृङ्** सम्भक्तौ।

उदात्त आत्मनेभाषः।

वृणोते ऋत्विजम्। स्वीकरोतीत्यर्थः। सेवायां – वृणीते हरिम्।

१ **श्रन्थ** विमोचनप्रतिहर्षयोः। श्रथ्नाति कचम्। **प्रतिहर्षो न ज्ञातः।**

२ **मन्थ** विलोडने। मथ्नाति।

३ **ग्रन्थ** सन्दर्भे। **श्रन्थ** इत्यप्येके। ग्रथ्नाति, श्रथ्नाति मालाम्

४ **कुन्थ** संश्लेषणे। संक्लेशन इत्येके। कुथ्नाति देहे शत्रुं च। **कुथ** इत्येके। तत्र चुकोथेत्यादि भेदः।

५.६ **मृद** क्षोदे। सञ्चूर्णनं तत्। मृद्नाति पल्लवम्। **मृड** च क्षोद इति शेषः। सुखे चेत्येके। सुखन इत्यन्ये। ष्टुः। मृड्णाति पल्लवं, भक्तो, भक्तं च।

७ **गुध** रोषे। गुध्नाति कोपी।

८ **कुष** निष्कर्षे। स च बहिर्निस्सारणम्। कुष्णाति दाडिमं, कुसूलाद् व्रीहीन्, देहात् प्राणान् वा।

९ **क्षुभ** सञ्चलने। क्षुभ्नाति लता।

१०.११ **णभ, तुभ** हिंसायाम्। नभ्नाति, तुभ्नाति।

१२ **क्लिशू** विबाधने। क्लिश्नाति रिपुम्।

१३ **अश** भोजने। अश्नाति।

१४ **उध्रस** उञ्छे। उकार इदित्येके। अन्ये धात्वंशमाहुः। ध्रस्नात्युध्रस्नाति शालीन्।

१५ **इष** आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वाभीक्ष्ण्यम्। तच्च प्रकरणादिप्राप्तायाः क्रियाया इति ज्ञेयम्। शत्रून्निष्णाति।

⊗ 'ज्ञाजनोर्जा' इति दीर्घनिर्देशसामर्थ्यान्न प्वादिह्रस्वः'। के

CC-0. In Public Domain. Digitization by eGangotri

पुनःपुनर्भृशं वा निहन्तीत्यर्थः। एवं बुभुक्षित इष्णाति। पुनः पुनर्भुङ्क्ते। 'तीषसह–' (७-२-४८) इत्यत्रास्यापि ग्रहो वार्तिकमते*।

१६ **विष** विप्रयोगे। विष्णाति पापेन।

१७–१८ **प्रुष, प्लुष** स्नेहनसेचनपूरणेषु। प्रुष्णाति, प्लुष्णाति देहं, भूमिं, कुम्भं च। मोचनदाहयोरप्याह **शङ्करः**।

१९ पुष पुष्टौ। पुष्णाति श्रियम्।

२० मुष स्तेये। मुष्णात्यर्थम्।

२१ **खच** भूतप्रादुर्भावे। स च नितान्तोत्पत्तिः★। खच्नाति श्रीर्नृपस्य। भूतिशुद्ध्योरुत्पत्ताविति **द्रुमे**। खच्नाति भूतिर्भक्तस्य। खच्नाति शुद्धिश्चान्द्रायणिकस्य। उत्पद्यत इति द्वयोरर्थः। खव इत्येके। तत्रानुनासिकादौ श्नि परे ऊठ्✿। खौनाति श्रीः। **हेठ** च इत्यप्येके। हेठ्णाति श्रीः।

अन्थादय उदात्तेतः, विषिवर्जमुदात्ताश्च ॥ ५८ ॥

५९ ग्रह उपादाने। **उदात्तः स्वरितेत्**। गृह्णाति, गृह्णीते घटम् ॥ १५०१ ॥

॥ **इति क्र्यादयः** ॥

चुरादिः

१ **चुर** स्तेये। अकार उक्त्यर्थः। 'णिचश्च' (१-३-७४) इति तङ् चुरादेर्नेति मतं **माधवदूषितम्**। तेनोभयपदित्वमेव। चोरयति, चोरयतेऽर्थम्।

केचित् सर्वचुरादीनामनित्यण्यन्तता जगुः।
येषां विकल्पचिह्नं स्यात् तेषामेवेति **माधवः** ॥

1 'त्पत्तिः। चुत्वम्। खच्नाति' घ.
*'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः' इति वार्तिकम्' के
★ 'अतिक्रान्तोत्पत्तिरिति सिद्धान्तकौमुद्याम्। के ✿'च्छ्वोः शूडिति' के

CC-0. In Public Domain. Digitization by eGangotri

२ चिति स्मृत्याम् । चिन्तयति चिन्तयते कृष्णम् । णिच्य-निदितामिति नलोपाप्रसङ्गात् तन्निषेधार्थमिदित्त्वानुपयोगादिदितां णिजनित्यः । चिन्तति ।

३ यत्रि सङ्कोचने । यन्त्रयति, यन्त्रयते शाखाम् । यन्त्रति* । उत्तरत्रापि णिच उभयपदित्वं ज्ञेयम् ।

४ स्फुडि परिहासे । स्फुटि इत्येके । स्फुण्डयति स्फुण्डति, स्फुण्टयति[1] जळम् ।

५ लक्ष दर्शनाङ्कनयोः । लक्षयति हरिं, पटं च । चितादौ चायम् ।

६ कुद्रि अनृतभाषणे । कुद्र इत्येके । कुन्दयति, कुन्दति कोदयति वणिक् । ऋदित्त्वाच्चङ्यचुकोदत्* ।

७ लड (ल ळ) उपसेवायाम् । लाळयति नृपम् ।

८ मिदि स्नेहने । मिद इत्येके । मिन्दयति मिन्दति । मेदयति ।

९ ओलडि उत्क्षेपे । ओलण्डयत्योलण्डति शैलम् । ओकार इदित्येके । लण्डयति लण्डति । ओदित्त्वान्निष्ठानत्वम् । तत्सामर्थ्यात् तत्रानिट्त्वं च । लण्णः । अनुबन्धबलादिड्व्यवधानेऽपि नत्वमिति बोपदेवः । लण्डिनः ।

१० जल अपवारणे । जालयत्यातपम् ।

११ पीड अवगाहने । तच्च बाधनम् । बाधगाहयोरिति द्रुमे । पीडयति रिपुं नदीं च ।

1 ति स्फुण्टति ज' ग-घ.

*चिति स्मृत्यामितीदित्करणस्य सामान्यापेक्षज्ञापकत्वाभिप्रायेणास्य णिजभाव उदाहृत इति ज्ञेयम् । यन्त्रेत्यपि पठितुं शक्यत्वात् । तत्र नकारस्यानुपधात्वेनानिदितां हल इति लोपाप्रसक्तेः । के

* कुद्रीति सिद्धान्तकौमुदी' के.

CC-0. In Public Domain. Digitization by eGangotri

१२ **नट** अवस्पन्दने । तच्च नाट्येनार्थप्रकाशनम् । कथां नाटयति । उत्पूर्वोऽयं हिंसायाम् । उन्नाटयति शत्रो:★ । भ्रंशे च द्रुमे । नाटयति [1]घटः ।

१३ **श्रथ** प्रयत्ने । प्रख्यान इत्येके । प्रतिहर्षे इत्यन्ये । श्राथयति जेतुम्, कीर्तिश्च ।

१४ **बध** संयमने । **बन्ध**[2] इत्यन्ये । बाधयति बन्धयति गाम् ।

१५ **पृ** पूरणे । दीर्घोक्तिफलं परितेतोऽणिच्येव स्यादिति णिज्विकल्पः । पारयति परति कुम्भम् ।

१६ **ऊर्ज** बलप्राणनयोः । ऊर्जयति शूरो मूर्च्छितश्च ।

१७ **पक्ष** परिग्रहे । पक्षयत्यर्थम् ।

१८ **वर्ण** वर्णने । प्रेरणेऽप्येके । वर्णयति नृपं भृत्यं च । कथादौ चायम् ।

१९ **चूर्ण** प्रेरणे । चूर्णयति भृत्यम् । अस्य क्षोदनमप्यर्थः तदेव वा प्रेरणमित्युक्तम् । चूर्णयति माषान् । सङ्कोचेऽग्रे ।

२० **प्रथ** प्रख्याने । प्रक्षेपे च द्रुमे । प्रथयति नृपः शिलां च ।

२१ **पृथ** प्रक्षेपे । पथ इत्येके । पर्थयति, पाथयति ।

२२ **षम्ब** सम्बन्धने । **शम्ब** इत्येके । साम्ब इत्यन्ये । सम्बयति मुक्त्या भक्तं हरिः । एवं शम्बयति, साम्बयति । अन्त्यो दन्त्यादिः ।

२३ **भक्ष** अदने । भक्षयति ।

२४ **कुट्ट** [3]छेदनभर्त्सनयोः । पूरणयारित्येके । कुट्टयति । प्रतापने चितादौ ।

२५,२६ **पुट्ट**, **चुट्ट** अल्पीभावे । पुट्टयति, चुट्टयत्योदनः ।

२७,२८ **अट्ट**, **षुट्ट** अनादरे । अल्पीभावे च द्रुमे । अट्टयति, सुट्टयति ।

1 'घटम्' घ. 2 'इत्येके' ग.घ. 3 'अप्रदाने' घ.
★ 'जासिनिप्रहणनाटेति षष्ठी' । के

CC-0. In Public Domain. Digitization by eGangotri

२९ **लुण्ट** स्तेये। अनादरे च **द्रुमे**। लुण्टयति।

३०,३१ **शठ, श्वठ** असंस्कारगत्योः। संस्कारे च द्रुमे। आद्य आलस्ये च। शाठयति क्रियासु। शाठयति श्वाठयति[1] धियमधर्मो धर्मश्च। **श्वठि** इत्यप्येके। श्वण्ठयति, श्वण्ठति[2] धियमधर्मः। श्वठ सम्यगवभाषणे कथादौ।

३२,३३ **तुजि, पिजि** हिंसाबलादाननिकेतनेषु। दाने च **द्रुमे**। तुञ्जयति, तुञ्जति; पिञ्जयति, पिञ्जति गृहे। हिंसादावूह्यम्। **तुज, पिज** इत्येके। तोजयति, पेजयति **लजि, लुजि** इत्यप्यन्ये लञ्जयति, लञ्जति। लुञ्जयति, लुञ्जति।

३४ [3]**वि (पि) स** गतौ। वे (पे) सयति।

३५ **षान्त्व** सामप्रयोगे। सान्त्वयति गोपी।

३६,३७ **श्वल्क, वल्क** परिभाषणे। श्वल्कयति, वल्कयति।

३८ **ष्णिह** स्नेहने। स्नेहयति देहम्।

३९ **स्मिट** अनादरे। स्नेहे च **द्रुमे**। स्मेटयति। ष्मिङ् अनादरे इत्येके। ङित्त्वात्तङेव। स्माययते। **अट स्मिट** गतौ इत्यप्यन्ये। आटयति, स्मेटयति।

४० **श्लिष** श्लेषणे। श्लेषयति।

४१ **पथि** गतौ। पन्थयति, पन्थति।

४२ **पिच्छ** कुट्टने। पिच्छयति तरुम्।

४३ **छदि** संवरणे। छन्दयति, छन्दति।

४४ **श्रण** दाने। प्रायेण विपूर्वः। विश्राणयति।

४५ **तड** आघाते। शोभायां च **द्रुमे**। ताडयति।

४६,४८ **खड, खडि, कडि** भेदने। अन्त्यौ रक्षणे च **द्रुमे**। खाडयति। खण्डयति, खण्डति। कण्डयति, कण्डति।

1 'ति दुष्टो व्रजं मुनिश्च। श्वठि' घ. 2 'ति दुष्टो व्रजं च। श्वठ' घ.
3 'विस' ग,घ.

CC-0. In Public Domain. Digitization by eGangotri

४९ **कुडि** रक्षणे। कुण्डयति, कुण्डति।

५० **गुडि** वेष्टने। रक्षणे चैके। गुण्डयति, गुण्डति। कुठि इत्येके। अत्रकुण्ठयत्यवकुण्ठत्यङ्गम्।

५१ **खुडि** खण्डने। खुण्डयति, खुण्डति।

५२ **वटि** विभाजने। **वडि** इत्येके। वण्टयति, वण्टति, वण्डयति, वण्डति रिक्थम्।

५३ **मडि** भूषायाम् हर्षे च। मण्डयति, मण्डति। अस्य णिज्विकल्पं **माधवो** नैच्छत्।

५४ **भडि** कल्याणे। भण्डयति, भण्डति भक्तः।

५५ **छर्द** वमने। छर्दयति भुक्तम्।

५६.५७ **पुस्त, बुस्त** दानादरयोः। अनादरे च द्रुमे। आद्यो बन्दने च। पुस्तयति बुस्तयति।

५८ **चुद** सञ्चोदने। तच्च प्रश्नप्रेरणे★। चोदयति गुरुं धर्मम्। चोदयति भृत्यम्।

५९.६० **नक्क धक्क** नाशने। नक्कयति, धक्कयति।

६१.६१ **चक्क, चुक्क** व्यथने। **चिक्क** इति चैके। चक्कयति, चुक्कयति, चिक्कयति[1] व्याघ्रात्, विरही, पल्लवश्च।

६३ **क्षल** शौचकर्मणि। क्षाल (ळ) यति देहम्।

६४ **तल** प्रतिष्ठायाम्। तालयति भूमौ।

६५ **तुल** उन्माने। तोलयति स्वर्णम्।

६६ **दुल** उत्क्षेपे। दोलयति शैलम्।

६७ **पुल** महत्त्वे। पोलयति देहः।

६८ **चुल** समुच्छ्राये। चोलयति वृक्षः।

६९ **मूल** रोहणे। मूलयति वीरुत्।

1 'ति दुष्टात्। क्षल' घ. ★'प्रश्नः प्रेरणं चेति द्वन्द्वः' के.

CC-0. In Public Domain. Digitization by eGangotri

७०,७१ **कल, विल** क्षपे। **किल** इत्यप्येके। कालयति, वेलयति केलयति।

७२ **बिल** भेदने। बेलयति।

७३ **तिल** स्नेहने। तेलयति देहम्।

७४ **चल** भृतौ। चालयति भृत्यम्।

७५ **पाल** रक्षणे। पालयति [1]लोकम्।

७६ **लूष** हिंसायाम्। लूषयति।

७७ **शुल्प** माने। **शूर्प** इत्येके✿। शुल्पयति, शूर्पयति व्रीहीन्।

७८ **चुट** छेदने। चोटयति।

७९ **मुट** सञ्चूर्णने। मोटयति।

८०,८१ **पडि, पसि** नाशने। आद्यः सङ्घाते च **द्रुमे**। पण्डयति, पण्डति। पंसयति, पंसति।

८२,८३ **वज मार्ग** संस्कारगत्योः। **व्रज** इत्येके। वाजयति, मार्गयति, व्राजयति केशान्। मार्गसंस्कारो धात्वर्थ इत्यन्ये। तत्र वाजयति पन्थानम्। **मार्ग** अन्वेषणे युजादौ। मृगेति कथादौ।

८४ **शुल्क** सर्जने। आर्जनं तत्। वर्जनभाषणयोश्च **द्रुमे**। शुल्कयत्यर्थमित्यादि।

८५ **चपि** गत्याम्। चम्पयति, चम्पति।

८६ **क्षपि** क्षान्त्याम्। क्षम्पयति, क्षम्पत्यपराधम्।

८७ **क्षजि** कृच्छ्रजीवने। क्षञ्जयति, क्षञ्जति। (निस्स्वः)

८८,८९ **श्वर्त** गत्यां च; **श्वभ्र** च। श्वर्तयति, श्वभ्रयति व्रजम्; निस्स्वश्च। अन्त्यो विले च **द्रुमे**। श्वभ्रयति भूः। विलीभवतीत्यर्थः।

इतः परं सप्त मितः।

९० **ज्ञप** मिच्च। अस्य ज्ञानज्ञापने अर्थाविति स्थितम्।

1 'ति। ऌष' ग,घ. ✿'शुल्ब इत्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

वृद्धौ पुर्नमित्त्वाद्‌ध्रस्व:। ज्ञपयति धर्मं स्वयम्। ज्ञपयति धर्मं शिष्यम्। अस्य वा मित्त्वं द्रुमे। ज्ञापयति धर्मं स्वयमित्यादि।

९१ **यम** च परिवेषणे। तच्चात्र वेष्टनम्। चान्मिदित्यनुषङ्गः पटं यमयति।

९२ **चह** परिकल्कने। चहयति दुष्टः। **चप** इत्येके। तस्य वा मित्त्वं द्रुमे। चपयति, चापयति।

९३ **रह** त्यागे। रहयति।

९४ **बल** प्राणने। बलयति नरः।

९५ **चिञ्** चयने। णिच्युभयपदित्वेन ञित्त्वफलाभावादस्य णिज् विकल्प:। तत्र णिचि 'चिस्फुरोर्णौ (६-१-५४) इति वा आत्वे पुक्। अन्यत्र★ वृद्धिः। उभयत्र मित्त्वाद् ध्रस्वः। चपयति, चययति धनम्। अनात्वे वा मित्त्वं द्रुमे। चाययति। अणिचि ञित्त्वा-च्चयति, चयते।।

मितो गता:।

नान्ये मितोऽहेतौ। अहेतुमण्ण्यन्तेभ्योऽन्ये मितो न स्युः। तेन चुरादिष्वमन्तानां मित्त्वं न*।

९६ **घट्ट** चलने। घट्टयति शाखाम्।

९७ **अस्त** संघाते। अस्तयति।

९८ **खट्ट** संवरणे। खट्टयति।

९९,१०१ **षट्ट**, **स्फिट्ट**, **चुबि** हिंसायाम्। सट्टयति, स्फिट्ट-यति, चुम्बयति, चुम्बति। आद्यो बलदाननिवासेषु च द्रुमे। अन्त्य-श्चुम्बने च। **व्यय** व्ययक्षये। इति चैके। आद्यः प्रेरणे च द्रुमे। व्याययति, व्यापयति इति चार्थः।

१०२ **पूल** सङ्घाते। पूलयति।

१०३ **पुंस** अभिवर्धने। पुंसयति श्रियम्।

★'णिचि आत्वाभावे' के.

* 'पाक्षिकेण चपयतिना सह मितः सप्त। अत्र पाक्षिकाणां सर्वेषामपि धातूनामनङ्कनं बोध्यम्' के

CC-0. In Public Domain. Digitization by eGangotri

१०४ **टकि** बन्धने। टङ्कयति, टङ्कति।

१०५ **धूस** कान्तिकरणे। धूष इत्येके। धूश इत्यन्ये। धूसयति, धूषयति, धूशयत्यलङ्कारः।

१०६ **कीट** वर्णे। कीटयति पटः।

१०७ **चूर्ण** सङ्कोचने। चूर्णयति हस्तम्।

१०८ **पूज** पूजायाम्। पूजयति।

१०९ **अर्क** स्तवने। तापन[1]त्यार्द्रुमे। अर्कयति हरिम्, स्वर्णं, व्रजं च।

११० **शुठ** आलस्ये। शोठयति रोगी।

१११ **शुठि** शोषणे। शुण्ठयति शुण्ठति व्रीहीन्।

११२ **जुड** प्रेरणे। जोडयति।

११३,११४ **गज, मार्ज** शब्दार्थौ। [2]**मर्च(र्व)** इति चैके। गाजयति, मार्जयति, [3]मर्च (र्व) यति। मार्जिः शुद्धौ च द्रुमे। मार्जयति भुवम्।

११५ **घृ** प्रस्रवणे। घारयति धारा। स्रावण इत्येके[4] घारयति धाराम्। अभिघारयत्याज्येन चरुम्। छादने च द्रुमे।

११६ **पचि** विस्तारवचने। विस्तारमात्रे च द्रुमे। प्रपञ्चयति प्रपञ्चति कथां, पटं च।

११७ **तिज** निशातने। तेजयति खड्गम्।

११८ **कॄत** संशब्दने। 'उपधायाश्च' (७-१-१०१) इतीत्वम्। कीर्तयति नामानि। ॠदुपधाच्चाक्लृपिचृतेः (३-१-११०) इत्यत्र तपरत्वेन ॠदुपधस्य व्यावर्त्यत्वात् णिचि तु ॠदुपधत्वाभावादस्य णिज्विकल्पः। कीर्तति।

११९ **वर्ध** छेदनपूरणयोः। वर्धयति।

1 'त्योश्च द्रुमे' घ 2 'मर्वति' ग.घ 3 'मर्वयति' ग,घ
4 'के। अभि' घ

CC-0. In Public Domain. Digitization by eGangotri

१२० **कुबि** आच्छादने। **कुभि** इत्येके। कुम्बयति, कुम्बति। कुम्भयति कुम्भति।

१२१,१२२ **लुबि, तुबि** अदर्शने। अर्दन इत्येके। लुम्बयति लुम्बति; तुम्बयति, तुम्बति घट:, शत्रु च।

१२३ **ह्लप** व्यक्तायां वाचि। **क्लप** इत्येके। ह्लापयति, क्लापयति।

१२४ **चुटि** छेदने। चुण्टयति, चुण्टति।

१२५ **इल** प्रेरणे। एलयति।

१२६ **मृक्ष** म्लेच्छने। मृक्षयति बटु:। म्यक्ष, म्रक्ष छेदने इति चैके। म्यक्षयति, म्रक्षयति।

१२७ **म्लेच्छ** अव्यक्तायां वाचि। म्लेच्छयति बटु:।

१२८,१२९ **ब्रूस, बर्ह** हिंसायाम्। ब्रूसयति, बर्हयति। गर्द, गज शब्दे। **गर्ध** अभिकाङ्क्षायाम् इति चैके। गर्दयति गर्जयति, गर्धयति।

१३० **गुर्द** पूर्वनिकेतने। पूर्वनिकेतनं पूर्वव्यापार इत्येके। निवासपूर्वभाव इत्यन्ये। अस्य दीर्घविकल्प: क्रीडार्थत्वं चास्ति द्रुमे। गूर्दयति पटु:। पूर्वं व्याप्रियत इत्यर्थ[1]:। एवं गूर्दयति विद्वान्। प्रथमं निवसतीत्यर्थ:। गूर्दयति हरि:। एवं गुर्दयति। पूर्वपूर्वनिकेतने [2]इत्येके। अर्थ: प्रागुक्त एव। 'उपधायां च' (८-२-७८) इति दीर्घ:। पूर्दयति पटुर्विद्वांश्च। पूरणे च द्रुमे।

१३१ **जसि** रक्षणे। मोक्षण इत्येके। जंसयति, जंसति।

१३२ **ईड** स्तुतौ। ईडयति।

१३३ **जसु** हिंसायाम् जासयति रिपो:*। क्त्वायामिड्विकल्पार्थादुदित्करणादस्य णिजनित्य:। जसति।

1 'र्थ:। गूर्द' घ 2 'इत्यप्येके'। ग

*'जासिनिप्रहण–' इति षष्ठी। के

CC-0. In Public Domain. Digitization by eGangotri

१३४ पिडि सङ्घाते । पिण्डयति, पिण्डत्योदनः ।

१३५ रुष रोषे । रुट इत्येके । रोषयति, रोटयति ।

१३६ डिप क्षेपे । डेपयति ।

१३७ ष्टूप समुच्छ्राये । स्तूपयति तरुः । दन्त्यादिर्द्रुमणौ । द्वौ च द्रुमश्यनि ।

आकुस्मादात्मनेपदिनः । कुस्मधातुपर्यन्तं णिच्यात्मनेपदिन एव ।

१ चित सञ्चेतने । तच्च ज्ञानम् । चेतयतेऽर्थम् ।

२ दशि दंशने । दंशयते भक्ष्यम् । अत्राकुस्मीयस्तङ् णिज्योग एवेतीदित्त्वाण्णिजभावे तङ् न । दंशति ।

३ दसि दंसनदर्शनयोः । दस इत्येके । दंसनं वर्मग्रहणम् । दंसयते, दंसति, दासयते याद्धा हरिं च । दंशनदर्शनयोरित्येके । दंसयते सर्पः ।

४,५ डप, डिप सङ्घाते । डापयते, डेपयते ।

६ तत्रि कुटुम्बधारणे । तन्त्रयते, तन्त्रति गृही* । कुटुम्ब इति पृथग्धातुरित्येके । कुटुम्बयतेऽर्थम् ।

७ मत्रि गुप्तभाषणे । मन्त्रयते, मन्त्रति प्रियाम्* ।

८ स्पश ग्रहणसंश्लेषणयोः । स्पाशयतेऽर्थं, बन्धुभिश्च ।

९,१० तर्ज, भर्त्स तर्जने । तर्जयते, भर्त्सयते । "तर्जयन् वज्रपणिः" इत्याद्यतङ् तु घञन्तात् 'तत्करोति' इति णौ ।

११,१२ बस्त गन्ध अर्दने । बस्तयते, गन्धयते । अन्त्यः कथादौ च ।

१३ किष्क हिंसायाम् । हिष्क इत्येके । किष्कयते, हिष्कयते ।

१४ निष्क परिमाणे । निष्कयते व्रीहीन् ।

१५ लल ईप्सायाम् । लाल(ळ)यते श्रियम् ।

'यन्त्रतीत्युदाहरणे यदुक्तं तदत्रापि तुल्यम् । के 'प्राग्वत् के

CC-0. In Public Domain. Digitization by eGangotri

१६ **कूण** सङ्कोचने। कूणयते दृशम्।

१७ **तूण** पूरणे। तूणयते शरधिं शरैः। तूणीरः। द्वावपि सङ्कोचनार्थौ **द्रुमकथादौ**, अन्त्यो **द्रुमणौ** च।

१८ **भ्रूण** आशंसायाम्। शङ्कायां च **द्रुमे**। भ्रूणयते पुत्रम्।

१९ **शठ** श्लाघायाम्। शाठयते।

२० **यक्ष** पूजायाम्। यक्षयते।

२१ **स्यम** वितर्के। स्यामयतेऽर्थान्।

२२ **गूर** उद्यमने। गूरयतेऽसिम्।

२३.२४ **शम लक्ष** आलोचने। शामयते, लक्षयतेऽर्थम्।

२५ **कुत्स** अवक्षेपणे। कुत्सयतेऽरिम्।

२६ **गल** स्रावणे। गालयते धाराम्।

२७ **भल** आभण्डने। भालयते शालीन्। सञ्चिनोतीत्यर्थः।

२८ **कूट** अप्रदाने। कूटयते धनम्। अप्रसाद इत्येके। कूटयते कुटुम्बी। **कुट कुट्ट** प्रतापने। इत्येके। कोटयते, कुट्टयते स्वर्णम्।

२९ **वञ्चु** प्रलम्भने। वञ्चयते वटुम्। उदित्त्वाद् वञ्चति। ऊदिदित्येके। तन्मते त्वणिचि सर्वत्र ड्विकल्पश्च।

३० **वृष** शक्ति[1]सम्बन्धने। तच्च गर्भाधानसामर्थ्यम्। शक्तिसम्बन्ध इत्येके। ऐश्वर्ये च **द्रुमे**। वर्षयते युवा, शूरः कृष्णश्च।

३१ मद तृप्तियोगे। मादयते भुक्तः। तर्पणशुद्धावित्येके। (?) मादयते हरिं भक्तः।

३२ **दिवु** परिकूजने। उदित्त्वाद्वा णिच्। देवयते देवति।

३३ **गॄ** विज्ञाने। विज्ञापन इति **द्रुमे**। गारयते गरति शास्त्रार्थं गुरुः, शिष्यं च*।

1 'क्तिबन्धने' ध * 'दीर्घोक्तेर्णिज्विकल्पः' के

CC-0. In Public Domain. Digitization by eGangotri

३४ **विद** वेदनाख्याननिवासेषु। परिवादे चैके। वेदयतेऽर्थ कथां [1] गृहं द्वेष्यँ च।

३५ **स्तन** स्तम्भे। गर्वे इति **द्रुमे**। मानयते भीत्या, शूरश्च।

३६ **यु** जुगुप्सायाम्। यावयते पापात्।

३७ **कुस्म नाम्नो वा**। कुस्मेति कुत्सितस्मयनार्थो धातुरत्र पठितव्यः। तस्माण्णिचि तङि कुस्मयते जळः[2]। कुस्ममिति नामपदाद्वा तत् सिध्यति। कुस्मं कुत्सितस्मयनम्। तत् करोति कुस्मयते इति। ननु नाम्नो वेत्युक्तिः कुस्ममिति नामपदे सिद्ध एव स्यादित्याशङ्क्य परिहराति **भीमसेनः 'कुस्ममिति दृष्टम्'** इति। कुपूर्वात् स्मयतेः 'अन्येष्वपि दृश्यते' (३-२-१०१) इति भावे डान्तं कुस्मपदं दृष्टमित्यर्थः। ननु कुपूर्वस्मिङ्धातोरेव कुस्मयत इति सिद्धेः कुस्मधातुरेव किमर्थमिति शङ्कते-**'कुस्मयतिरकारितमिति चेत्'** इति। कारितमिति हेतुमण्णिचः संज्ञा। इह तु णिज्मात्रमुक्तम्। अणिजन्त एव कुस्मयतेशब्दोऽस्तु. को दोष इत्यर्थः। परिहरति- **'कोर्नित्यसमासत्वादुपसर्गस्य च बाह्यत्वात् कारितमेव'** इति। कुस्मयतेशब्दे हि कुस्मशब्दयोर्नित्यसमास इष्टः। तथा प्रकुस्मयत इति कुशब्दाद् बहिरुपसर्गयोग इष्टः। तद् द्वयं णिजन्तत्व एव स्यात्। कुपूर्वस्मयतौ हि कुशब्दस्य तिङन्तेन सह समासाभावात् कदाचिद् व्यवहितोऽपि प्रयोगः [3]स्यादिति न नित्यसमासः स्यात्। तथोपसर्गाणां स्मिङः पूर्वत्वात् कुप्रस्मयत इति प्राप्नोति। चकारादन्येऽपि दोषाः। अणिजन्तत्वे हि कुस्मयाञ्चकारेत्याम्, चुकुस्मयिषत इति कोर्द्वित्वं, अचुकुस्मतेति चङ्, कुस्मनेति युच्, कुस्मयितेतीट् कुस्मयित्वेति ल्यबभाव इत्यादि न स्यात्। तस्माण्णिजन्तमेव। कुस्म बुद्धिदर्शने इति **द्रुमे**। कुस्मयते नृपः। बुद्ध्या सर्वं पश्यतीत्यर्थः॥

आकुस्मीया गताः॥

इतः परं विकरणान्तरोक्ता एवोच्यन्ते।

1 'गृहे' घ. 2 'जळम्' घ. 3 स्यात्' तथोप' घ.

CC-0. In Public Domain. Digitization by eGangotri

१ **चर्च** अध्ययने। चर्चयति चर्चयते वेदम्।

२ **बुक्क** भषणे। बुक्कयति श्वा।

३ **शब्द** शब्दक्रियायाम्। शब्दयति भेरी। सोपसर्गस्त्वयमाविष्कृताविति द्रुमे। प्रतिशब्दयति भावम्।

४ **कण** निमीलने। एकनेत्रनिमीलने चेदम्। काणयति दृशम्।

५ **जभि** नाशने। जम्भयति, जम्भति।

६ **षूद** क्षरणे। सूदयत्यम्भः।

७ **जसु** ताडने। उदित्त्वाद् वा णिच्। जासयति जसति।

८ **पश** बन्धने। पाशयति। कथादौ चायम्।

९ **अम** रोगे। आमयति देहस्य रोगः।

१०·११ **चट स्फुट** भेदने। चाटयति, स्फोटयति तरुम्। गणोक्तत्वेन चुरादिणोः क्वचिदनित्यत्वाद् विचटत्योदनः।

१२ **घट** संघाते। भेदने चैके। घाटयति।

हन्त्यर्थाश्च। हन्त्यर्थाश्च स्वार्थे णिचं भजन्तीत्यर्थः। घातयति, हिंसयति वा रिपुम्। चट, स्फुट, घटानामपि हन्त्यर्थत्वमिष्यते। चाटयति रिपुमित्यादि। दीप्त्यर्थानामपि स्वार्थणिजन्तत्वमस्तीति द्रुमे। दीपयति, द्योतयति वाग्निरित्यादि।

१३ **दिवु** मर्दने। परिकूजन इत्येके। देवयति, देवति।

१४ **अर्ज** प्रतियत्ने। सतो गुणान्तराधानं तत्। अर्जयति केशान्। आर्जनेऽप्यस्ति। अर्जयत्यर्थम्।

१५ **घुषिर्** विशब्दने। शब्देन स्वाभिप्रायप्रकाशनं तत्। स्तुतौ च द्रुमे। अस्य णिज्विकल्पो भाष्योक्तः। घोषयन्ति घोषन्ति वा याचकाः⊗।

⊗'घुषिरविशब्दन' इति सूत्रेऽविशब्दन इति निषेधाल्लिङ्गादनित्योऽस्य णिजिति सिद्धान्तकौमुदी। अस्य नित्यणिजन्तत्वेऽस्माद्व्यहितपरा निष्ठा न सम्भवति। अतोऽविशब्दनार्थाद् भौवादिकादेव निष्ठाया इण्निषेधप्रसक्तेरविशब्दन इत्येतद् व्यर्थं सदस्य णिज्विकल्पं ज्ञापयतीति तदाशयः। के

CC-0. In Public Domain. Digitization by eGangotri

१६ **आङः क्रन्द सातत्ये**। आङ्पूर्वक्रन्दिः सातत्ये णिच भजते। शब्दक्तयोराह्वानरोदनयोः सातत्यं चेदम्। आक्रन्दयति पुत्रम् दुःखी च। केचिद् घुषिशेषत्वेन आङः परो घुषिः। [1]क्रन्दिः सातत्ये णिचं भजत इति व्याख्यन्। आघोषयति[2]।

१७ **लस** शिल्पयोगे। **लष** इत्येके। लासयति, लाषयति वा स्थूणाम्। शिल्पेन युनक्तीत्यर्थः। शिल्पोपयोग इत्येके लासयति तूलिकाम्। शिल्पे उपयुङ्क्त इत्यर्थः।

१८ **तसि भूष** अलङ्कारे। वतंसयति, वतसति भूषयति वाङ्गम्। 'वष्टि **भागुरि**' रित्यल्लोपः।

१९ **मोक्ष** असने। मोक्षयति शरान्।

२० **अर्ह** पूजायाम्। अर्हयति।

२१ **ज्ञा** नियोगे। आङ्पूर्व एवायम्। आज्ञापयति भृत्यम्।

२२ **भज** विश्राणने। भाजयति धनम्।

२३ **शृधु** प्रसहने। शर्धयति, शर्धति शत्रुम्।

२४ **यत** [3]निकारोपस्कारयोः। परिभवसंस्कारौ तौ। **खेदे च द्रुमे**। यातयति शत्रुं, केशान्, निरस्वश्च। निसश्च। धान्य-धनयोः प्रतिदाने। ऋणं निर्यातयति।

२५ **वस** स्नेहनच्छेदापहरणेषु। वासयति देहं, तरुं, धनं च। उपहरणेष्विति पाठे वासयति बलिम्।

२६ **चर** संशये। असंशये च द्रुमे। विचारयति शास्त्रार्थम्।

२७ **च्यु** हसने। सहन इत्येके। च्युस इत्यन्ये। च्यावयति[4], च्योसयति।

२८ **भुवोऽवकल्कने**। अस्यावकल्कने णिच् स्यात्। तच्च मिश्रीकरणम्। भावयति दध्ना सक्तून्। अन्ये तु — चिन्तने,

1 'क्रन्दः सात' ग·घ 2 'ति दुःखी' ग·घ
3 'निराकारो' ग·घ 4 'ति च्यवति च्यो' ग

CC-0. In Public Domain. Digitization by eGangotri

विपाचनेऽत्र कल्पने वेत्याहुः। भावयति हरिम्। तपसा भावयत्यात्मानम्। विपक्वीकरोतीत्यर्थः। सम्भावयति शास्त्रार्थम्। युक्तियुक्तं करोतीत्यर्थः।

२९ **कृपेश्च।** मिश्रीकरणे णिच् स्यात्। कल्पयति सक्तून्। कृपेः स्वार्थ एव णिजित्येके। [1]स च सामर्थ्यम्। कल्पयति भोक्तुम्।

३०, ३१ **रक, लग** आस्वादने। आद्योऽपि गान्त इत्येके। रघ, लघ इत्यन्ये। राकयति, लागयति, राघयति, लाघयति वा क्षीरम्। आद्यास्त्रयो गत्यर्थाश्च **द्रुमे।**

३२ **अञ्चु** विशेषणे। व्यावर्तनं तत्। अञ्चयत्यञ्चति पदार्थान्। अन्येभ्यो[2]ऽपि विशेषमुक्त्वा व्यावर्तयतीत्यर्थः।

३३ **लिगि** चित्रीकरणे। लिङ्गयति, लिङ्गति पटम्।

३४ **मुद** संसर्गे मोदयति[3] हरिणा।

३५ **त्रस** धारणे। तच्च ग्रहणम्, [4]वारणं वा। द्रुमे तु वारणमेव। त्रासयति।

३६ **उध्रस** उञ्छे। **क्षेपे च द्रुमे।** उकार इदित्येके। उध्रासयति व्रीहीन् ध्रासयति।

३७ **मुच** प्रमोचने। मोचयति गाम्॥ २११॥

आस्वदः **सकमकात्।** इतः परं स्वदिपर्यन्तेभ्यः कर्मसम्भव एव णिच् स्यात्।

१ **ग्रस** ग्रहणे। ग्रासयति खड्गम्।

२ **पुष** धारणे। पोषयति [6]वेणुम्।

३ **दल** विदारणे। दालयति[7]

४–३४ **पट, पुट, लुट, तुजि, मिजि, पिजि, लुजि, भजि**

1 'तच्च' घ. 2 भ्यो विशे' ग. घ. 3 ति सक्तून् धृतेन। त्रस घ. 4 धार ग घ. 5 'धार' ग घ. 6 'ति आभरणम्' घ. 7 'ति वेणुम्' घ.

CC-0. In Public Domain. Digitization by eGangotri

लघि, त्रसि, पिसि, कुसि, दशि, कुशि, घट, घटि, बृहि, बर्ह, बल्ह, गुप, धप, विच्छ, [1]चीव, पुथ, लोचृ, लोकृ, णद, कुप, [2]तर्क, वृतु, वृधु भाषार्थाः। एत एकत्रिंशदास्वदीयत्वात् सकर्मकाः। भासार्था इत्येके। तच्च दीपनम्। पाटयति कथाम् देहं च। बदति, शोभयतीति चार्थः। एवं पोटयति। लोटयति, इदिताम्मुदितां च वा णिच्। तुञ्जयति, तुञ्जति, मिञ्जयति, मिञ्जति। पिञ्जयति, पिञ्जति। लुञ्जयति, लुञ्जति। भञ्जयति, भञ्जति। लङ्घयति, लङ्घति। त्रंसयति, त्रंसति। पिंसयति, पिंसति। कुंसयति, कुंसति। दंशयति, दंशति। कुंशयति, कुंशति। घाटयति। घण्टयति, घण्टति। बृंहयति, बृंहति। बर्हयति। बल्हयति। गोपयति। धूपयति। विच्छयति। चीवयति। पोथयति,। लोचयति। लोकयति। नादयति। कोपयति। तर्कयति। वर्तयति, वर्तति। वर्धयति, वर्धति। पुटिश्चूर्णने च द्रुमे। पोटयति मापान्। तर्किरूहेऽपि[3] [redacted] रुट, लजि, अजि दसि, भृशि, रुसि, रुशि, शीक, नट, घुटि, जुचि, रघि, अहि, रहि, महि इति पञ्चदश चैके। लडि तुड नड इति त्रीनप्यन्ये[4]। रोटयति। लञ्जयति, लञ्जति। अञ्जयति, अञ्जति। दंसयति, दंसति। भृंशयति, भृंशति। रुंसयति, रुंसति। रुंशयति, रुंशति। शीकयति। नाटयति। घुण्टयति, घुण्टति, जुञ्चयति, जुञ्चति। रङ्घयति, रङ्घति। अंहयति। अंहति। रंहयति। रंहति। मंहयति। मंहति। लण्डयति। लण्डति। तोडयति। नाडयति। सर्वे समुदिता एकोनपञ्चाशत्। इति। ४-३४ (५२)

३५ पूरी आप्यायने। ईदित्वेन निष्ठायामनिट्त्वस्याणिच्येव सम्भवाण्णिज्विकल्पः। पूरयति, पूरति कुम्भम्।

1 'चातृ' 2 'तर्कि' ग. 3 'पि। तर्कयत्यभिप्रायम्। रुट' ग. घ
4 'न्ये। अर्थ: प्राग्वत् रोट' घ.

CC-0. In Public Domain. Digitization by eGangotri

३६ रुज हिंसायाम्। रोजयत्यरिम्।

३७ ष्वद आस्वादने। संवरण इत्येके। स्वादयति क्षीरं, [1]देह च। स्वाद इत्येके। तस्यापि स्वादयतीति समम्। असिष्वदविदित्यत्र 'सः स्विदिस्वदि–' (८-३-६२) इति षत्वाभावो भेदः।

आस्वदीया गताः २४८॥

आधृषाद्वा। इतः परं युजादीनां धृषिपर्यन्तानां वा णिच् स्यात्।

१.२ **युज, पृच** संयमने। योजयति, योजति, पर्चयति, पर्चति वा गाम्। आद्यो योगे च द्रुमे। अन्त्यः सम्पर्चने च। योजयति, योजति (पर्चयति, पर्चति) हरिणा मतिम्।

३ **अर्च** पूजायाम्। अर्चयति, अर्चति। अस्याऽणिचि तङेवेत्येके। अर्चते।

४ **षह** मर्षणे। साहयति, सहति।

५ **ईर** क्षेपे। गतौ च द्रुमे। ईरयति, ईरति।

६ **ली** द्रवीकरणे। लाययति, लयति[2] वा लोहम्।

७ **वृजी** वर्जने। वर्जयति, वर्जति।

८ **वृञ्** आवरणे। वारयति, वरति, वरते। त्रिस्वादणिच्युभयम्।

९ **जॄ** वयोहानौ। **ज्री** इत्येके। जारयति, जरति। ज्राययति, ज्रयति।

१० **रिच** वियोजनसम्पर्चनयोः। रेचयति, रेचति कृष्णो भक्तान् दोषैः, गुणैश्च।

११ **शिष** असर्वोपयोगे। शेषयति, शेष[3]त्योदनः। विपूर्वोऽतिशये। विशेषयति, विशेषति कृष्णो देवेभ्यः।

1 'दोषं च' ग. घ. 2 'ति। लो' घ 3 'षति वि' घ

CC-0. In Public Domain. Digitization by eGangotri

१२ **तप** दाहे। तापयति, तपति। रिच्यादयस्त्रयो णिजभावेऽनिट:।

१३ **तृप** तृप्तौ। प्रीणने च **द्रुमे**। तर्पयति, तर्पति भुक्त:।

१४ **छृदी** सन्दीपने। छर्दयति छर्दति[1] वाग्निम्। ईदित्वं नेत्येके। छृण्णं छर्दितमिति भेद:। **चृप, छृप, तृप, दृप,** सन्दीपने इत्यप्येके। चर्पयति, चर्पति, छर्पयति, छर्पति, तर्पयति, तर्पति, दर्पयति, दर्पति।

१५ **दृभी** भये। दर्भयति, दर्भति।

१६ **श्रथ** मोक्षणे। बन्ध[2]ने च **द्रुमे**। हिंसायां चैके। श्राथयति, श्रथति।

१७ **मी** गतौ। माययति, मयति।

१८ **ग्रथ** बन्धने। ग्राथयति, ग्रथति। क्रथ हिंसायाम् इति स्वरितेतं केचिदाहु:। क्राथयति, क्रथति, क्रथते।

१९-२० **शीक** मर्षणे, **चीक** च। आद्य: सेचने च **द्रुमे**। शीकयति, शीकति, चीकयति, चीकत्यपराधम्।

२१ **अर्द** हिंसायाम्। स्वरितेत्। अर्दयति, अर्दति, अर्दते।

२२ **हिसि** हिंसायाम्। हिंसयति, हिंसति। इदितोऽस्य फलं चिन्त्य*म्।

२३ **आङ: षद** पद्यर्थे। आसादयति व्रजम्। अणिचि सीदादेश:। आसीदति। शशपो[3]ऋलृदित्त्वाद् भेद:।

1 'र्दत्यग्निम्' घ 2 'न्धे च' घ 3 'पो: सहे: लुदि' ग

* 'सिद्धे णिच: पाक्षिकत्वे हिसिधातोरिदित्वत:।
आधृषीयेषूक्तिफलं चिन्त्यमित्येवमाशय:'॥
इदित्त्वस्य फलं त्वस्य स्पष्टमेव यथाऽणिचि।
हिंस्यादित्यादिके मा भून्न लोपोऽनिदितामिति। के.

CC-0. In Public Domain. Digitization by eGangotri

२४ **शुन्ध** शौचकर्मणि। शुन्धयति, शुन्धति देहम्।

२५ **छद** अपवारणे। स्वरितेदित्येके। छादयति, छदति छदते वा दोषम्। अणिच्युक्तस्यास्य हेतुमण्णिचि मित्त्वं प्रागुक्तम्।

२६ **जुष** परितर्कणे। ऊहो हिंसा वा तत्। परितर्पण इत्येके। जोषयति जोषति शास्त्रार्थमित्यादि।

२७ **धूञ्** कम्पने। 'धूञ्प्रीञोः–' (वा.) इति नुक्। धूनयति[1] नुगस्य नेति मते धावयति। अणिचि–धवति, धवते।

२८ **प्रीञ्** तर्पणे। प्राग्वदत्र नुक्। प्रीणयति, प्राययति, प्रयति, प्रयते[2] वा विप्रान्।

२९,३० **श्रन्थ, ग्रन्थसन्दर्भे**। आद्यो हिंसायां च द्रुमे। श्रन्थयति श्रन्थति। ग्रन्थयति, ग्रन्थति।

३१ **आप्लृ** लम्भने। रिच्यादिवदनिट्। आपयत्यापति श्रियम्। लम्भयतीत्यर्थः। आपत इति तङ्युक्त्वा दूषितः*।

३२ **तनु** श्रद्धोपकरणयोः। उपहतौ श्रद्धोपघाते च द्रुमे। तानयति, तनति श्रियम्, कार्येषु, शत्रून्, पित्तवांश्च। '**उपसर्गाच्च दैर्घ्ये**'। सोपसर्गस्तनिः दैर्घ्येऽर्थे वा णिज्वान्। वितानयति, वितनति वा रज्जु[3]ः। **चन श्रद्धोपहिंसयोः** इति चैके। चानयति, चनति।

३३ **वद** सन्देशवचने। स्वरितेत्। वादयति, वदति, वदते दूतम्। सन्दिशतीत्यर्थः। वचने च द्रुमे। वादयति कथाम्।

३४ **वच** परिभाषणे। अनिट्। वाचयति, वचति दूतम्[4]।

३५ **मान** पूजायाम्। मानयति, मानति।

1 'ति शाखाम्। नु' घ 2 'ते वि' घ.
3 'ज्जुम्'। घ 4 'तं कथाम्। सन्देशे च द्रुमे। वाचयति वचति दूतम्। मान' घ
*'क्वेति मृग्यम्' के

CC-0. In Public Domain. Digitization by eGangotri

३६ **भू** प्राप्तावात्मनेपदी। भूधातुः प्राप्त्यर्थे वा णिज्वान्, णिजणिचोरात्मनेपदी च स्यात्। भावयते भवते व्रजम्। अणिच्यात्मनेपदं नेत्येके। भवति।

३७ **गर्ह** निन्दने। गर्हयति, गर्हति।

३८ **मार्ग** अन्वेषणे। मार्गयति, मार्गति।

३९ **कठि** शोके। कण्ठयति, कण्ठत्यार्तः। प्रायेणोत्पूर्व उत्कण्ठार्थः। उत्कण्ठयत्युत्कण्ठति कामी।

४० **मृजू** शौचालङ्कारयोः। मार्जयति, मार्जति भूमिं देहं च।

४१ **मृष** तितिक्षायाम्। स्वरितेत्। मर्षयति, मर्षति मर्षतेऽपराधम्।

४२ **धृष** प्रसहने। ईदिदित्येके। धर्षयति, धर्षति शत्रुम्। पष बन्धने इति चैके। पाषयति, पषति। अयमग्रे च॥

आधृषीया गताः॥ २९०॥

इतः परमदन्ताः।

१ **कथ** वाक्यप्र[1]बन्धे। णिच्यतोलोपस्य स्थानिवत्त्वादत्रवृद्धिः। कथयति कथाम्। **शाकटायनमते** पुकि कृते वृद्धिः। कथापयति।

२ **वर** ईप्सायाम्। वरयति श्रियम्। वरापयतीत्यादि सर्वत्र पुगूह्यः।

३ **गण** संख्याने। तच्च संख्याविज्ञानं भागतोऽत्रस्थापनं च। गणयति वृक्षान्, पणांश्च।

४, ५ **शठ, श्वठ** सम्यगवभाषणे। शठयति श्वठयति विद्वान्।

६, ७ **पट, वट** ग्रन्थे। **वट** वेष्टने इत्यप्येके। पटयति, वटयति।

८ **रह** त्यागे। रहयति।

९, १० **स्तनगदी** देवशब्दे। ईकारो द्विवचनकृतः न तु ईदित्त्वार्थः। स्तनयति, गदयति मेघः। अजदन्त्येति षोपदेशलक्षणस्य स्मिङ्स्विदाद्येकाच्साहचर्येणानेकाक्ष्वभावात् स्तनिरषोपदे[2]श इति

1 'बन्धने' घ. 2 'शः। तेन' घ.

CC-0. In Public Domain. Digitization by eGangotri

माधवः। तेन निस्तनयिषतीत्यादौ षत्वं न।

११ **पत** गतौ वा। अयं गतौ वा णिज्वान्। पतयति, पतति[1] व्रजमित्यादि। अणिच्त्वेऽप्यदन्तत्वेनानेकाच्त्वात् पताञ्चकारेत्यादि स्यादिति भौवादिकाद् भेदः। पत गतौ वेत्यदन्तत्वं विकल्प्यत इति मते पतयति, पातयतीति। पत ऐश्वर्यगत्योः इति द्रुमे।

१२ पष अनुपसर्गात्। अयमनुपसर्गो गतावदन्तः। पषयति व्रजम्। सोपसर्गात्तु प्रपाषयति। बन्ध[2] बाधस्पर्शेषु च द्रुमे।

१३ **स्वर** आक्षेपे। स्वरयति।

१४ **रच** प्रतियत्ने। कृत्यर्थे च द्रुमे। रचयति केशान्, घटं च।

१५ **कल** गतौ संख्याने च। कलयति व्रजं, पणांश्च।

१६ **चह** कल्कने। चहयति।

१७ **मह** पूजायाम्। महयति।

१८,२० **सार, कृप, श्रथ** दौर्बल्ये। सारयति, कृपयति, श्रथयति[3] वा रोगो। दीर्घवतां पाठोऽग्लोपित्वार्थः।

२१ **स्पृह** ईप्सायाम्। स्पृहयति हरये।

२२ **भाम** क्रोधे। भामयति।

२३ **सूच** पैशून्ये। सूचयति भावम्।

२४ **खेट** भक्षणे। **खेड** इत्येके। **खोट** इत्यपरे। अयं क्षेपे द्रुमे। खेटयति, खेडयति, खोटयति।

२५ **क्षोट** क्षये। क्षोटयति दोषम्।

२६ **गोम** उपलेपने। गोमयति भूमिम्।

२७ **कुमार** क्रीडायाम्। कुमारयति बालः।

२८ **शील** उपधारणे। अभ्यासस्तत्। शीलयति विद्याम्।

1 'ति कूपमि' ग. घ. 2 'वोध' ग 3 'ति रो' घ

CC-0. In Public Domain. Digitization by eGangotri

२९ **साम** सान्त्वप्रयोगे। सामयति प्रियाम्।

३० **वेल** कालोपदेशे। वेलयति दैवज्ञः। **काल** इत्यपि धातुरित्येके। कालयति धर्मम्।

३१ **पल्लूल** लवनशाधनयोः। पल्लूलयति तरुं, देहं च।

३२ **वात** सुखसेवनयोः। वातयति धनी, हरिं च। गतिसुख इत्येके। वातयति शक्तः।

३३ **गवेष** मार्गणे। गवेषयति चोरम्।

३४ **वास** उपसेवायाम्। वासयति हरिम्।

३५ **निवास** आच्छादने। निवासयति देहम्। अनिनिवासदिति द्रुमोक्तेरत्र निर्धात्वंश एव।

३६ **भाज** पृथक्कर्मणि। विभाजयति पदार्थान्।

३७ **सभाज** प्रीतिदर्शनयोः। प्रीतिसेवनयोरित्येके। सभाजयति बुधम्, उत्सवं, हरिं च।

३८ **ऊन** परिहाणे। ऊनयति दोषम्।

३९ **ध्वन** शब्दे। ध्वनयति।

४० **कूट** परितापे। ह्रस्वोपधश्च दृश्यते। परिदाह इत्यैके। कूटयति, कुटयति देहम्। इन्धनं च। हरस्तु 'अणिनुणः'(५-४-१५) इति सूत्रे कूड दाह इत्याह। ऋक्षु प्रयोगोऽप्यस्ति। कूड (ळ)-यति तरुम्।

४१-४४ **केत, ग्राम, कुण, गुण** चामन्त्रणे। चात् कूटेति च। कूटयति, सङ्केतयति, ग्रामयति, कुणयति, गुणयति च श्राद्धे बुधम्। केत श्रावणे निमन्त्रणे च। श्रावणं समयोद्घोषणमिति द्रुमे। निमन्त्रणमाज्ञा। केतयत्यमात्यो जनान्। करदानाय समयं घोषयतीत्यर्थः। कुण सङ्कोचने च। भासने च द्रुमे। कुणयति हस्तम् अग्निश्च।

४५ **स्तेन** चौर्ये। स्तेनयत्यर्थम्॥

आगर्वादात्मनेपदिनः॥

CC-0. In Public Domain. Digitization by eGangotri

४६ **पद** गतौ। पदयते।

४७ **गृह** ग्रहणे। गृहयते पाणिम्।

४८ **मृग** अन्वेषणे। मृगयते। मृगयतीति घञन्तान्मृग-शब्दात् 'तत्करोति–' इति णिचि।

४९ **कुह** विस्मापने। कुहयते जनान्।

५०,५१ **शूर वीर** विक्रान्तौ। शूरयते वीरयते भटः।

५२ **स्थूल** परिबृंहणे। स्थूलयते घनी।

५३ **अर्थ** याच्ञायाम्। अर्थयते। अर्थयतीति मृगयतीतिवत्✿

५४ **सत्र** सन्तानक्रियायाम्। सत्रयते धर्मम्। सन्ततं करोती-त्यर्थः।

५५ **गर्व** माने। गर्वयते[1] शूरः॥

इत्यागर्वीयाः[2] ॥

५६ **सूत्र** वेष्टने। सूत्रयति सूत्रयते।

५७ **मूत्र** प्रस्रवणे। मूत्रयते रोगी।

५८ **रूक्ष** पारुष्ये। रूक्षयति वाक्।

५९,६० **पार, तीर** कर्मसमाप्तौ। पारयति, तीरयति यज्ञम्।

६१ **पुट** संसर्गे। पुटयति हस्तौ।

६२ **कत्र** शैथिल्ये। कर्त इति चैके। कत्रयति, कर्तयति नीवी।

'॥ **प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च**'॥ एतदेव विवृणोति – '**तत्करोति तदाचष्टे**'। घटं करोत्याचष्टे वा घटयति। '**तेनातिक्रामति**'। अश्वेनातिक्रा[3]म्यति अश्वयति। **धातुरूपं च**[4]। णिचि (प्रकृतयो) धातुरूपं भजन्ते। अनेन 'आख्यानात् कृतः–'

1 'ते मानी।' घ. 2 'गर्वीया गताः' घ.

3 'क्रामति' घ. 4 'च। कृदन्ता णिचि धातु' घ.

✿'निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ शुद्धेन तुल्योऽर्थः। तेनार्थयतीत्यादि सिद्धमिति समाहितं सिद्धान्तकौमुद्याम्'। के.

CC-0. In Public Domain. Digitization by eGangotri

इत्याद्युक्तम्। कंसवधमाचष्टे कंसं घातयतीत्यादि। 'कर्तृकरणाद्धात्वर्थे'। कर्तुर्यानि करणानि परश्वधादीनि तेभ्यस्तत्तद्धात्वर्थे णिच्। परशुना छिनत्ति परशयति। एषां प्रपञ्चः सुब्धातुखण्ड उक्तः।

६३ **बष्क** दर्शने। बष्कयति।

६४ **चित्र** चित्रकरणे। आलेख्यकरणं तत्। चित्रयति भित्तिम्॥ **'कदाचिद् दर्शने'**॥ अद्भुतदर्शने चार्थे चित्रधातोर्णिच्। क्षणिकदर्शन इति **द्रुमे**। चित्रयति सौभं जनः। अहो चित्रमिति पश्यन्ति क्षणमात्रं पश्यन्तीति वार्थः।

६५ **अंस** समाघाते। विभाजने च **द्रुमे**। अंसयत्युरसा मल्लम्।

६६ **वट** विभाजने। **वटि** इत्येके। वटयति, वण्टयति व्रीहीन्।

६७ लज प्रकाशने। लजि इत्येके। लजयति, लञ्जयत्यग्निः। वटिलज्योरिदित्त्वेऽप्यत्र पाठाददन्तकार्यं स्यादेवेति **माधवः**। (वण्टापयति। लञ्जापयति)।

६८ **मिश्र** सम्पर्के। मिश्रयति हरिणा।

६९ **सङ्ग्राम** युद्धे। **अय[1]मात्मनेपदी***। सङ्ग्रामयते शूरः।

७० **स्तोम** श्लाघायाम्। स्तोमयति हरिम्।

७१ **छिद्र** कर्णभेदने। छिद्रयति बालम्। **कर्ण** इति पृथग् धातुरित्येके। कर्णयति तरुम्।

७२ **अन्ध** दृष्ट्युपघाते। अन्धयति वृद्धः।

७३ **दण्ड** दण्डपाते। दण्डयत्यरिम्। तस्मिन् दण्डोपाय पातयतीत्यर्थः। क्वचिद् द्विकर्मकः। दण्डयत्यरिं धनम्।

७४,७५ **अङ्क** पदे लक्षणे च, **अङ्ग** च। अङ्कयत्यङ्गयति पटम्।

७६,७७ **सुख दुःख** तत्क्रियायाम्। तत्क्रिया तदनुभवः। सुखयति दुःखयति जन्तुः।

1 'यमनुदात्तेत्। सङ्ग्रा' घ.
*'अकारप्रश्लेषेणानुदात्तेत्त्वात्' के.

CC-0. In Public Domain. Digitization by eGangotri

७८ **रस** आस्वादनस्नेहनयोः। रसयति क्षीरं देहं च।

७९ **व्यय** वित्तसमुत्सर्गे। व्ययति धनं धार्मिकः।

८० **रूप** रूपक्रियायाम्। सा च रूपस्य करणं, दर्शनं वा। रूपयति। अनेकार्थत्वान्निरूपयतीति विचारणेऽपि।

८१ **छेद** द्वैधीकरणे। छेदयति तरुम्। छद अपवारणे इत्यप्येके। छदयत्यातपम्।

८२ लाभ प्रेरणे। लाभयति।

८३ **व्रण** गात्रविचूर्णने। व्रणयत्यङ्गम्।

८४ **वर्ण** वर्णक्रियाविस्तारगुणवचनेषु। वर्णयति भित्तिं, कथां, राजानं च ॥ ३७४ ॥

बहुलमेतन्निदर्शनम् ॥ एतच्चुरादावदन्तधातुप्रदर्शनं बहुलं ज्ञेयम्। तेनैतान्यपि सिद्धानीत्याह—

८५ **पर्ण** हरितभावे। पर्णयति पटः।

८६ **क्षप** प्रेरणे। क्षपयति। नाशनार्थोऽप्ययम्। क्षपयति दोषम्।

८७ **वस** निवासे। वसयति गृहे।

८८ **तूत्थ** आवरणे। तूत्थयति। इति ॥

एवं ओजयति, आन्दोलयति, स्फुटयति, अवधीरयति, गन्धयति इत्यादयश्चुरादिष्वदन्ताः। अत्र **ओजेर्बलदीप्तिः**, **आन्दोले**श्चालनं, **स्फुटेः** प्रकाशन[1]विशरणे, **अवधीरेरवज्ञा**, **गन्धेर्हिंसा** चार्था इति **द्रुमे** ॥ ९३ ॥ अर्थयतीत्यतङ्नेन साध्य इति **हरः**। अपानयतीत्यपान इत्यादावानेति धात्वन्तरमिति **योगशास्त्रे**। तेन "अक्रूरमानयामास" इति **श्रीकृष्णविलासोक्तिः** सिद्धा। अन्ये तु भूवादिप्रमुखसर्वगणेष्वपि धातुप्रदर्शनं बहुलमिति व्याख्यन्। तेन सौत्राश्चुलुम्पादयश्च सिद्धाः।

1 'नविकरणे' घ.

CC-0. In Public Domain. Digitization by eGangotri

॥ **णिङ्ङ्गान्निरसने** ॥ हस्तौ निरस्यति हस्तयते । पादयते ।

॥ **श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च** ॥ एभ्यो णिङ्, बाहुलकाण्णिजपि स्यात् । श्वेताश्वमाचष्टे, तेनातिक्रामति वा श्वेतयते, श्वेतयति । एवम्–अश्वयते अश्वयति । गालोडयते, गालोडयति । आह्वरयते आह्वरयति । एतत् सूत्रद्वयं सुब्धातुखण्ड उक्तम् ।

॥ **पुच्छादिषु धात्वर्थ इत्येव सिद्धम्** ॥ 'पुच्छभाण्डचीवराण्णिङ्' इति न वक्तव्यम् । 'प्रातिपदिकाद्धात्वर्थे–' इत्येव णिच्सिद्धेः, बहलोक्त्यात्मनेपदसिद्धेश्च ॥ १८७५* ॥

"इति चुरादयः ॥

(द्रुमेऽधिका भ्वादयः)

कल्पद्रुमे प्रो[1]द्गदितार्थभेदानल्पेतरान् प्राप्य च तत्र तत्र ।
सङ्गृह्यते तद्गतधातुरत्नजातं मया भूय इह क्रमेण ॥

१ क्षीञ् हिंसायाम् । क्षयति, क्षयते ।

२,३ षुञ् सुञ् गतौ । सवति, सवते । सुषावेत्यादि षत्वे भेदः ।

४ कृञ् करणे । करति, करते

॥ अनुदात्ता उभयतोभाषाः ॥

५ जु वेगे । जवति ।

६ श्रु श्रुतौ । श्रवति ।

७ सु प्रसवैश्वर्यगतिषु । दन्त्यादिः सवति ।

८ ज्रृ त्यक्करणे । जरति ।

1 'द्गलिता' ग. घ.

*'धातुपाठेऽत्र मुख्यपठितानामेवेयं संख्या । अङ्के प्रमादसम्भवादस्यामपि नैकान्तविश्वासः कार्यः । पाक्षिकपठितैः सहाहत्य २२४९ धातव इति क्वचित् पुस्तके दृश्यते ।'

CC-0. In Public Domain. Digitization by eGangotri

९ सै क्षये। दन्त्यादिः। सायति।

अनुदात्ताः परस्मैभाषाः।

१०,११ खुङ् ङुङ् शब्दे। खवते, ङवते।

१२,१३ छ्युङ् जूङ् गतौ। छ्यवते, जवते।

१४ ज्युङ् उपनयननियमव्रतादेशेषु। ज्यवते माणवको मुनिर्ब्रह्मचारी च। दीक्षधातावर्था उक्ताः॥

अनुदात्ता आत्मनेभाषाः।

१५,१६ **मष्क, वष्क** गतौ। मष्कते, वष्कते।

१७ **सीकृ** सेचने। सीकते। दन्त्यादिः। अयं **माधवदूषि**तोऽपि कल्पद्रुमानुसारादिह लिखितः। एवं शुक गतावित्यादावपि ज्ञेयम्।

उदात्ता अनुदात्तेतः॥

१८ **कक्क** हासे। कक्कति।

१९ **शुक** गतौ। शोकति।

२०,२१ **कख्ख, कर्ख** हासे। कख्खति, कर्खति।

२२,२३ **नख, लिखि** गतौ। प्रनखति, लिङ्खति।

२४ **वुगि**[1] वर्जने। दन्तोष्ठ्यादिः। वुङ्गति।

२५ **स्वगि** गतौ। स्वङ्गति।

२६ **अर्घ** मूल्ये। अर्घति पणः पटस्य। मूल्यं भवतीत्यर्थः।

२७,२८ **गड्घ, घड्घ** हासे। गड्घति, घड्घति।

उदात्ता उदात्तेतः।

२९ **मचि** कल्कने। मञ्चते।

३० **शचि** गतौ। शञ्चते।

३१ **ईजि** कुत्सने च। ईञ्जते।

1 'त्यागे' घ

CC-0. In Public Domain. Digitization by eGangotri

३२ **ओनजी** व्रीळने। प्रनजते।

३३ **रिजृ** भर्त्सने। रेजते।

३४ **रेजृ** दीप्तौ। रेजते॥

उदात्ता अनुदात्तेतः॥

३५ अचि गति[1]म्लेच्छनयोः। अञ्जति शुकः।

३६ कच शब्दे। कचति।

३७,३८ मञ्चु, मुञ्जु गतौ। मञ्चति, मुञ्चति।

३९ स्मुर्च्छा विस्मृतौ। स्मूर्च्छति।

४० ओलजि [2]उत्क्षेपणे। ओलञ्जति।

४१ ध्रिज गतौ। ध्रेजति।

४२ सर्ज आर्जने। दन्त्यादिः। सर्जति।

उदात्ता उदात्तेतः।

४३ **वाडृ** आप्लाव्ये। दन्तोष्ठ्यादिः। वाडते।

४४-४९ **हुडृ, हूडृ, ह्ुडृ, ह्लूडृ, हौडृ, हौडृ** गतौ। होडते। हूडते। ह्ोडते। ह्ूडते। हौडते ह्ौडते।

उदात्ता अनुदात्तेतः

५० **कट** गतौ। कटति।

५१ **कीट** वर्णबन्धनयोः। कीटति।

५२ **खोटृ**[3] गतिप्रतिघाते। खोटति।

५३ **चट** भेदने। चटति।

५४ **नट** नृत्तहिंसयो[4]ः। प्रनटति।

५५ **म्रेटृ** उन्मादे। म्रेटति।

५६ **मुटि** मर्दने। मुण्टति।

---

1 'तिम्लिष्टोक्त्योः'। घ 2 'उत्क्षेपे' घ 3 'ट' घ
4 'योः नटति प्र' घ

CC-0. In Public Domain. Digitization by eGangotri

५७ [1]रोटृ अनादरे। रो[2]टति।

५८ लुण्ट स्तेये। लुण्टति।

५९ लोटृ उन्मादे। लोटति।

६० ह्रेट बाधने। ह्रेटति।

६१ बठ विनीतत्वे। ओष्ठ्यादिः। बठति मुनिः।

६२ खोडृ गतिप्रतिघाते। खोडति।

६३ तोडृ अनादरे। तोडति।

६४ तुड्ड वधे। तुड्डति।

६५,६६ मेडृ, म्लेडृ उन्मादे। मेडति, म्लेडति।

६७ यौडृ सम्बन्धे। यौडति।

६८ रौडृ अनादरे। रौडति।

६९ लौडृ उन्मादे। लौडति।

७० लिड आक्रोशे। लेडति।

७१ शौडृ [redacted]। शौडति।

७२ पिणृ [3]गतिप्रेषणप्रैषातिश्लेषेषु। पेणति।

७३,७४ ध्रण, व्रण शब्दे। ध्रणति, व्रणति॥

उदात्ता उदात्तेतः॥

७५ ज्युतृ भासने। ज्योतते।

७६ गुध क्रीडायाम्। गोधते।

७७ वाधृ लोडने। दन्तोष्ठ्यादिः। वाधते।

७८ शुन्ध शुद्धौ। शुन्धते।

उदात्ता अनुदात्तेतः।

७९ इति बन्धने। इन्तति।

८० कित निवासदर्शनयोः। केतति।

८१ [4]च्युतिर् क्षरणे। [5]च्योतति[6]।

1 'रौ' व 2 'रौ' [redacted]घ 3 'प्रैषगतिश्लेषणेषु' ग.घ
4 चुतिर् घ। 5 चोत' घ 6 'ति। माथि' घ

CC-0. In Public Domain. Digitization by eGangotri

८२,८३ **मथ, माथि** हिंसासंक्लेशनयोः[1]। मथति। मान्थति।

८४,८५ **गुर्द गूर्द** क्रीडानिवासयोः। गुर्दति। गूर्दति।

८६ **नर्द** शब्दे। नर्दति।

८७ **पद** स्थैर्ये। पदति

८८ **वध** हिंसायाम्। वधति। अयं काशिकावृत्तौ चोक्तः।

८९,९० **चन, धन** शब्दे। चनति। धनति।

९१ **मन** पूजागर्वयोः। मनति॥

उदात्ता उदात्तेतः॥

९२ **गुप** गोपने। गोपते देहम्।

९३ **ह्रेपृ** गतौ। ह्रेपते।

९४,९५ **जम्भ, जृभी** जृम्भणे। जम्भते। जर्भते।

९६ **लभि** शब्दे। लम्भते।

९७ **स्रम्भु** हर्षे। स्रम्भते॥

उदात्ता अनुदात्तेतः॥

९८ **चुलुम्प** लोपे। चुलुम्पति।

९९ **सप** [2]समवाये। दन्त्यादिः। सपति।

१०० **वफ्फ** गतिहिंसयोः। वफ्फति।

१०१-११० **घर्ब, घन्ब, तर्ब, तन्ब, नर्ब, नन्ब, रबि रिबि सर्ब, सन्ब** गतौ। घर्बति, घम्बति। तर्बति। तम्बति। प्रनर्बति। प्रनम्बति। रम्बति। रिम्बति। सर्बति। सम्बति।

१११-११४ **जभि, दर्भ, स्रिभु, स्रुभु** वधे। जम्भति। दर्भति। स्रेभति। स्रोभति।

११५ **सुम्भ** दीप्तौ च। सुम्भति॥

उदात्ता उदात्तेतः॥

११६ **नय** गतौ[3]। नयते।

1 'योः। मान्थ' घ 2 'सम्बन्धे' घ 3 'तौ। प्रनयते'। घ

CC-0. In Public Domain. Digitization by eGangotri

११७ बल दानहिंसाचिन्तासु। बलते।

११८ कबृ (वृ) वर्णस्तुत्योः। कब (व)ते।

११९ क्षीवृ [1]मदे। क्षीवते।

१२० क्लीबृ अधाष्ट्र्ये। क्लीवते।

उदात्ता अनुदात्तेतः ॥

१२१ चुच्य अभिषवे। अस्यार्थः शुच्यतावुक्तः। चुच्यति

१२२ षूर्ज्य ईर्ष्यायाम्। सूर्ज्यति।

१२३,१२४ सूक्ष्र्य, सूर्ज्य अनादरे च[2]। सूक्ष्र्यति, सूर्ज्यति।

१२५ कुर कौटिल्ये। कोरति।

१२६ चुर स्तेये। चोरति।

१२७ बभ्र गतौ। बभ्रति।

१२८,१२९ क्वेलृ, चेलृ चलने[3]। क्वेलति, चेलति।

१३० तल प्रतिष्ठायाम्। तलति भूमौ।

१३१ तुल उन्माने। तोलति।

१३२ वल्ल गतौ। वल्लति।

१३३ वेल्ह चलने। वेल्हति।

१३४ शल जपे। शलति।

१३५ सल गतौ। सलति।

१३६ क्षिवृ निरसने। क्षेवति।

१३७ जुर्वी हिंसायाम्। जूर्वति।

१३८ [4]दर्वी गतौ। दर्वति ॥

उदात्ता उदात्तेतः ॥

१३९ वर्ष स्नेहने। वर्षते।

1 'दर्पे' ग, 'धाष्ट्र्ये' घ 2 'च। दन्त्यादिः। सू' ग. घ

3 'ने च'। घ 4 'दवि गतौ। दम्वति' घ

१४० **घसि** रक्षणे। घंसते।

१४१ **स्रन्सु** प्रमादे। स्रंसते कार्येषु।

१४२,१४३ **वर्ह वल्ह** प्राधान्ये। वर्हते, वल्हते।

१४४ **वहि** वृद्धौ। वंहते। दन्तोष्ठ्यादयः॥

उदात्ता अनुदात्तेतः॥

१४५ **कश** शब्दे। कशति।

१४६ **त्वक्ष** [1]तनूकरणे। त्वक्षति।

१४७ **धृष**[2] हिंसासंहत्योः। धर्षति।

१४८ **मुष** वधे। मोषति।
(**तुष** प्रीतौ। तोषति)

१४९ **मोक्ष** [3]असने। मोक्षति।

१५० **लुष** स्तेये। लोषति।

१५१ **वाक्षि** काङ्क्षायाम्। वाङ्क्षति।

१५२ **षूक्ष** गमने। सूक्षति।

१५३,१५४ **षूष, सूष** प्रसवे। सूषति। सूषति।

१५५,१५६ [4]**सूक्ष, सूर्क्ष** अनादरे। सूक्षति, सूर्क्षति। त्रयो दन्त्यादयः।

१५७ **रिह** हिंसायाम्। रेहति।

१५८ **वृह** वृद्धौ। वर्हति।

१५९,१६० **वृहि, वृहिर्** शब्दे च। वृंहति। वर्हति।

उदात्ता उदात्तेतः॥

१६१ **ञिक्ष्विडा** स्नेहनमोचनयोः। क्ष्वेडते।

१६२ **स्रन्हु** विश्वासे। स्रन्हते बन्धौ।

उदात्तावनुदात्तेतौ द्युतादी च।

इतः परं दश घटादयः।

1 'वारणग्रहणयोः' घ 2 'त्रु' घ 3 'क्षेपे' घ

4 सुक्ष अनादरे। सूक्षति। स्तृक्ष गतौ। स्तृक्षति। त्रयो' ग. घ

CC-0. In Public Domain. Digitization by eGangotri

१६३ **क्षजि** गतिदानयोः। क्षञ्जते। क्षञ्जं, क्षञ्जं, क्षाञ्जं, क्षाञ्जम्।

१६४ **क्लव** भये। क्लवते। क्लवयति। क्लवा★।

१६५ **जक्षि** गतिदानयोः। जङ्क्षते।

॥ उदात्ता अनुदात्तेतः षितश्च।

१६६ **स्कक** प्रतीघाते। स्ककति। स्ककयतीत्यादि।

१६७,१६८ **सगे स्थगे** संवरणे। सगति। स्थगति। त्रयो दन्त्यादयः।

१६९ **नट** गतौ। नटति। प्रनटति[1]।

१७० **चण** गतिहिंसयोः। चणति।

१७१,१७२ **ष्टन, स्तन** शब्दे। स्तनति। **चणादयो वा मितः।** चणयति, चाणयति। स्तनयति, स्तानयति। तिस्तनयिषति[2]।

उदत्ता उदात्तेतः।

१७३,१७४ **टुभ्रासृ**, [3]**टुम्लासृ** दीप्तौ। **भ्रासते। म्लासते।** 'वा भ्राश–' (३–१–७०) इति श्यन्ननयोरपि दृष्टो द्रुमे। भ्रास्यते। [4]म्लास्यते।

उदात्तावनुदात्तेतौ फणादी च।

१७५ फल गतौ। फलति।

१७६ स्थल स्थाने। स्थलति॥

उदात्तावुदात्तेतौ ज्वलादी च।

१७७ चक तृप्तिप्रतिघातयोः। चकति। चकते।

१७८ हेठ बाधने। हेठति, हेठते।

१७९,१८० उबुदिर्, उबुन्धिर् निशामने। बोदति, बोदते। बुन्धति, बुन्धते।

1 'ति। प्रनटयति'। घ. 2 'ति। निस्तानयिषति। उदा' घ
3 'टु म्लासृ' घ 4 'भ्ला' घ
★ 'वक्ष्यमाणषित्त्वादङ्' के

CC-0. In Public Domain. Digitization by eGangotri

१८१ शुन्ध शुद्धौ। शुन्धति, शुन्धते।

१८२ दान बन्धने। दानति, दानते।

१८३ तप दाहे। तपति, तपते।

१८४ अय गतौ। अयति, अयते।

१८५ चीयृ [1]आदानसंवरणयोः। चीयति, चीयते।

१८६ दायृ दाने। दायति, दायते।

१८७ मूल प्रतिष्ठायाम्। मूलति, मूलते।

१८८ रीवृ [2]आदानसंवरणयोः। रीवति, रीवते।

१८९,१९० षेवृ, सेवृ सेवने। अन्त्यो दन्त्यादिः। सेवति, सेवते[3]।

१९१ वस ग्रन्थनबाधनयोः। वसति, वसते।

उदात्ताः स्वरितेतः[4]।

१९२ स्तम्भ स्तम्भे। स्तम्भते भीत्या।

अनुदात्तोऽनुदात्तेत्।

१९३ बुध ज्ञापने। बोधति शिष्यं धर्मम्।

१९४ दंस दंसने। दंसनमुक्तम्। दंसति योद्धा।

१९५ लुह गार्ध्ये। लोहति॥

अनुदात्ता उदात्तेतः।

इति[5] द्रुमेऽधिका भ्वादयः।

अदादयः

१ तु वृद्धिहिंसापूर्तिषु अनुदात्तः परस्मैभाषः। तौति।

२,३ शस्ति शस स्वप्ने। शंस्ति, शंसन्ति। शस्ति, शसन्ति॥

उदात्तावुदात्तेतौ छान्दसौ[6]॥

इति द्रुमेऽधिका अदादयः॥ १९८

1,2 संवृत्यादानयोः'। घ 3 'ते। उदा' घ 4 'ते। पच व्यक्तीकरणे। पचते शास्त्रार्थान् स्तम्भ' घ 5 'ति शप्'। ग, घ 6 'सौ। लुक्॥ ग

CC-0. In Public Domain. Digitization by eGangotri

जुहोत्यादी

१ कित ज्ञाने। चिकेत्ति।

२ श्विता वर्णे। शिश्वेत्ति।

उदात्तावुदात्तेतौ।

आद्यश्छान्दसः[1]।

।। इति द्रुमेऽधिकौ जुहोत्यादी ।। २००

दिवादयः

१ पूङ् पवने[2]।

उदात्त आत्मनेभाषः।

पूयते।

२ दॄ विदारणे[3]।

उदात्तः परस्मैभाषः।

दीर्यति।

३ षूरी हिंसास्तम्भनयोः।

उदात्तोऽनुदात्तेत्।

सूर्यते।

४ टिपृ क्षेपे। टिप्यति।

५,६ ष्टूपिर्, स्तूपिर् उच्छ्राये। अन्त्यो दन्त्यादिः। स्तूप्यति स्तूप्यति।

७ जभ वधे। जभ्यति।

८ क्षिवु नि[4]रसने। क्षीव्यति।

९ कुशिर् श्लेषणे। कुश्यति।

१० भ्रशु अधःपतने। भ्रश्यति।

११ व्युषिर् दाह[5]विभागयोः। व्युष्यति।

१२ वुसिर् विभागे। वुस्यति।

उदात्ता उदात्तेतः।

१३ क्लिशु उपतापे।

उदात्तः स्वरितेत्।

क्लिश्यति, क्लिश्यते।

१४,१५ षाध, साध संसिद्धौ। अन्त्यो दन्त्यादिः। साध्यति, साध्यति।

अनुदात्तावुदात्तेतौ[6]।

1 'सः। श्लुः।।' ग, घ. 2 'ने। आत्म' घ. 3 'णे। पर' घ.
4 'निरासे' घ. 5 'हभागयोः'। घ. 6 'तौ। श्यन्'।। घ.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति[1] द्रुमेऽधिका दिवादयः ॥ २१५

स्वादयः

१ द्रूञ् हिंसागत्योः ।

उदात्त उभयतोभाषः ।

द्रूणोति, द्रूणुते ।

२-४ चघ, तिघ, सघ वधे । चघ्नोति, तिघ्नोति । सघ्नोति ।

५ तृप[2] तृप्तिप्रीणनयोः । तृप्नोति[3] । क्षुभ्नादित्वान्नणः ।

उदात्ता उदात्तेतः ।

६ साध[4] संसिद्धौ । दन्त्यादिः । **अनुदात्त उदात्तेत्** । साध्नोति । इतः परं छान्दसाः ।

७ ऋ वधे ।

अनुदात्तः परस्मैभाषः ।

ऋणोति ।

८ अड व्याप्तौ । अड्णोति ।

९,१० ऋक्ष, दास वधे । ऋक्षणोति । दास्नोति । उदात्ता उदात्तेत[5]ः ।

॥ इति[6] द्रुमेऽधिकाः स्वादयः ॥ २२५

तुदादयः

१,२ जर्च, झर्च भर्त्सनभाषणयोः । जर्चति, झर्चति ।

३ पिच्छ उत्क्लेशे । पिच्छति ।

४,५ जर्झ, झर्झ भर्त्सनभाषणयोः । जर्झति, झर्झयि ।

६ कड[7] मदभक्षणयोः । कडति ।

७ दृण कौटिल्यवधगतिषु । दृणति ।

८ षुभ दीप्तिहिंसयोः । सुभति ।

९ सुर ऐश्वर्यदीप्त्योः । दन्त्यादिः । सुरति ।

१० पुल महत्त्वे । पुलति ।

११ स्फुल[8] शोभाचलनयोः । स्फुलति ।

1 'ति दिवा' ग. 2 'प प्रीणने' । घ. 3 'ति हरिः । क्षुम्ना' ग, घ.
4 'घ सिद्धौ' घ 5 'तः । श्नुः । जर्च' घ 6 'ति स्वा' ग
7 'ड दर्पभ' घ 8 ल स्फूर्तिच' घ

CC-0. In Public Domain. Digitization by eGangotri

१२,१३ **स्तृहू स्तृन्हू** हिंसायाम्। दन्त्यादी। स्तृहति। स्तृंहति।

उदात्ता उदात्तेतः।

१४ [1]गु पुरीषोत्सर्गे।

[2]अनुदात्तः परस्मैपदी।

गुवति।

१५,१६ **चुट, छुट** छेदने। चुटति, छुटति।

१७ **घुड** प्रतीघाते। घुडति।

१८,१९ **द्रुड, द्रूड**[3] निमज्जने। द्रुडति, द्रूडति।

२० **नुड** वधे। नुडति।

२१ **बुड** उत्सर्गसंवरणयोः। बुडति।

२२ **भृड** स[4]ङ्घातसंवरणयोः। भृडति।

२३ **वृड**[5] निमज्जने च। वृडति।

२४ **हुड**[6] निमज्जनसङ्घातयोः। हुडति।

२५ **चुण** छे[illegible]। चुणति।

उदात्ता उदात्तेतः, स्वादयः कुटादयश्च।

२६ **रिफ** वधे।

उदात्त उदात्तेत् मुचादिश्च।

तेन नुम्। रिम्फति[7]।

।। इति[8] द्रुमेऽधिकास्तुदादयः ।। २५१ ।।

तनादिः

१ वृणु अदने।

उदात्तः स्वरितेत्।

वर्णोति, वर्णुते,[9] वृणोति, वृणुते।

।। इति द्रुमेऽधिकस्तनादिः ।। २५२ ।।

1 'ओ गू पु' ग,घ 2 'उदात्तः पर' ग,घ
3 'ड मज्ज' घ. 4 'संवृतिसङ्गत्योः' घ. 5 'ड स्नाने च' घ.
6 'ड मज्जनसंगत्योः' घ. 7 'ति तुदादयः' ग. 8 'ति स्यम शब्दे। इति फणादिः। स्यमति। स्येमतुः, सस्यगतुः। स्यगतो, स्यगन्ती। इति शः। वृणु' घ. 9 'ति। इति तनादिः। क्षि' ग.

CC-0. In Public Domain. Digitization by eGangotri

क्र्यादयः

१ **क्षि**[1] हिंसायाम्। ह्रस्वान्तः क्षिणाति।

२ **व्री** वरणे। व्रीणाति।

३ **ल्ली** गतौ। ल्लीनाति।

अनुदात्ताः परस्मैभाषाः।

४ **वृञ्** वरणे।

उदात्त उभयतोभाषः।

वृणाति, वृणीते।

५ **ज्री**[2]वयोहानौ।

अनुदात्तः परस्मैभाषः।

ज्रिणाति।

६ **स्वॄ** हिंसायाम्।

उदात्तः[3] परस्मैभाषः।

स्वृणाति[4] द्वौ प्वादी।

७ **क्नुन्थ** श्लेषणक्लेशनयोः।

उदात्त उदात्तेत्।

क्नुथ्नाति[5]।

॥ इति द्रुमेऽधिकाः क्र्यादयः ॥ २५९ ॥

चुरादयः

१ [6]**व्या** सुखव्याप्ति[7]सेवासु। [8]व्यापयति, [9]व्यापयते।

२ **धृ** धारणे। धारयति।

३ **पॄ** पूरणे। पारयति।

४ **सृ** वरणे। सारयति[10]।

५ **अकि** लक्षणे। अङ्कयति, अङ्कति।

६ **लक** आस्वादनगत्योः। लाकयति।

७ **पिच्च** [11]कुट्टने। पिच्चयति।

८-१० **मज, मुज, मुजि** शब्दशुद्ध्योः। माजयति, मोजयति, मुञ्जयति, मुञ्जति।

1 'क्षिष् हिं' घ. 2 ज्ञाने। ज्रिणाति। व्री गतौ व्रिणाति। अनुदात्तौ। स्वृ हिं.' घ. 3 'त्तः। स्वृ' घ. 4 'ति। प्वादयः परस्मैभाषाः। क्नुन्थ' घ. 5 'ति। इति क्र्यादयः'। ग., ति। इति श्ना' घ. 6 'वा' घ 7 'प्तिगतिसे' ग.घ 8,9 'वा' घ 10 'ति देहम्'। घ 11 घट्ट. ग

CC-0. In Public Domain. Digitization by eGangotri

११ **लज** अपवारणे। लाजयति।

१२ **छुट** छेदने। छोटयति।

१३ **तट** आघाते। ताटयति।

१४ **व्युटि** क्षये। व्युण्टयति, व्युण्टति।

१५ **सुट्ट** अना[1]दरे। दन्त्यादिः। सुट्टयति[2]।

१६ **स्निट** स्नेहने। स्नेटयति।

१७ **स्फिट** हिंसानादरवरणेषु। स्फेटयति।

१८ **गुठि** वेष्टने। गुण्ठयति।

१९ **लुठ** स्तेये। लोठयति।

२०,२१ **सठ, स्वठ** गत्यसंस्कारसंस्कारेषु। साठयति, स्वाठयति।

२२ **चडि** कोपे। चण्डयति, चण्डति।

२३ चुडि [3]छेदने। चुण्डयति, चुण्डति।

२४ मुडि [4]मर्दने च। मुण्डयति, मुण्डति।

२५ लुड्ड [5]स्तेये। लुड्डयति।

२६,२७ **चूण, तूण** सङ्कोचने। चूणयति, तूणयति।

२८,२९ **पूण, मुस्त** सङ्घाते। पूणयति, मुस्तयति।

३०,३१ **ष्वर्त, स्वर्त** [6]गतिकृच्छ्रजीवनयोः। अन्त्यो दन्त्यादिः। स्वर्तयति, स्वर्तयति।

३२ **भदि** कल्याणे। भन्दयति, भन्दति।

३३ **विद** वेदनाख्याननिवासपरिवादेषु। वेदयति[7]।

1 'दरणे' घ 2 'ति। स्फिट हिंसावरणयोश्च। स्फेरयति। स्निट स्नेहने स्नेटयति। गुठि' घ 3 'भेदने' घ
4 छेदनमर्दनयोः' घ 5 'चौर्ये' घ 6 'गत्यातङ्कयोः' घ
7 'ति। वेदयते, बुध' घ

CC-0. In Public Domain. Digitization by eGangotri

३४ **बुध** बो[1]धने। बोधयति।

३५ **कुपि** [2]छादने। कुम्पयति, कुम्पति।

३६ **छपि** गत्याम्। छम्पयति, छम्पति।

३७ **टिप** क्षेपे। टेपयति।

३८,४१ **डपि, डिपि, दन्प, दिन्प** सङ्घाते। डम्पयति, डम्पति। डिम्पयति, डिम्पति। दम्पयति। दिम्पयति।

४२ **विप** क्षेपे। वेपयति।

४३ **स्तूप** समुच्छ्राये[3]। स्तूपयति।

४४ **स्तेप** क्षेपे। स्तेपयति। द्वौ दन्त्यादी।

४५,४६ **डबि, डिबि** क्षेपे। डम्बयति, डम्बति। डिम्बयति, डिम्बति।

४७ **पुर्ब** निकेतने। पूर्बयति।

४८ **शुल्ब** मानसर्जनयोः। शुल्बयति।

४९ **सम्ब** सम्बन्धे। सम्बयति। दन्त्यादिः।

५०,५१ **डभि, डिभि** सङ्घाते। डम्भयति, डम्भति। डिम्भयति, डिम्भति।

५२-५४ **दभ, दभि, दिभि** प्रेरणे। दाभयति। दम्भयति, दम्भति। दिम्भयति, दिम्भति।

५५ **साम** [4]सान्त्वप्रयोगे। दन्त्यादिः। सामयति।

५६,५७ **कुड्रि, गुड्रि** अनृतभाषणे। कुण्ड्रयति, कुण्ड्रति। गुण्ड्रयति, गुण्ड्र[5]ति*।

५८ **जुल** दीप्तौ। जोलयति।

५९ **पिल** प्रेरणे। पेलयति।

1 'बोधे' घ 2 'स्मृतौ' घ 3 'ये। दन्त्यादिः। स्तू' घ
4 'सान्त्वे' घ 5 'ति। किल प्रेरणे। केलयति। जुल' घ
* 'यत्रिघातावुक्तमत्राप्यनुसन्धेयम्'। के

CC-0. In Public Domain. Digitization by eGangotri

६० बल प्राणने । बालयति ।
६१ बुल नि[1]मज्जने । बोलयति ।
६२ भिल भेदने । भेलयति ।
६३ मुल रोहणे । मोलयति ।
६४ सेलृ चलने[2] । दन्त्यादिः । सेलयति ।
६५ चर्व भक्षणे । चर्वयति ।
६६ पर्व [3]पूरणे । पर्वयति ।
६७ सान्त्व सामप्रयोगे[4] । सान्त्वयति[5] ।
६८ लश शिल्पयोगे । लाशयति ।
६९ पष बन्धने । पाषयति ।
७० व्युष सर्गे । व्योषयति ।
७१ क्रसि [6]दीपने । क्रंसयति, क्रंसति ।
७२ कुत्स [7]अवक्षेपणे । कुत्सयति ।
७३ पस बन्धने । पासयति ।
७४ पिस गतिहिंसाबलादाननिकेतनेषु । पेसयति ।
७५ पिसि [8]दीपने । पिंसयति, पिंसति ।
७६ पुस [9]पर्दने । पोसयति ।
७७ [10]कुत्स तर्जने । कुत्सयति ।
७८ दहि [11]दाहदीपनयोः । दंहयति, दंहति ।
७९,८० वहि, वृहि दीपने । वंहयति, वंहति । वृंहयति, वृंहति ।
८१ वर्ह हिंसायाम् च । वर्हयति ।

1 'मज्जने' घ 2 'ने, सेल' घ. 3 'पूर्तौ' घ. 4 'गे दन्त्यादिः । ग.घ
5 'ति पश बन्धने । पाशयति । लश' घ 6 'भासने' घ. 7 'क्षेपे' घ.
8 'दीप्तौ' घ. 9 'पर्दे' घ. 10 'भत्स तर्जने, भत्सयति, दहि' ग. 11 'दीप्तिदाहयोः' घ.

CC-0. In Public Domain. Digitization by eGangotri

८२ **वल्ह** दीपने। वल्हयति। चत्वारो दन्त्योष्ठ्यादयः।

अथ धृषिपर्यन्तमात्मनेपदिन एव।

८३ **क्ष्ण** विज्ञाने। कारयते।

८४ **युज** [1]जुगुप्सायाम्। योजयते।

८५ **शिजि** अव्यक्ते शब्दे[2]। अणिन्यन्तं तङन्तं। शिञ्जयते, शिञ्जते।

८६ **त्रुट** छेदने। त्रोटयते।

८७ **शट** श्लाघायाम्। शाटयते।

८८ **लड** [3]ईप्सायाम्। लाडयते।

८९ **वस्त** [4]अदर्शने। वस्तयते।

९०,९१ **दन्भ, दिन्भ** सङ्घाते। दम्भयते, दिम्भयते।

९२ **तूल** पूरणे। तूलयते।

९३ **बल** निरूपणे। बालयते।

९४ **शल** श्लाघायाम्। शालयते।

९५ **दाशृ** दाने। दाशयते।

९६ **धृष** शक्ति[5] सम्बन्धने। धर्षयते।

अथ[6] गल्हिपर्यन्तं विकल्पितणिचः।

९७ **सोक** मर्षणे। दन्त्यादिः। सोकयति, सोकयते, सोकति।

९८ **बुट** हिंसायाम्। बोटयति, बोटति★।

९९ **चृत** सन्दीपने। चर्तयति, चर्तति।

१०० **वन** श्रद्धोपघातो[7] पघातोपकारश्रद्धासु। वानयति, वनति[8] रोगी, रिपून्, कार्येषु, मुक्तिं च।

1 निन्दायाम्' घ. 2 'ब्दे। अनुदात्तेत्। शिञ्ज' घ.
3 'पीडायाम्' घ 4 'अर्दने' ग, 'वधे' घ 5 'क्तिबन्ध' घ
6 'गल्हान्त' घ 7 'तोपहत्युपकार घ 8 'भुक्तः शत्रु कार्ये' घ
★'हिंसार्थानामौत्सर्गिकः स्वार्थणिज्विकल्पो द्रुमानभ्युपगत इति प्रतीयते' के

CC-0. In Public Domain. Digitization by eGangotri

१०१ **कृप** मिश्रणचिन्तासामर्थ्येषु। कल्पयति, कल्पति।

१०२ **ग्रस** अदने। ग्रासयति, ग्रसति।

१०३,१०४ **व्रीस, व्रूस**[1] हिंसायाम्। व्रीसयति, व्रीसति। व्रूसयति, व्रूसति।

१०५,१०६ **ग्रह ग्लह** [2]ग्रहणे। ग्राहयति, ग्रहति। ग्लाहयति, ग्लहति।

अथ गोत्रयतिपर्यन्तमदन्ताः[3]।

१०७ अघ [4]अघकरणे। अघयति खलः✡।

१०८ **अंश** विभाजने। अंशयति।

१०९ **कर्त** शैथिल्ये। कर्तयति।

११० **कुमाल** क्रीडायाम्। कुमालयति।

१११ **कूण** सङ्कोचने। कूणयति।

११२ **खच** बन्धने। खचयति।

११३ **खोड** क्षेपे। खोडयति।

११४ **गर्व** माने। गर्वयति[5]।

११५ **गह** गहने। गहयति[6]।

११६ **छह** कल्कने। छहयति।

११७ **तुच्छ** आवरणे। तुच्छयति।

११८ **तूण** सङ्को[7]चने। तूणयति।

११९ **पश**[8] अनुपसर्गाद् बन्धबाधस्पर्शगतिषु। पशयति[9]। सोपसर्गात् तु प्रपाशयति।

1 'वघे। दन्तोष्ठ्यादी। व्री' घ 2 'आदाने' घ. 3 'न्ताः। अंश विभाजने, अंशयति, अघ' घ. 4 'तत्कृतौ। अघ' घ.
5 'ति। गर्वयते'। घ. 6 'ति। तुच्छ' घ. 7 'चे। तूण' घ.
8 'श, पष, अनु' घ. 9 'ति। पषयति। सो' घ.

✡ 'तत्करोतीत्येव किं न सिध्यति?' के.

CC-0. In Public Domain. Digitization by eGangotri

१२० पक्ष [1]प्रतिग्रहे। पक्षयति।

१२१ पल्लूल लवनशोधनयोः। पल्लूलयति।

१२२ प्रेङ्खोल (ळ) चालने। प्रेङ्खोल (ळ) याति।

१२३ मल [2]मलकरणे। मलयति खलसङ्गः पङ्कश्च।

१२४ मृष [3]तितिक्षायाम्। अस्य णिज्विकल्पो, णिजभावेऽप्यदन्तत्वमुभयपदित्वं चास्ति। मृषयति, मृषति, मृषते।

१२५ ईह गतौ। ईहयति।

१२६ रूष [4]रूषायाम्। रूषयति[5] देहं चन्दनेन।

१२७ लभ [6]प्रेरणे। लभयति।

१२८ लल ईप्सायाम्। ललयति।

१२९ [7]वष्क दर्शने। [8]वष्कयति।

१३०,१३१ वल्पुल, वल्पूल [9]लवनशोधनयोः। वल्पुलयति वल्पूलयति।

१३२ वित्त [10]वित्तसमुत्सर्गे। वित्तयति [11]धार्मिकः।

१३३ वीज व्यजने। वीजयति वायुः।

१३४ वीर विक्रान्तौ। वीरयति शूरः।

१३५,१३६ श्लघ, श्लथ [12]दौर्बल्ये। श्लघयति, श्लथयति[13]। वा रोगी।

१३७ श्राम निमन्त्रणे। श्रामयति।

१३८ शार दौर्बल्ये। शारयति।

1 'परिग्रहे' ग·घ 2 'तत्कृतौ। मलयति। मृष' घ
3 'क्षान्तौ' घ 4 'विच्छुरणे' घ 5 'ति अङ्गं गन्धेन। लभ' घ
6 'क्षेपे'। घ 7,8 'वल्क' घ 9 'पल्लूलार्थे' घ
10 'तत्त्यागे' घ 11 'धनम्।' घ 12 'थ शार दौ' घ
13 'ति, शारयति। श्राम' घ

CC-0. In Public Domain. Digitization by eGangotri

१३९ शूर विक्रान्तौ। शूरयति।

१४०,१४१ षम, ष्टम [1]अवैक्लव्ये। समयति, स्तमयति[2]।

१४२ स्कन्ध [3]समाघाते। स्कन्धयति।

१४३,१४४ स्वन, स्यम शब्दे। स्वनयति, स्यमयति।

१४५ सङ्ग्राम युद्धे। सङ्ग्रामयति[4]।

१४६ हिन्दोल दोलने। हिन्दोलयति।

१४७ गोत्र शैथिल्ये। आत्मनेपदी। गोत्रयते।

।। इति [5]द्रुमेऽधिकाश्चुरादयः ।।

अथ सौत्राः।

१ कर्क हासे। [6]कर्कटकः।

२ चकि भ्रान्तौ। चङ्कुरो रथः।

३ मर्क प्लवने। मर्कट[7]कः।

४ सिक सेचने। सिकता।

५ मर्च ग्रहणे[8]। मर्कः।

६ कजि [9]बन्धने। कञ्जोरः।

७ पजि [10]रोधने। पञ्जरम्।

८ मजि शब्दे। मञ्जोरः[11]।

९ मट सादे। मटहः।

१० रटि स्तेये। कुरण्टकः।

११ कुठ छेदे। कुठार[12]ः।

1 'वैक्लव्ये' घ 2 'ति। सान्त्व सामने। ।सान्त्वयति' घ
3 'समाहतौ' घ 4 'ति। सान्त्व सामप्रयोगे। सान्त्वयति।
हिन्दो' ग 5 'ति चुरा' ग.घ 6 'कर्कारुः। कर्कटः' घ
7 'टः' घ 8 'णे। मर्चः मर्कः' घ 9 'बन्धे' घ 10 'रोधे' घ
11 'मञ्जुलः। मञ्जुः।' घ. 12 'रः। कुठेर आर्जकःकुठाकुः'। घ

CC-0. In Public Domain. Digitization by eGangotri

१२ उड [1]सङ्घाते। उडवा।

१३ वड आरोहे। वड(ळ)भी[2]।

१४ [3]कुक आस्तरणे। कुकूः।

१५ पुत गतौ। पुत्तिका मधुमक्षिका।

१६ लत घाते। लत्तिका गोधा।

१७ सात सुखे। सातयः।

१८ उद आघाते। उदिचः।

१९ क्षद [4]संवरणे। क्षत्ता।

२० सुदि शोभायाम्। सुन्दरः।

२१ कप [5]छादने। कपोलम्।

२२ क्षुप सादे। क्षुप्रः।

२३ रिप कुत्सने। रिप्रः[6]।

२४ रिभ [7]शब्दे। विरिब्घ[8]ः।

२५ डिम हिंसायाम्। डिण्डिमः।

२६ धम शब्दे। धमनिः सिरा। धमति।

२७ पीय प्रीणने। पीयूषम्।

२८ उर गतौ[9] उरो मेषः।

२९ तन्द्री सादमोहयोः। तन्द्री।

३० उल दाहे। उल्का[10]।

1 'संहतौ, उडुवा' घ. 2 'भी वडिशः'। घ.
3 'कुतु आस्तृतौ। कुतुपः। पुत' घ. 4 'संवृतौ' घ. 5 'चालने' ग. घ. 6 'प्रः। रेपः'। घ. 7 'रवे' घ. 8 'ब्धः। स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु रोधने। स्तभ्नाति स्तभ्नोति स्तुभ्नाति स्तुभ्नोति स्कभ्नाति स्कभ्नोति स्कुभ्नाति स्कुभ्नोति'। घ. 9 'तौ। उरगः। तन्द्री' ग, तौ। उरगः उरसः तन्द्री' घ. 10 'ल्का। उलक्षः'। घ,

CC-0. In Public Domain. Digitization by eGangotri

३१ लुल मर्दने। लुलायः।

३२,३३ सल्ल, [1]कख गतौ। सल्लकी। [2]कखेरो गिरिः।

३४ ऋश गतिस्तुत्योः। ऋश्यः *।

३५ भिष रो[3]गजये। भेषजम्।

३६ युष भजने। योषित्।

३७ रस शब्दे। रसना।

३८ लुस हिंसायाम्। लुसभः।

॥ [4]इति सौत्रा[5] धातवः॥

॥ इति श्रीनारायणभट्टविरचिते प्रक्रियासर्वस्वे

धातुखण्डः ⊕ सम्पूर्णः॥

उणादिखण्डः।

धात्वर्थमाश्रित्य भवन्त्युणादिका उणाद्यधीना निगमेऽपि च स्वराः।
अतः कृदन्तर्गतमप्युणादिकं धातोः परं छान्दसतोऽपरं ब्रुवे॥

क्वचित् सुयोजा धात्वर्थाः क्वाप्ययोज्या उणादिषु।
क्वचित् कथञ्चिद् योज्याः स्युर्वक्ष्यन्ते तत्र तत्र ते॥
अर्थं विनापि धातूक्तिर्व्युत्पत्त्यावश्यकात् कृता।
कृत्तद्धितादिसिद्धाश्च स्वसिद्धाश्च पुनः क्वचित्॥
उच्यन्तेऽत्र हि पूर्वेषां मतभेदाविलुप्तये।
व्युत्पत्तेश्च बहुत्वेन शब्दासन्देहसिद्धये॥

॥ कृपावाजिमिस्वदिसाध्यशूभ्य उण्॥ १॥

1 'कव' घ. 2 'कविरः। कवेरो गिरिः' घ.
3 'रोगे। भिषक्। भेषजम्'। घ 4 'इति कविकल्पद्रुमधातुभागः। धात्वर्थ' घ 5 'त्रः। श्रीमत्केरलभूवलयभूषणदेवनारायणधरणी-पतिकरुणाशरणेन नारायणपरिचरणपरायणेन नारायणकविना विरचिते प्रक्रियासर्वस्वे धातुखण्डः'। ग
*'गतौ हिंसायां चेत्येके' के ⊕ एतावता गपाठोऽवसितः।

CC-0. In Public Domain. Digitization by eGangotri

एभ्यः संज्ञायामुण् स्यात्। कृत्त्वात् कर्तरि। णित्त्वाद् वृद्धिः। करोतीति कारुः शिल्पी। "कार्यं कारुः" इति कर्तृमात्रेऽप्याह भट्टिः। 'न लोक–' (२–३–६९) इति षष्ठ्यभावः। आतो युक्। देहरक्षक–निर्हारकृत्त्वाद् देहं पातीति पायुर्गुदम्। [1]वातीति वायुः। रोगान् जय[2]तीति जायुरौषधम्। मिनोति प्रक्षिपत्यङ्गे पीडां मायु[3]ः। गोपूर्वादपि। गां खादित्वा प्रक्षिपति गोमायुः क्रोष्टा। स्वदते स्वादुः। साधयति सर्वं साधुः। द्रागश्नुते प्राप्यम् आशुः।

॥ छन्दसीण[4]ः ॥ २ ॥

गच्छन्त्यायवो मर्त्याः। इतः परं 'ताभ्यामन्यत्रोणादयः' (३-४-७५) इति कर्मकरणाधिकरणभावेषु कर्तरि चोणादयो यथार्हं स्युः। क्वचिद् भीमादित्वादपादानेऽपि।

॥ दॄसनिजनिचरिचटिरहिभ्यो ञुण् ॥ ३ ॥

ञित्त्वात् स्वरे भेदः। द्व्यनुबन्धसामर्थ्याद् 'जनिवध्योश्च' (७-३-३५) इति निषिद्धापि जनेर्वृद्धिः स्यात्। दीर्यते दारुः। अर्धर्चादिः। सन्यते सम्भज्यते मृगादिभिः सानुः। जायते जानुः। चरति यशसा व्याप्नोति चारुः। चट प्रियवाक्ये। भावे – चाटुः। अधोऽङ्गं त्यजति – राहुः। स्नश्च भोजः। स्नाति मज्जत्यङ्गे। स्नायुरस्थिसङ्घातः।

अस्माद्धातोरियं संज्ञा साध्येति मुनिशासने।
किं कुर्मोऽर्थान्वयः कश्चिल्लब्धश्चेत् कृतिनो वयम् ॥
सदसद् वापि यत्किञ्चिदुक्त्वा व्युत्पाद्यमित्यदः।
टीकासर्वस्वकारादिवचनं शरणं हि नः ॥

॥ किंजरयोः श्रिणः ॥ ४ ॥

किंपूर्वस्य शॄधातोर्जरापूर्वस्येणश्च ञुण्। कुत्सितं शृणातीति

1 'वाति वायुः' घ 2 'यति जायु' घ 3 'युः पित्तम्। गो' घ
4 'णः। उण् स्यात्। गच्छ' घ

CC-0. In Public Domain. Digitization by eGangotri

किशारुर्धान्यशूकं शरश्च । प्रसवे जोर्गनामेति जरायुः । 'जराजटा-वनरसेष्विणः' इति भोजः । जटायुः । अयं सान्तोऽप्यस्ति[1] ।

सान्तोऽप्ययमुदन्तेन पिप्रिये राममातृमना ।
जटायुः पङ्क्तिकण्ठेन नीता सीतेति वर्णयन् ।

वनायुर्देशः । रसायुरळी ।

॥ त्रो रश्च लः ॥ ५ ॥

त्रृधातोर्ञुण्, वृद्धौ रस्य लश्च । प्लवतेऽस्मिन्नास्यजलं तालु । अन्येभ्योऽपीष्टम् । अर्तेरालुर्गलैकदेशः ★ । शृधातोः शालुर्हिंस्रः✿ । मृङ् मालुः पत्रलता इत्यादि ।

॥ कृके वचः कश्च ॥ ६ ॥

अन्त्यस्य कः । कृकं शिरोग्रीवम् । तेन वक्ति रौति कृकवाकुः कुक्कुटः ।

॥ भृमृशीतॄचरित्सरितनिधिनिमि मस्जिभ्य उः ॥ ७ ॥

भरुर्भर्ता । म्रि[2]यतेऽत्र तृषा मरुः । शयुरजगरः । जर्लेऽपितः प्लवते तरुः▣ । भक्ष्यते चरुः । मुष्टिगूढत्वाद् व्याजेन गच्छतीव त्सरुः । खड्गादिमुष्टिः । तनोति कर्माणि तनुर्देहः । विस्तारस्य विपरीतलक्षणया कृशश्च । धनुश्चापः । मयुः किन्नरः । मस्जेर्न्यङ्क्वादित्वाज्जस्य कुः । सस्य जश्त्वं दः । मज्जति मद्गुर्जलवायसः । वटिचटिचञ्चिभ्यश्च भोजः । वर्तते वेष्टतेऽल्पवस्त्रं बटुः । चटुश्चाटुवत् । चञ्चति चलति चञ्चुः ।

1 'स्ति, वनायु' घ. 2 'यन्ते' घ.

★ 'आलुर्घटो भक्ष्यद्रव्यं चेत्युज्ज्वलदत्तः' । के. ✿ 'शालुः कषायद्रव्यमिति स एव' । के ▣ 'तरन्ति नरकमनेन रोपका इति तरुरित्युज्ज्वलदत्तः । एवमर्थभेदा व्युत्पत्तिभेदाश्च बहुश उपलब्धा अपि विस्तरभयान्नेतः परं प्रदर्श्यन्ते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ अणश्च ॥ ८ ॥

उः स्यात् । अण्यते शब्दमात्रेणोच्यते, न क्रियोपयोगीत्यणुः अल्पः ।

॥ धान्ये नित् ॥ ९ ॥

अणेर्धान्येऽर्थे उर्नित् स्यात् । स्वरे भेदः । अणुर्व्रीहिभेदः ।

॥ शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ॥ १० ॥

उर्नित् स्यात् । शरुर्हिंस्रः । पीडयत्यसुरान् स्वरुर्वज्रम् । स्नेहुर्मित्रम् । नीचभूषणत्वात् तद्धारणेन त्रपते त्रपु सीसम् । देहं प्रेरयन्तीत्यसवः । वसन्त्यनेन वसु । [1]घ्नन्त्यत्र हनुः कपोलः । क्लेदयति क्लेदुश्चन्द्रः । संबध्नाति बन्धुः । जानाति मनुरृषिः । चिन्त्यते मनुर्मन्त्रः । कटिबिन्धन्धिभ्यश्च भोजः । कटत्यावृणोति रसान्तरं कटुः । अवयवतया भवति बिन्दुः । आन्धयत्यगाधत्वाद् अन्धुः कूपः ।

॥ स्यन्देः सम्प्रसारणं धश्च ॥ ११ ॥

स्यन्देरुर्नित् स्यात्, यस्येत्वमन्त्यस्य धत्वं च । स्यन्दन्ते सर्वा आपोऽत्र सिन्धुः ।

॥ उन्देरिच्चादेः ॥ १२ ॥

क्लेदयतीतीन्दुः ।

॥ इषेः किच्च ॥ १३ ॥

उः कित् स्यात् । कित्त्वादगुणः । गच्छन्निषुः ।

॥ स्कन्देः सलोपश्च ॥ १४ ॥

शोषयन्त्यत्र कन्दुः पाकस्थानम् ।

॥ सृजेरसुम् च ॥ १५ ॥

अस्मादुः स्यात्, असुमागमो धातोः सलोपश्च । ऋ अस् ज् उ यण् । सस्य श्चुत्वम् । जश्त्वम् । सृज्यते रज्जुः ।

1 'हन्त्यत्र' घ.

CC-0. In Public Domain. Digitization by eGangotri

॥ कृतेराद्यन्तविपर्ययश्च ॥ १६ ॥

लघूपधगुणः। तर्कुः स्त्रीणां कनकभाण्डम्।★

॥ नावञ्चेः ॥ १७।

उः स्यात्। 'न्यङ्क्वादीनां च' (७-३-५३) इति कुः। न्यङ्कुर्मृगः।

॥ फलिपाटिनमिमनिजनां गुक् पटिनाकिधतश्च ॥ १८ ॥

एभ्यः उः स्यात्, फलेर्गुगागमः, पाटिनम्योः पटिनाकी सर्वादेशौ, मनिजन्योः धतावन्तादेशौ। विशीर्णत्वात् फल्गुः। पट गतौ पाटयति बोधयति पटुः; खण्डयति परान् वा। उन्नमति नाकुः वल्मीकः। मन्यते काङ्क्ष्यते मधु। तत्तद्विकारात्मना जायत इति जतु।

॥ वलेर्गुक् च ॥ १९।

वलते सम्यग्[illegible]ाति वल्गुः।

॥ शः कित् सन्वच्च ॥ २० ॥

शाधातोरुः कित् सन्वच्च स्यात्। सन्वद् द्वित्वं, अभ्यासस्येत्वं, कित्वादाल्लोपः। तनूकृतत्वाच्छिशुः।

॥ यो द्वे च ॥ २१ ॥

यातेरुः कित् स्यात् द्वित्वं च। ययुरश्वमेधाश्वः।

॥ कुर्भ्रश्च ॥ २२ ॥

भृञः कुप्रत्ययो द्वित्वं च। यण्। बभ्रुर्वर्णभेदः। हन् कृञ् प् ऋत्राभ्यः कुर्द्वित्वं च भोजोक्तम्। जघ्नुरिन्द्रः। चक्रुर्विष्णुः। 'उदोष्ठ्यपूर्वस्य' (७-१-१०२) इति धातोरुत्त्वम्। [1]उरत्त्वम्।

★ 'कर्तनद्रव्यमित्युज्ज्वलदत्तः। "त्वष्टृतर्कुचलदर्कवितर्कम्" इति नैषधीयश्लोकव्याख्याने। तर्कुः शाणचक्रमिति नारायणपण्डितः। विश्वेश्वरस्तु त्वष्टृचक्रचलदिति पाठः।' के.

1 'उरदत्त्वम्' घ.

CC-0. In Public Domain. Digitization by eGangotri

पूर्णत्वात्। पपुरुः समुद्रः। त्रायतेऽम्भसि तत्रुर्नौः।

॥ पॄभिदिव्यधिगृधिधृषिदृशिभ्यः ॥ २३ ॥

कुः स्यात्। 'उदोष्ठ्य-' (७-१-१०२) इत्युत्त्वम्। पालयति पुरुर्नृपः। पूरयति पुरुर्बहुः। भिदुर्वज्रम्। व्यधेः 'ग्रहिज्या'-दिनेत्वम्। विध्यति करैर्विरहिणं विधुश्चन्द्रः। दैत्यान् विध्यतीति[1] विधुर्विष्णुश्च। गृधुः कामः। धृषुर्धृष्टः। दृशुः सूर्यः। विदि-हृषिकाभ्यश्च भोजः। वेत्ति गजोऽङ्कुशघातादिप्रायानत्रेति विदु-र्गजकुम्भमध्यम्। हृषुर्हृष्टः। आल्लोपः। कायते पञ्चभूतेषु मुख्यतया शब्द्यते कुर्भूमिः।

॥ कृग्रोरुच्च ॥ २४ ॥

आभ्यां कुः ऋत उच्च। क्षिपति शत्रून् कुरुः। गृणाति वदति गुरुः। गिरत्यन्तर्भावयति घनांशानिति गुरुः पाषाणादिः। 'पचेरिच्चोपधायाः' इति भोजः। पिचुः कार्पासः।

॥ अपदुस्सुषु स्थः ॥ २५ ॥

सुषामादित्वात् षः। असम्यक् तिष्ठति अपष्ठुराचारभ्रष्टः। एवं दुष्ठु अशोभनं, सुष्ठु शोभनम्।

॥ रपेरिच्चोपधायाः ॥ २६ ॥

रपेर्नानार्थत्वाद् हिनस्ति रिपुः। दुर्वादान् वदति वा।

॥ अर्जिदृशिकम्यमिपंसिबाधाम् ऋजिपशितुक्बुक्दीर्घ-हकाराश्च ॥ २७ ॥

एभ्यः कुः, क्रमादृज्यादयश्च। अर्जिदृश्योः ऋजिपशी सर्वादेशौ। अर्ज प्रतियत्ने। अवक्रत्वगुण आहितोऽत्र ऋजुः। पश्यति दृष्टमेव वेत्ति पशुः। कम्यमोः तुक्बुकौ। कन्तुः कन्दर्पः। अम गतौ अम्बु। पंसेर्दीर्घः। पंसयति नाशयति दृष्टयादिकं पांसुः।

1 'ति विष्णु' घ.

CC-0. In Public Domain. Digitization by eGangotri

बाधेर्हुः। बाहुः। **भोजेन** कमेश्च बुगुक्तः। कमनीयत्वात् कम्बुः।

॥ प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च ॥ २८ ॥

पृथुः। आशु मृद्यते मृदुः। सलोपे न्यङ्क्वादित्वाम् कुः। परिपक्वधीर्भवति भृगुर्मुनिः। भृज्यत आतपैरिति गिरिशृङ्गं च। रभेश्च प्रसारणं **भोजोक्तम्**। आरभन्ते लोकहितार्थमृभवो देवाः।

॥ रङ्घिलङ्घिबंहिभ्यो नलोपश्च ॥ २९ ॥

जनैर्गम्यते रघुर्नृपः। तूर्णं गच्छति लघुः। वर्धते बहुः¤।

॥ ऊर्णोतेर्नुलोपश्च ॥ ३० ॥

वस्त्रेण छाद्यते ऊरुः।

॥ महति ह्रस्वश्च ॥ ३१ ॥

छादयत्यन्यदुरुः। **ऋक्षो रो डश्चेति भोजः**। छादयन्ति नभः छाद्यन्ते वा मेघाद्यैरुडूनि।

॥ श्लिषेः कश्च ॥ ३२ ॥

कुः अन्त्यस्य कश्च। श्लिकुर्व्यवसायवान्।

॥ आङ्परयोः खनिशॄभ्यां डिच्च ॥ ३३ ॥

कुडित् स्यात्। टिलोपः। आखनति भुवमाखुः। परात् शृणाति परशुः। 'द्युद्रुभ्यां च' इति **भोजः**। डित् कुः स्यात्। अभिगम्यते द्युः स्वर्गः। फलाद्यर्थं द्रवन्त्येनं द्रुर्वृक्षः।

॥ हरिमितयोर्द्रुवः ॥ ३४ ॥

डित् कुः स्यात्। हरिद्रुर्वृक्षः। मितद्रुर्मितङ्गमः।

॥ शते च ॥ ३५ ॥

शतधा द्रवति शतद्रु[1]र्नदी। कच्छशब्दे च **भोजः**। कद्द्रुः।

1'नंदः' घ

¤'उज्ज्वलदत्तादयस्तु लङ्घिबंह्योर्नलोपश्चेति पठित्वा बालमूल-लघ्वलमङ्गुलीनां वा लो रत्वमापद्यत इति रत्वेन रघुश्शब्दनिष्पत्ति-माहुः'। के

CC-0. In Public Domain. Digitization by eGangotri

॥ खरुशङ्कुपीयुनीलङ्गुलिग्वङ्गुहिङ्गवश्च*: ॥ ३६ ॥

एते निपात्यन्ते। खनति तुदत्यङ्गं खरुः परुषः। शङ्कतेऽध्वगोऽस्मात् शङ्कुः। पीयुरुलूकः। नीलङ्गुः क्रिमिः। लिगुर्मुनिः। अङ्गुर्देहावयवः। यत्र स्थितत्वादङ्गुष्ठता। हन्ति रोगान् हिङ्गुः।

॥ मृगय्वादयश्च ॥ ३७ ॥

मृगान् याति मृगयुः। एवं देवयुर्धार्मिकः। असहायो याति केवलयुः मानी। मित्रयुर्मित्रप्रियः। अध्वर्युः। ईर्ष्याविनीर्ष्युः[1] सुम्नयुर्यजमानः[2]। गृहयुर्गृहपतिः। मन्त्रयुर्मन्त्री।

॥ मन्दिवासिमथिचतिचङ्क्यङ्किभ्य उरच् ॥ ३८ ॥

मन्दतेऽस्यामश्वो मन्दुरा। वासयति जनान् वासुरा रात्रिः। मन्दिवाशीति **माधवपाठः**। वाशुरा। मथ्यन्तेऽत्र शत्रवो मथुरा पुरी। चतति याचनेनाभीष्टं साधयति चतुरः। चङ्किः सौत्रो गतौ। चङ्कुरो रथः। अङ्कयति भुवमङ्कुरः।

॥ व्यथेः सम्प्रसारणं धः किच्च ॥ ३९ ॥

अन्त्यस्य धः। कित्त्वादगुणः विधुरः★।

॥ मकुरदर्दुरौ च ॥ ४० ॥

दर्पणभेकयोर्निपात्येते। मङ्क्यते मण्ड्यतेऽनेन मकुरः। दृणाति शब्दैः कर्णौ दुर्दुरः✪। **भोजस्त्वाह** – 'मुर्मुरमुकुरदर्दुरचिकुरकुक्कुरकुकुरकुकुन्दुरोन्दुरनूपुरविथुरमद्गुरवागुरादयः'। मारयत्यसह्यत्वान्मुर्मुरस्तुषाग्निः।

1 'ष्र्युः असूयुः। सुम्न' घ. 2 'नः। अस्मयु, गृह' घ.

* 'लिग्वन्तमेवोज्ज्वलदत्तादिपाठः'। के

★ 'उज्ज्वलदत्तादिपाठस्तु व्यथेः सम्प्रसारणं किच्चेत्येव। विथुर इत्येव चोदाहृतम्'। के

✪ 'अत्र 'मद्गुरादयश्च' इति सूत्रमन्यत्रोपलभ्यते।' के

CC-0. In Public Domain. Digitization by eGangotri

अकारं मुकुरस्यादावुकारं दर्दुरस्य च ।
बभाण पाणिनिस्तौतु व्यत्ययेनाह **भोजराट्** ॥

चक तृप्तौ । तर्पयति द्रष्टॄन् चिकुरः । कुक आदाने । आदत्ते मांसादीन् कुक्कुरः श्वा । कुरति भषति कुक्कुर इति केचित् । कुकुरो यादवः । कुकुन्दुरौ नितम्बकूपकौ । मुखाम्बुना खनितव्यमुन्दन् उन्दुरो मूषिकः । नौति ध्वनति नूपुरः । व्य[1]थति विथुरो राक्षसः । माद्यति मद्गुरो मत्स्यभेदः । वान्ति गच्छन्त्येनां मृगा वागुरा । आदिशब्दान्निष्ठुराद्याः । इति ।

॥ असेरुरन् ॥ ४१ ॥

क्षिपति देवानसुरः ।

॥ मसेश्च ॥ ४२ ॥

मसुरा वेश्या ।

॥ शावशेराप्तौ ॥ ४३ ॥

शुपूर्वात् प्राप्त्यर्थादशेरुरन् । शुशब्दः पूजार्थोऽव्ययम् । पूजां प्राप्नोति श्वशुरः । आश्वाप्तव्यः श्वशुर इति भाष्योक्तेराल्लोपो वा ।

॥ अविमह्योष्टिषच् ॥ ४४ ॥

अविषः समुद्रः । पूज्यत्वान्महिषी देवी । टित्त्वान्ङीप् । अपूज्यत्वान्महिषः पशुः ।

॥ अमेर्दीर्घश्च ॥ ४५ ॥

पापहेतुत्वादजीर्ण्या वा भोक्तारं रुजतिआमिषम् ।

॥ रुहेर्वृद्धिश्च ॥ ४६ ॥

रोहति गिरिशृङ्गं रौहिषो मृगः ।

॥ तवेर्णिद् वा* ॥ ४७ ॥

1 'थयति' घ.

*'तविः सौत्रो धातुरित्युज्ज्वलदत्तादयः ।' के.

CC-0. In Public Domain. Digitization by eGangotri

तविषं ताविषं च बलम्। टित्त्वान्ङीब्रूह्य:।

॥ नञि व्यथेः ॥ ४८

अव्यथिषः सूर्यः।

॥ किलेर्बुक् च ॥ ४९ ॥

किलन्ति क्रीडन्त्यनेन खलाः किल्बिषम्।

॥ इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमहिमिहिमुहि-
मुचिरुचिरुधिबन्धिशुषिभ्यः किरच् ॥ ५० ॥

कित्त्वादगुणः। इषिरः क्षिप्रः। मदयति मदिरम्। मोदन्तेऽनेन मुदिरो मेघः। खिद्यन्ते विरहिणोऽनेन खिदिरश्चन्द्रः। छिन्नत्वाच्छिदिरं छिद्रम्। भिदिरं वज्रम्। मन्दन्तेऽस्मिन् मन्दि¹रम्। चन्दिरो हस्ती। आर्द्रीभूतमिव व्याप्नोति तिमिरम्। मह्यते महिरं विचित्रम्★। वर्षोत्सृष्टत्वान्मेहति सिञ्चति मिहिरः सूर्यः। मुह्यन्त्यस्मात् खला मुहिरं पवित्रम्। मुचिरो मोक्षः। दीप्यते स्वदते वा रुचिरम्। रुणद्ध्यस्थ्यादिकं रुधिरम्। कित्त्वान्नलोपः। श्रोत्रं बद्धं रुद्धमस्मिन् बधिरः। शुष्यति शुषिरं काष्ठं विवरं च।

॥ अशेर्णिच्च ॥ ५१ ॥

व्याप्नोत्याशिरः सूर्यः। अशेर्निच्चेति पाठेऽशिरः सूर्यः।

॥ अजिरशिशिरशिथिरशिबिरस्थिरस्फिरस्थविरखदिराः ॥ ५२ ॥

यान्त्यत्राजिरम्। शशति गच्छति शिशिरः कालः। श्लथते शिथिरं श्लथम्। रलयोरभेदाच्छिथिलम्⊕। तिष्ठति चिरं स्थिरम्। स्फायते स्फिरं प्रभूतम्। ष्ठीव्यते निरस्यते जनैः

1 'रम्। चन्दयति चन्दि' घ.

★ महिरन्यत्र नोपलभ्यते' के ⊕'शेरतेऽत्र योधाः शिबिरं, शीङो बुगागमो ह्रस्वश्च निपातनात्। शिबिरशब्दः सूत्रे प्रक्षिप्त इति प्रतीयते' के

CC-0. In Public Domain. Digitization by eGangotri

स्थविरः । खद स्थैर्ये । खदिरः । कविरसरिरौ च भोजः । ऋभाद-क्षिरोगो जलं च ।

॥ सलिकल्यनिमहिभ[1]टि (डि) भण्डिचण्डिशण्डिपिण्डितुण्डि-कुकिभूभ्य इलच् ॥ ५३ ॥

षल कान्तौ । काम्यते सलिलम् । कल्यते रजोभिः कलिलम् । प्राणन्त्यनेन अनिलः । महयते महिला । महेरेलजिति भोजः । महेला । [2]भटि(डि)लो भृत्यः★ । भण्डिलो दूतः । चण्डिलो नापितः । शण्डिल ऋषिः । पिण्डयति सङ्ख्याः । पिण्डिलो गणकः । तुण्डते पीडयति वाग्भिः तुण्डिलो बहुभाषी । आदत्ते जनमनांसि कोकिलः । भविलो भव्यः ।

ऋपेश्च✪ ॥ ५४ ॥

कप छादने । छादयति वर्णान्तरं कपिलः ।

॥ गुपादिभ्यः कित् ॥ ५५ ॥

गुपिलः पक्षिभेदः कुटिलम् ।

॥ मिथिलादयश्च ॥ ५६ ॥

मिथृमेथृ सङ्गम इति पाठात् संगच्छन्तेऽत्रेति मिथिला । भोजोक्तौ तु स्थलति प्रतिष्ठत्यत्र शुद्धद्रव्यमिति लस्य डत्वे नुमि च स्थण्डिलम् । विशेषेण तर्पयति गन्धैर्विचकिलो मल्लिकाभेद । गोभिल ऋषिः । निकुम्भिला गुहा ।

॥ पथिकथि[3]कठिकुठिगडिगुडिदंशिभ्य एरक्⊗ ॥ ५७ ॥

पथेरो गन्ता । कथेरः कथ[4]कः । कठेरः, कुठेरश्च आर्जकः । गडेरो मेघः । गुडेरो राजा । कित्त्वान्नलोपः । दशेर उष्ट्रजातिः ।

1,2 'भडि' घ. 3 'थि कुठि' घ 4 'काः । कुठेरः आर्जं' घ
★ 'भटिः सौत्रो धातुरित्युज्ज्वलदत्तादयः' । के. ✪ 'अन्ये तु कमेः पश्चेति पठन्ति' के. ⊗अन्ये तु पथिकथ्योः स्थाने पतीति पठन्ति' के.

CC-0. In Public Domain. Digitization by eGangotri

।। कुम्बेर्नलोपश्च⊗ ।। ५८ ।।

छादयति धनं कुबेरः ।

।। शदेस्त च ।। ५९ ।।

शतेरो नदीभेदः★ ।

।। मूलेरादयश्च ।। ६० ।।

मूलेरं[1] पद्मम् । आदिग्रहणात् पतेरः पक्षी[2] । सतेरो वायुः । मुदेरो मूर्खः । कवेरो गिरिः । नाळिकेर*ः । शृङ्गिवेर[3]ः ।

[।। कबेरो तच् पश्च ।। ६१ ।।

कबृ वर्णे । कपोतः ।

।। भातेर्डवतुप् ।। ६२ ।।

भातीति भवान् ।]

।। कठिचकिभ्यामोर[4]न् ।। ६३ ।।

कृच्छ्रं जीवति कठोरः क्रूरः । ज्योत्स्नया तृप्यति चकोरः । तर्पयति द्रष्टॄन् वा ।

।। किशोरादयश्च ।। ६४ ।।

कश गतिशासनयोः । शास्यते किशोरः✡ ।

।। कपि[5]गडिगण्डिकटिपटिभ्य ओलक् ।। ६५ ।।

छादयति दन्तादीन् कपोलः । [6]गडोलो मधुरद्रव्यभेदः । गण्डोलकटोलपटोला लताभेदाः । 'बहुलमन्यत्रापि' । तेन कल्लोलतक्कोलौ । तक्कोलः सुधाभेदः ।

।। मीनातेरूरन् ।। ६६ ।।

गुणः । हिनस्ति सर्पान् मयूरः ।

1 'रं पण्यम् ।' घ 2 'क्षी । कठेरो दुःखितः । सते' घ 3 'रः । कठि' घ. 4 'रच्' घ. 5 'कडि' घ. 6 'कडोलो' घ.

⊗ 'इदित्वान्नलोपविधानम्' के. ★ शत्रु रित्यन्ये' के. *औत्तराहपुस्तकेष्वयं नारिकेल इति लिख्यते । के. ✡ आद्युक्तेः सहोरादयः' के.

CC-0. In Public Domain. Digitization by eGangotri

मध्योदात्तो मयूरोऽयमिष्टो नित्त्वान्न सिध्यति ।
तस्मादूरान्त एवोक्तो मयूरो **भोजभूभुजा** ॥

(॥ स्यन्देः सम्प्रसारणं च ॥ ६७ ॥
सिन्दूरः ।)

सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥ ६८ ॥

बध्यते—सेतुः । तन् तु । वलादित्वादिटि प्राप्ते 'तितुत्र–' (७-२-९) इति निषेधः । तन्तुः । गन्तुर्गन्ता । आगन्तुरतिथिः । परिणतत्वान्मस्तु दधिमण्डः । मिश्रीभवति सेव्यते वा सक्तुः । अव् तु । 'ज्वरत्वर–' (६-४-२०) इत्यत्र क्ङितीत्यनुवृत्त्यभावादुपधावकारयोरूडिति **माधवः** । ऊ तु । 'सार्वधातुकार्धधातुकयोः' (७–३–८४) इति गुणः । रक्षत्यात्मानमोतुः । अभिदधात्यर्थं धातुः । धीयते देहेन गिरिणा वेति शुक्लादौ गैरिके च । क्रुशेर्गुणे शस्य षत्वे ष्टुत्वे क्रोष्टुशब्दः । पूञश्च **भोजः** । पोतुः पविता ।

॥ पः किच्च ॥ ६९ ॥

कित्त्वाद् 'घुमास्था–' (६–४–६६) इतीत्त्वम् । पिबति जलं पीतुः सूर्यः । अञ्जेश्च **भोजः** । कित्त्वान्नलोपः । कुत्वम् । अनक्ति हिमेन अक्तुर्निशा ।

अर्तेस्तुः ॥ ७० ॥

किदित्यनुवर्तते । गच्छत्यृतुः ।

॥ कमि मनि जनि गा भा या पाहिभ्यश्च ॥ ७१ ॥

तुः स्यात् । कन्तुः कुसूलः । अर्थभेदादपौनरुक्त्यम्★ । असह्यत्वात् सततं निरूप्यते मन्तुरपराधः । जन्तुः । गातुर्गायकः । भातुः सूर्यः । यातुरक्षः । पातुस्त्राता✿ । ण्यर्थवृत्तेर्हेरवगमयत्यर्थं, वर्धयति

★'अर्जिदृशि–' (सू–२७) इति सूत्रसिद्धस्य कन्दर्पार्थत्वमुक्तम् ।' के
✿'अन्ये पेति न पठन्ति ।' के.

CC-0. In Public Domain. Digitization by eGangotri

कार्यं वा हेतुः। असेश्च भोजः। अस्तुरस्तिभावः।

॥ चायः कीच ॥ ७२ ॥

दृश्यते केतुर्ध्वजः।

॥ आप्नोतेर्ह्रस्वश्च ॥ ७३ ॥

अप्तुरग्निः।

॥ [1]वसेस्तुन् ॥ ७४ ॥

वस्तु।

॥ अगारे णिच्च ॥ ७५ ॥

वसन्त्यत्र वास्तु।

॥ कृञः क्तुः ॥ ७६ ॥

कित्त्वादगुणे यण्। क्रियते क्रतुः।

॥ एधिवह्योश्चतुः ॥ ७७ ॥

चित्त्वं स्वरार्थम्। एधतुः पुरुषः। उद्वहन्त्यनेन वहतुः स्त्रीधनम्।

॥ जीवेरातुः ॥ ७८ ॥

जीवातुः।

॥ आतृकन् वृद्धिश्च ॥ ७९ ॥

जैवातृकश्चिरजीवी। जीवन्त्यनेन देवा इतीन्दुश्च ॥

कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥ ८० ॥

कर्षूः कण्डूः। भक्षयत्यरीन् चमूः। तनूः। धनूः शरः। षर्ज आर्जने, सर्जूर्वणिक्। खर्जयति पीडयति खर्जूः कण्डूः। कन्देश्च भोजः। कन्दति शब्दायते कन्दूः पादकटकः।

॥ मृजेर्गुणश्च ॥ ८१ ॥

मर्जूः रजकः। रज इत्यन्ये।

॥ खडेश्च* ॥ ८२ ॥

1 'वसस्तुन्' घ.

*खडेर्डुड्वेत्येके।' के

CC-0. In Public Domain. Digitization by eGangotri

खड्डूर्मृतशय्या। 'खड्यज्योर्डुक्जूकौ च' इति **भोजः**। खड्डूर्बालानामाभरणम्। अज्यते प्राप्यते पुत्रै रज्जूर्जननी।

॥ वहेर्धश्च ॥ ८३

उह्यते वधूः।

॥ कषेश्छश्च ॥ ८४ ॥

कष्यते नखैः कच्छूः पामा।

॥ णित् कसिपद्यर्तेः ॥ ८५ ॥

ऊर्णित् स्यात्। वृद्धि[1]: कासूः शक्तिः पद्यतेऽनया पादूरुपानत्। आरूर्वृक्षभेदः।

॥ अणो डश्च ॥ ८६ ॥

अणेरूर्णित् स्यात्, डश्चान्तादेशः। आडूर्भृङ्गारः। लत्वं चाह **भोजः**। आलूर्भृङ्गारः। अत्र णिदित्यननुवृत्ते रड्डूर्जलतरणीति **माधवः**।

॥ नञि लम्बेर्नलोपश्च ॥ ८७ ॥

णित्वाद् वृद्धिः। विपरीतार्थत्वादलाबूः।

॥ के श्र एरङ् च ॥ ८८ ॥

अस्य ऊः ऋत एरङ् च। कशेरूर्वीरुद्भेदः।

॥ त्रो डुक् च ॥ ८९ ॥

प्लवते व्यञ्जनेषु तड्डूर्दर्विः। **भोजमते**[2] दुक्। तदूर्दर्विः।

॥ दरिद्राया लोपश्च ॥ ९० ॥

दरिद्रा इत्यस्य इआवर्णयोर्लोप ऊश्च स्यात्। दरिद्राति क्षीणो भवति अनया दर्द्रूः कुष्ठभेदः। 'दरिद्रार्यालोपश्च' इति[3] मते★ दद्रूः।

॥ नृतिगृध्योः कूः ॥ ९१ ॥

1 'द्धिः। गच्छति कासूः' घ. 2 'ते त्रो दुक्' घ. 3 'ति पाठे' घ.

★'रि आ इत्यनयोर्लोपे' के

CC-0. In Public Domain. Digitization by eGangotri

कित्त्वादगुणः। नृतूर्नर्तकः। गृधूर्दीनवाक्*। शृधूः प्रज्ञेत्येके✿। कुहेश्च भोजः। तमसा[1] छादनात् कुहनां करोतीव कुहूः।

॥ ऋतेरम् च ॥ ९२ ॥

ऋतेः कूः स्यादमागमश्च। यण्। रतूर्नाम नदी।

॥ अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः ॥ ९३ ॥

अदिबन्धने। अन्दूः पादनिगळः। दृम्भूः सर्पजातिः। जम्यते भक्ष्यते जम्बूः। कफेलूः श्लेष्मातकः। कर्कन्धूर्बदरी। दधात्येनां पुनरपि दिधिषूः द्विरूढा स्त्री। 'चपेर्नुम् चे'ति भोजः। चप सान्त्वने। मधुरं वदति चम्पूः प्रबन्धभेदः।

॥ मृग्रोरुतिः ॥ ९४ ॥

उतेरिकार इत्। गुणः। नानार्थत्वान्म्रियते गच्छति मरुद् वायुः। न म्रियन्ते देवाः। गिरति छादयत्यङ्गं गरुत्।

॥ ग्रो मुट् च ⊗ ॥ ९५ ॥

गिरन्त्येनं गर्मुत् श्यामाकः।

॥ हृषेरुलच् ॥ ९६ ॥

'हृषिवृतिचटिशकिशङ्क्युत्कण्ठिभ्य उलच्' भोजः। हर्षुलो हर्षवान्। वर्तुलः (ळः)। चटुलः। शक्नोति धावितुं शाकुलो मत्स्यः। शङ्क्यतेऽस्याः शङ्कुला [2]खण्डनी। उत्कण्ठुल उत्कण्ठावान्। निचुल(ळ)वञ्जुल(ळ)बकुल(ळ)तुमुलपृथुलस्थुल(ळ)विसंस्थुला(ळा)दय इति च। निजेश्चत्वम्। निज्यते क्षाल्यते जलैर्निचुलः। वजेर्नुम्। वजति चलति जले वञ्जुलः। बदस्थैर्ये। दस्य कः।

1 'सा सर्वाच्छा' घ.

2 'बन्धनी' घ.

*'नृतिशृध्योरिति पठित्वा' के.

✿'अपानमित्यन्ये' के. ⊕'उतेर्म डागमः।' के

CC-0. In Public Domain. Digitization by eGangotri

स्थिरत्वाद् बकुळः तम्यन्त्यस्मिन् जनास्तुमुल भयानकम्। तिष्ठन्त्यत्र स्थुळः पटकुटीभेदः। त्रित्रिय तिष्ठति विसंस्थुळो व्याकुलः (भयानकः)। शंसेर्विशंस्थुळ इति नाथः।

॥ हृसृरुहियुषिभ्य इतिः ॥ ९७ ॥

मनोहारितया हरिद् वर्णः। सरित्। रोहिन्मृगः। युषिः सौत्रो यौत्यर्थः। मिश्रीभवति पुंसायोषित्।

॥ तार्टेर्णिलुक् च ॥ ९८ ॥

णिलुकि न लुमता–' (१-१-६३) इति वृद्ध्यभावः। चौरादिकः तट आघात इति टान्तोऽयं वृत्तावुक्तः। आहन्ति दृष्टिं वृक्षादीन् वा तटित्। ताडेरिति भोजमतम् तडित्।

॥ षणेर्डः★ ॥ ९९ ॥

षण सम्भक्तौ। न सेव्यते स्त्रीभिः षण्डः। बाहुलकात् षः सो न। शमेढं इति केचित्। शाम्यति-शण्डोऽपि क्लीब एव। कुणेश्च भोजः। कुण्डो धूर्तः। 'नञि सहेः षश्चादेः' इति च✿। सह् ढ। 'हो ढः' (८–२–३१) 'ढो ढे लोपः' (८–३–१३)। दीर्घः। न सहतेऽन्यानभिमानिनक्षत्रत्वादषाढा।

॥ कमेरठः ॥ १०० ॥

कमनोयत्वात् कमठः। जॄकृमि रमिभ्योऽठः' इति भोजः। जरठः। रमठो देश⊕ः।

(अत्र सूत्रत्रयमधिकमुज्ज्वलदत्तादयः पठन्ति।)

॥ कलस्तृपेश्च ॥ १०१ ॥

तृपेः कमेश्च कलप्रत्ययः। तृपला लता[1]विशेषः। काम्यते कमलम्। कुयमिकुपिशलिकलिपलिभ्यश्च भोजः। कित्त्वादगुण कुपलः उवङ्। कुवली बदरी। यमलं(ळं)युग्मम्।

1 'ताभेदः' घ.

★ 'शमेढं इत्यन्ये' के. ✿ 'ढोऽनेन विधीयते, न डः'। के.

⊗'यद्भवत्वाद् रामठं हिङ्गु'। के.

CC-0. In Public Domain. Digitization by eGangotri

प्रवाल:। शलति पतति शललं शल्यरोम। बध्यते कललम् गर्भाद्यावस्था। पलति गच्छति देहात् पललं खण्डितमांसम्।

॥ शपेर्बश्च ॥ १०२ ॥

शबल: (ळ:)।

॥ वृषादिभ्यश्चित् ॥ १०३ ॥

कल: चित् स्यात्। सिञ्चति सस्यादिकं वृषल:। आदि-[1]ग्रहणात् पटिदेविकेविवपिभ्य:। पटति व्याप्नोति पटलम्। व्यवहरति पूजया देवल:। केवृ सेवने। निरपेक्षत्वान्न सेवतेऽन्यान् वा, सहायार्थं सेवतेऽन्यान् वा केवल:। वपेर्यजादित्वात् क्रिति प्रसारणम्। उप्यतेऽर्प्यते भूमावुपल:।

मृजेष्टिलोपश्च ॥ १०४ ॥

कलश्च चित् स्यात्। मृज्यते मलम्।

॥ चुपेरच्चोपधाया: ॥ १०५ ॥

कलश्च चित् स्यात्। चोपति चलति चप[2]लम्।

॥ शकिशम्योर्नित् ॥ १०६ ॥

[3]शक्यते ग्रहीतु शकलम्। शमनीयत्वाच्छमलं दोष:।

॥ भ्रमिमस्योरुच्चोपधाया: ॥ १०७ ॥

भ्रुमलमक्षिरोग:। मुसल[4]म्।

॥ कम्बला(ळा) दयश्च★ ॥ १०८ ॥

काम्यते कम्बल(ळ)म्। शम्बलं(ळं) पाथेयम्। अत्र **भोज:– 'मृदिमण्डिकुण्डिकन्दिभ्योऽलच्'**। मृद्यते करेण मर्दल: (ळ:)। 'अरेभि भेरीभिरनंदि मर्दलै:(ळै:)' इति प्रयोग:। मद्दल(ळ)इति तु कवय इति **स्वामी**। मण्ड्यते वर्तुलताभङ्ग्या मण्डलम्। कुण्ड्यते दह्यते निर्माणे कुण्डलम्। कन्द्यते मृदुत्वात् पीड्यते

1 'ग्रहात्' घ. 2 'ल:।' घ 3 'शङ्क्यते' घ. 4 'ल:' घ.
★ 'एतत्सूत्रद्वयमन्ये न पठन्ति' के।

CC-0. In Public Domain. Digitization by eGangotri

कन्दलः (ळः)। **'लङ्गेर्दीर्घश्च'**। भुवि गच्छति लाङ्गलं हलम्। **'ऋजनोर्गुक् च।'** न गच्छन्त्यनेन अर्गल[1]म्। न जायतेऽत्र किञ्चिज्जङ्गलो निर्जलदेशः। **'कुगुध्वञ्चिचञ्चिवहिदिहित्ऋसृतुसिकुसिभ्योऽलः'**। एभ्यश्चिदलः स्यात्। गुणे बवयोरैक्याद् बः। भुक्तौ सशब्दत्वात् कवलः(ळः)। गवते ध्वनति गवलं[2] माहिषशृङ्गम्। धुनोति निरस्यत्यन्यशोभां धवलः (ळः)। अञ्चति चलत्यञ्चलं। वस्त्रादीनामग्रम्। चञ्चलम्। वहति पुष्टिं व(ब)हलः (ळः)। दिह्यत उपलिप्यते देहली(ळी)। प्लवते चलति तरलः(ळः)। अञ्जसा गच्छति सरलः(ळः) ऋजुः। तोसला जनपदः। संश्लिष्यन्त्यत्र कोसला जनपदः। **मुरलोरलमुसलकुशलकोमलकोहलविरलकेरलकुन्तलकपिञ्जलकज्जलेञ्जलच्छगलभगलाहलकाहलनाहलानलयुगलपिप्पलादयः**। मुर संवेष्टने। आव्रियते जनैर्मुरलो जनपदः। उर्वी हिंसार्थः। पोटयत्यन्यानुरल उत्कटः। मुस्यते खण्ड्यतेऽनेन व्रीह्यादिर्मुसलः। पूर्व*त्रास्यार्थाञ्जस्यं न। कुश भाषण इति भैवादिकोऽस्तीति **वृत्तौ**। सम्यग्भाषते कुशलः। काम्यते कोमलः। कोहलो भरतसूनुः। अन्योन्यं विरह्यते विरलम्। कीर्यन्ते व्याप्यन्ते मरिचादिभिः केरलाः। कनति दीप्यते कुन्तलः। कपिञ्जलो गौरतित्तिरिः। कज्जळो मषी। इज्जळो वृक्षभेदः। छगलश्छागः। भगल ऋषिः। आहन्तीत्याहलो विषाणाम्। कणति ध्वनति काहळः। नाहलो नीचजातिः। अनन्त्यनेनोदरस्थेनानलः॥ युज्यते मिथो युगळम्। पिप्पलो वृक्षः। आद्युक्तेर्मुद्गल ऋषिः। कीर्यते कुरलः (ळः)। इति।

1 'लः' घ 2 'लः' घ.

* 'भ्रमिमस्योरित्यत्र' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ कणेष्ठः★ ॥ १०९ ॥

शब्दं करोति कण्ठः।

॥ ञमन्ताड्डः ॥ ११० ॥

ञमङणनान्ताद्धातोः डः। दम्यतेऽनेन दण्डः। रमते स्वेच्छया रण्डा कुलटा। मन्यते काङ्क्ष्यते मण्डः। भणति भण्डो वन्दी। चम'त सुखं चण्डः। गम्यते जनैर्द्रमिडो देशः। बाहुलकाद् 'नेड वशि–' (७-२-८) इति निषेधाभावः।

॥ कुणादिभ्यः कित्✿ ॥ १११ ॥

कुण शब्दोपकरणयोरित्यत[1]: पाकादावुपकरोतीति कुण्डम्। रुण्डः कबन्धः।

॥ स्था चतिमृजेरालज्वालञालीयचः ॥ ११२ ॥

स्थ आलच्। तिष्ठत्यन्नमस्मिन् स्थालम्। चतेर्वालञ्। चतेर्गत्यर्थवृत्त्या गच्छन्त्यत्र त्याजयत्यागार्थं चात्वालः[2]। मृजेरालीयच्[3]। 'मृजेर्वृद्धिः'। मृज्यन्तेऽत्र पात्राणि मार्जालीयम्। द्वौ यज्ञभूभागौ।

॥ पतिचण्डिभ्यामालञ् ॥ ११३ ॥

ञित्त्वाद् वृद्धिः। पतन्त्यस्मिन् पाताल (ळ) म्। कोपेन क्रूरकर्मलक्षणतया चण्डालः। "**अक्तमृवृभ्य आलच्**' इति **भोजः**। अरालः। क्रुञ् हिंसायाम्। करालः क्रूरः। न म्रियते दिव्यपक्षित्वान्मराळः। व्रियते याच्यते वरालो दाता⊕।

1 'तः। तस्योपकरणमात्रवृत्त्या पाका' घ.

2 'लम्' घ. 3 'थर्' घ.

★ 'अन्ये त्वेतत् सूत्रं 'कमेरठ' इत्यस्मात् परतः पठन्ति।' के.

✿ अन्ये क्वादिभ्य इति पठित्वा कवर्गादिभ्य इति व्याचक्षते, कुण्डगुडघुण्डकाण्डादींश्चोदाहरन्ति।' के.

⊕ 'अत्रतमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्' इति सूत्रमन्यत्रोपलभ्यते' के

CC-0. In Public Domain. Digitization by eGangotri

॥ पतेरङ्गच् पक्षिणि ॥ ११४ ॥

पक्षिणीत्यतन्त्रम् । सूर्यादावपि स्यात् । पतङ्गः ।

॥ त्रादिभ्यश्च ॥ ११५ ॥

प्लवते तरङ्गः । तमिलूभ्यां च भोजः । तम्यते काङ्क्ष्यते वासाय तमङ्गो हर्म्यनिर्यूहः । लवङ्गस्तरुः ।

॥ विडादिभ्यः कित् ॥ ११६ ॥

विडङ्गस्तरुः । अत्र भोजः– कुरिविडिमृदिपिशिभ्यः कित् कुर शब्दे कुरङ्गः । मृद्यते मृदङ्गः । पिश अवयव इत्यस्य दीप्त्यर्थवृत्त्या पिशङ्गः । 'मनस्तुक् च' । कित्वाद् 'अनुदात्तोपदेश–' (६–४–३७) इति नलोपः । ज्ञानवत्त्वान्मतङ्गो मुनिः । 'कलिस्फुलिभ्यामिङ्गक्' । कलिङ्गः । स्फुलति चलति स्फुलिङ्गः । 'भृञो भुल च' । भुलित्यादेशः । भुलिङ्गः शकुनिः । 'माङि तुलेरुङ्गच्' । न तुल्यतेऽनेन मातुलु(ळु)ङ्गः । 'कमिशमितमिभ्यो डित्' । कुङ्गो देशः । शुङ्गो मुनिः । न ताम्यति न क्षीयते तुङ्गः । 'सर्तेरुच्च' । सरत्यनया सुरुङ्गा गूढमार्गः । इति ॥

॥ सर्तेर्णित् ✿ ॥ ११७ ॥

णिदङ्गच् स्यात् । सरति सारङ्गः । नाना गच्छतीति चित्रवर्णश्च[1] । 'वृनृभ्यां च' इति भोजः । वारङ्गः काण्डशल्यन् । नारङ्गस्तरुः ।

॥ गन् गम्यद्योः ॥ ११८ ॥

गम्यते जनैर्गङ्गा । अत्ति सर्वमदङ्गः समुद्रः★ ।

॥ भृञः किन्नुट् च ॥ ११९ ॥

1 इव । सारङ्गः । वृ' घ.

✿'अन्ये त्वेतत्स्थाने 'सृवृभ्रोर्वृद्धिश्च' इति पठन्ति' के.

★'अत्र 'छापू खडिभ्यः कित्' इत्यप्यन्यैः पठ्यते' । के

CC-0. In Public Domain. Digitization by eGangotri

भरति मधु भृङ्गः।

॥ शृणातेर्ह्रस्वश्च ॥ १२० ॥

हिनस्त्यनेन शृङ्गम्। पीङश्च भोजः। पिबत्यन्यशोभां। पिङ्गः।

॥ गण् शकुनौ ॥ १२१ ॥

शृणातेः शकुनौ वाच्ये गण्, तस्य नुट् च स्यात्। वृद्धिः। शार्ङ्गः पक्षी।

॥ मुदिग्रोर्गग्गनौ ॥ १२२ ॥

गकः कित्त्वादगुणः। मोदतेऽनेन मुद्गः। गृणाति वेदान् गर्गः। भृस्वृभ्यां च भोजः। बिभर्ति लोकान् भर्गः। स्वरन्ति स्तुवन्त्येनं स्वर्गः।

॥ अण्डन् कृसृभृवृञः ॥ १२३ ॥

क्रियते शिल्पिना करण्डः। सरण्डश्चतुष्पात्। भरण्डः कृमिजातिः। वरण्डः काष्ठभेदः। त्रश्च भोजः। तरण्डः प्लवः। ''[1]अण्डैरण्डपिचण्डकाण्डभाण्डवतण्डपोगण्डादय' इति च। पचत्यग्निरत्र पिचण्ड उदरम्। कायति ध्वनति काण्डं शरः समूहश्च। भृञः प्रत्ययस्याऽऽदिदीर्घो डित्वं च। भ्रियते भाण्डः। वतण्डो मुनिः। पोगण्डो बालः। आद्युक्तेः कूश्माण्डः। कुरण्डः कोरण्डश्च वृक्षौ।

॥ श् ऋद् ऋ भसोऽदिः ॥ १२४ ॥

अदेरिकार इत्। शृणाति कामुकान् शरत्। दरत् देशः। भसत् जघनम्।

॥ दृणातेः षुग्घ्रस्वश्च ॥ १२५ ॥

दीर्यते दृषत्।

1 'आण्डै' घ.

CC-0. In Public Domain. Digitization by eGangotri

॥ एतेस्तुट् च ॥ १२६ ॥

एतद् ।

॥ त्विषिमिषिभ्यां च☆ ॥ १२७ ॥

अदिः स्यात् । त्वेषद् देवविशेषः : मेषन्महिषजातिः ।

॥ त्यजियजितनिभ्यो डित् ॥ १२८ ॥

त्यद्, यद्, तद् । **'इणो दमिगिति भोजः'** । इदम् । **'कौर्तेर्डिमिर्'** इति च । किम् ।

॥ सर्तेरटिः ॥ १२९ ॥

सरण्मेघः ।

॥ लङ्घेर्नलोपश्च ॥ १३० ॥

लघड्वायुः ।

॥ पारेरजिः ॥ १३१ ॥

पारक् प्राकारः सर्पिश्च । **'भिषेः कित्'** इति भोजः । भिषक्★।

॥ युष्यसिभ्यां मदिक् ॥ १३२ ॥

युष्मद्, अस्मद् ।

॥ अर्तिस्तु सुहु सृधृक्षि क्षुभायापदि यक्षिणीभ्यो मन् ॥ २३३ ॥

व्याप्नोति नेत्रमर्मोऽक्षिरोगः । स्तोमः [1]सङ्घातः । सोमः । हुतिर्होमः । प्राप्यत्वात् सर्मः सुखम्⊗ । धृत्रः प्रीत्यर्थत्वात् तत्साधनं वर्मः । निवसन्त्यनेन [2]क्षेमं रक्षा[3]। क्षोमो दुकूलम् । बाहुलकेन गुणाभावात् क्षुमा अतसीति **माधवः** । भामः सूर्यः । यामः । पद्यते गम्यते भृङ्गैः पद्मं कमलम् ।

पद्मं हि पद्यतेरुक्तं न पतेर्माधवादिभिः ।
स्पष्टो दकारश्चोदीच्यां तकारोक्तिरतो भ्रमः ॥

1 'सङ्घः' घ. 2 'क्षेमो' घ. 3 'क्षा । शब्द्यते प्रशस्यते क्षोमो' घ.

☆ 'ग्रन्थान्तरे नैतदुपलभ्यते । एतत्पूर्वोत्तरसूत्रयोश्च पौर्वापर्यव्यत्ययो दृश्यते' के. ★ 'अत्र, 'प्रथः कित्' सम्प्रसारणं च 'भियः षुग्घ्रस्वश्च' इति सूत्रे अन्यत्रोपलभ्येते ।' के. ⊗ 'गमनमित्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

रोगश्रेष्ठतया पूज्यत्वोपचाराद् यक्ष्मः। नीयते पृथक् क्रियते समुदायान्नेमोऽर्धम्। ईरिव्या शृभ्यश्च भोजः। ईर्ते व्याप्नोति देहमीर्मं व्रणम्। व्ययते संवृणोति प्रमेयं व्यामः प्रमाणभेदः। शृणाति कूलं शर्मो नदः। अवोदैधौद्मेत्युक्तेरुन्देर्नलोपो गुणश्च। ओद्म उन्दनम्✿।

॥ अवतेष्टिलोपश्च ॥ १३४ ॥

प्रत्ययस्यायं टिलोपः⊗। अनुनासिके परे 'ज्वरत्वर-' (६-४२-१०) इत्यूठ्★। गुण*ः। ओम्।

॥ ग्रसतेराच्च ॥ १३५ ॥

मन्। अन्त्यस्य आत्त्वं च। ग्रसन्तेऽत्रान्नादिकं ग्रामः।

॥ अविसिविशुषिभ्यः कित् १३६ ॥

'ज्वरत्वर-' (६-४-२०) इत्यूठ्। ऊमा देवाः। 'च्छ्वोः शूड्-' (६-४-१९) इत्यूठ्। स्यूमा रश्मयः। शोषयति परान् शुष्मो बलम्। सिक्षुभ्यां च भोजः। सिमः सर्वार्थः। क्षुमा अतसी।

॥ इषियुधीन्धिदसिश्याधूसूभ्यो मक् ॥ १३७ ॥

इष्यते रम्यत्वादिष्मो वसन्तः। युध्मो योद्धा, युध्यन्तेऽत्रेति शरच्च। इध्मः। दस्मः क्षयकृत्। हृदयं गच्छति रम्यत्वात् श्यामः। कम्पते धूमः। सूयते गवा सूमः क्षीरम्।

✿ अत्र, जहातेः सन्वदालोपश्च 'इत्यप्युज्ज्वलदत्तादिग्रन्थ उपलभ्यते' के

⊕ 'अन्यथा हि डिदित्येवावक्ष्यत्।' के.

★ 'स च प्रत्येकमुपधावकारस्थानिकः।' के.

* 'कृतसवर्णदीर्घयोरूठोः 'सार्वधातुकार्धधातुकयोः' इति गुण इत्यर्थः। वकारस्योठि 'आद्गुण' इति गुण इति भ्रमवारणायैतावदुक्तम्'। के

CC-0. In Public Domain. Digitization by eGangotri

॥ युजिरुचितिजां कुत्वं च ॥ १३८ ॥

युज्यते मिथो युग्मम् । रोचते रुक्मम् । परांस्तेजयति तनूकरोति तिग्मः ।

॥ हन्तेर्हि च ॥ १३९ ॥

हन्ति पीडयति हिग्मम् ।

॥ भियः षुग्वा ॥ १४० ॥

भीमः, भीष्मः । गुलिबिलिभिलिसिधिरुभ्यश्च **भोजः** । गुल्मः[1] । बिल्मः प्रकाशः । भिल्मं भास्वरम् । सिध्मं त्वग्रोगः । रुमा लवणाकरः । **'अवेर्ह्रस्वश्च'** इति च । ऊठिकृते ह्रस्वः । उमा ॥

॥ घर्मः ॥ १४१ ॥

दीप्यतेऽर्कोऽत्र घर्मः ।

॥ ग्रीष्मः ॥ १४२ ॥

गिरति शैत्यं ग्रीष्मः । **भोजस्त्वाह– 'ग्रीष्मघर्मकूर्मसूर्मसुह्मजिह्मजाल्मादयः'** । कुचति कपालोदरे कूर्मः । सूर्मश्चुल्लिः । सुह्मा जनपदः । जहात्यार्जवं जिह्मः । जलति निशितधीर्भवति जाल्मो निर्विचारः ।

॥ प्रथेः षिवन् सम्प्रसारणं च ॥ १४३ ॥

षित्त्वान्ङीष् । विस्तीर्यते पृथिवी ।

॥ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ॥ १४४ ॥

सद्योऽश्नुते प्राप्य देशमश्वः । वैपरीत्यात् प्रुष्वो वर्षम् । लट्वः पक्षी । चक्षुर्निमीलति, वेदादीन् वदति वा कण्व ऋषिः । जनैरुद्घोष्यते कण्वं पापम् । काङ्क्ष्यते खट्वा । विशति व्याप्नोति सर्वं विश्वम् । **किणिबिलिनलिशलिखलिभ्यश्च भोजः** । किण्वं सुराबीजम् । बिलति भिनत्ति कण्टकैर्बिल्वः । नल्वो भूमानभेदः ।

1 'ल्मम्' घ

CC-0. In Public Domain. Digitization by eGangotri

शल्वाः क्षत्रियाः। खल्वं निम्नम्। 'नञि भुवो डित्' इति च। टिलोपः। अभ्वमद्भुतम्।

॥ इण्शीङ्भ्यां वन्॥ १४५॥

स्वयमेवैतीत्येवः केवलः। एवेति निपातोऽपि। शेवः सुखकृत्। श्याशालाभ्यश्च भोजः। व्याप्नोति द्रव्ये श्यावः कपिशः। तनूकृताङ्गत्वाच्छावः (वः) शिशुः। लावः पक्षी।

॥ सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे॥ १४६॥

सरति व्याप्नोति सर्वः। निघृष्वो निकषपाषाणः। रिष्वो हिंस्रः। लष्वो नर्तकः। पद्वो भूलोकः। प्रह्वः प्रणतः। इष्व आचार्यः। अतन्त्र इत्युक्तेः साधारणात्मके कर्तृमात्रार्थे सर्त्यादिभ्यः सर्वादयो न स्युः। किन्तु, सर्ता सारक इत्याद्येव स्यादिति भावः। एतच्चान्येष्वपि समानम्। लिष्वो लम्पट इति च भोजः।

॥ शेवा यह्वा जिह्वा ग्रीवाप्वामीवाः॥ १४७॥

शेवा मेढ्रम्। यह्वा बुद्धिः। जीवन्त्यनया जिह्वा। गिरन्त्यनया ग्रीवा। [1]आप्वो देवयूथम्। अमीवो[2] जलम्।

॥ कॄगॄशॄदॄभ्यो वः॥ १४८॥

कर्वः कन्दरः। गिरति तत्त्वबुद्धिं गर्वः। शृणाति शर्वः। दर्वो राक्षसः। हसेश्च भोजः। हस्वः। 'उर्देर्धश्च' इति च। ऊर्ध्वः। 'उपधायां च' (८-२-७८) इति दीर्घः। मीयत उच्छ्रितवस्तुनोर्ध्वः।

॥ कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः॥ १४९॥

कनिनः कित्त्वादगुण उवङ्। यौति सङ्गच्छते स्त्रिया युवा। वर्षत्यभीष्टं वृषा इन्द्रः समर्थश्च। तक्षा। राजा। धन्विः सौत्रः धन्वा मरुः। दिवाऽभिगन्ता। प्रतिदिवा द्यूतकरः।

॥ नञि जहातेः[3]॥ १५०॥

1 'आप्वा' घ. 2 'मीवा' घ. 3 'तेः॥ कित्त्वादाल्लोपः। नं' ध.

CC-0. In Public Domain. Digitization by eGangotri

न जहाति प्रकाशमहः।

॥ पञ्चेश्च ॥ १५१ ॥

इदित्त्वान्नलोपो न। व्यक्तीक्रियन्तेऽनया पदार्था इति पञ्च।

॥ सप्यशूभ्यां तुट् च ॥ १५२ ॥

सप्तन्। अष्टन्।

॥ नुदंशोर्गुणश्च ॥ १५३ ॥

नौतेर्गुणः नवन्। नलोपः दशन्✲।

॥ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्य-मन्विश्वप्सन्परिज्वन्मातरिश्वन्मघवन्निति ॥ १५४ ॥

आशु गच्छति श्वा। सिञ्चत्युक्षा। पुष्णाति वृष्ट्या पूषा। प्लीहा रोगः। क्लेदा चन्द्रः। स्नेहा व्याधिः। मुह्यत्यनेनाहतेन मूर्धा। मज्जति देहे मज्जा। अर्यैर्गणकश्रेष्ठैर्मीयतेऽर्यमा। विश्वप्सा कालः। परिज्वा ग[illegible]ः। वेदे गगनस्य मातृत्वप्रसिद्धेस्तत्र श्वयति मातरिश्वा। मघं धनं वनति स्वीकरोति मघवा। इतिकरणाद् भोजोक्तं 'ग्रावन्महन्नथर्वन्नि' ति सिद्धम्। महा महत्त्वम्। अथर्वा ऋषिः।

॥ इति प्रथमः पादः ॥

द्वितीयः पादः

॥ कृहृभ्यामेणुः ॥ १ ॥

करोति युद्धादिकं करेणुर्गजः। हरति चित्तं हरेणुर्गन्धद्रव्यम्।

॥ हनिकुषिनीरमिकाशिभ्यः क्थन् ॥ २ ॥

कित्त्वाद् 'अनुदात्तोपदेश-' (६-४-३७) इति नलोपः। हन्यते हथो विषण्णः। 'तितुत्र-' (७-२-९) इत्यनिट्त्वम्। ष्टुः। कुष्णाति देहं कुष्ठम्[1]। सुनीथो नीतिमान्। रमन्तेऽत्र रथः।

1 'ष्ठः' घ.

✲'एतत्सूत्रत्रयमुज्ज्वलदत्तपाठ नोपलभ्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

'–छशां षः' (८-२-३६)। दीप्यतेऽग्नौ क्षिप्तं काष्ठम्।

॥ अवे भृञः ॥ ३ ॥

अवभ्रियन्ते सम्भारा अत्र अवभृथः।

। उषिकुषिगार्तिकनिभ्यस्थन् ॥ ४ ॥

गुणः। तप्यते श्वासैरोष्ठः। कोष्ठः कुक्षिः। गीयते गाथा। प्राप्यतेऽर्थः। कन्था।

॥ सर्तेर्णिच्च ॥ ५ ॥

सरति सार्थः।

॥ जॄवृञ्भ्यामूथन् ॥ ६ ॥

जरूथो मांसम्[1]। वरूथो रथगुप्तिः सेनासङ्घातश्च।

॥ पातॄतुदिवचिरिचिसिचिभ्यस्थक् ॥ ७ ॥

कित्त्वात् 'घुमास्था–' (६–४–६६) इतीत्त्वम्। पीथः पानम्। ऋत इत्। दीर्घः। तरन्त्यनेन नदीं, पापं वा तीर्थम्। तुत्थमञ्जनभेदः। यजादित्वादुत्वम्। उक्थं साम। क्षायते रिक्थं द्रव्यम्। सिच्यते गव्यैः सिक्थमोदनांशः।

॥ अर्तेर्निरि ॥ ८ ॥

निरृथो निकायो गोसङ्घश्च।

॥ निशीथगोपीथावगाथाः ॥ ९ ॥

(नितरां) शेरतेऽत्र निशीथः। गोपीथो रक्षा। अवगाथः प्रातः सवनम्। अवगथ इत्येके। स च मार्गार्थः।

॥ गश्चोदि ॥ १० ॥

थकः कित्त्वादीत्वम्। उद्गीथं[2] सामभेदः।

॥ समीणः ॥ ११ ॥

समिथः सङ्गमः।

1 'सम्। वृणोत्यनेन वरू' घ. 2 'थः' घ.

CC-0. In Public Domain. Digitization by eGangotri

॥ तिथकुथपृष्ठगूथयूथप्रोथाः* ॥ १२ ॥

तिथो दिवसः। गूथं पुरीषम्। यौति यूथम्। प्रोथो मुखाग्रम्।

॥ स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिशिवतिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्॥ १३ ॥

'नेड्वशि–' (७-२-८) 'लोपो व्योः–' (६-१-६६) स्फारम्। तञ्चिवञ्च्योः कित्त्वान्नलोपः। न्यङ्क्वादिकुः। तक्रम्। वक्रम्। शक्नोति शक्रः। क्षिप्रम्। क्षोत्तुं शक्योऽर्हो वा क्षुद्रः। सृप्रा नदी। तृप्रं तृप्तिः। दृप्रः सर्पः। यत्र नलोपाभावस्तत्रेदित्त्वं ज्ञेयम्। वन्द्रः पूजकः। उन्देरनिदित्त्वान्नलोपः। उद्रो यादोभेदः। समुन्दन् भूमिं समुद्रः। श्वित्रं रोगः। वृत्रः। अजेर्वीभावः। सर्वत्र गच्छति वीरः। देशान्तरं नीयते नीरम्। पद्रं ग्रामः। मद्रः क्षत्रियः। मोदतेऽनया दृष्टया सुहृन्मुद्रा। खिद्रः सूर्यः। छिद्यते छिद्र[1]म्। भिद्रं वज्रम्। (मन्दन्ते) मोदन्तेऽनेन श्रोतारो मन्द्रः। चन्द्रः। दह्रोऽग्निः। दस्यतो हतो रोगात् दस्रौ। दभ्रोऽल्पः। शोरोऽवमेः प्रसारणम्। उस्रा रश्मयः। वाशते वाश्रा धेनुः। शीरोऽजगरः। हस्रो हर्षुलः। सिध्रः साधुः। शुभ्रः। घसेश्च भोजः। घस्रो दिवसः।

॥ निन्देर्नलोपश्च✿ ॥ १४ ॥

निन्द्यते निद्रा।

1 'द्रम्। भिद्यते भिद्रं' घ.
* 'कुथः पाठान्तरे न दृश्यते।' के.
✿ 'अत्र सूत्राणां पौर्वापर्यं पाठान्तरे बहुधोपलभ्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ तमेर्दुक् च ★ ॥ १५ ॥

ताम्यत्यनया तन्द्रा ।

॥ चकिरम्योरुच्चोपधायाः ॥ १६ ॥

प्रतिहन्यतेऽनेन रसान्तरं चुक्रोऽम्लः । रुम्रं रम्यम् । चम्योरिति पाठे चुम्रो नाशः ।

॥ वौ कसेः ॥ १७ ॥

उच्चोपधायाः । विकुस्रश्चन्द्रः ।

॥ अमितम्योर्दीर्घश्च ॥ १८ ॥

गम्यते फलार्थमाम्रः । काम्यते ताम्रम्✿ ।

॥ दुरीणो लोपश्च ॥ १९ ॥

दुष्पूर्वस्येणो रक्, धातोर्लोपश्च । दुर् र । 'रोरि' इति लोपे ढ्रलोपे–' (६-३-१११) इति दीर्घः । दुःखेन गम्यं दूरम् ।

॥ कृतेश्छः क्रू च ॥ २० ॥

कृते रक् स्यात्, अन्त्यस्य छत्वं च, क्रू इति सर्वादेशश्च । कृन्तति पीडयति जनान् कृच्छ्रम् । छिनत्ति क्रूरः ।

॥ रोदेर्णिलुक् च ॥ २१ ॥

णिलुकि गुणाभावः । रोदयत्यरोन् रुद्रः । अरोदीदिति रुद्र इति श्रुत्यानुगुण्यादण्यन्तादेवाह **भोजः** ।

॥ बहुलमन्यत्रापि संज्ञाछन्दसोः ॥ २२ ॥

अन्य[1]त्र प्रत्ययेष्वपि संज्ञाछन्दसोर्बहुलं णिलुक् स्यात् । "वान्ति पर्णशुषो वाताः ।" पर्णानि शोषय[2]तीति क्विप् । वायुभेदस्याख्या सर्वत्रापि धातोरन्तर्भावितण्यर्थत्वे[3]न विधिर्ज्ञेयः । छन्दसि वर्धन्तु त्वेत्यादि ।

1 'न्यप्रत्य' घ. 2 'यन्तीति' घ. 3 'त्वेनेन विधि' घ.

★ 'अन्ये त्वेतन्न पठन्त्येव' के.

✿ 'अत्र 'अर्देर्दीर्घश्च' 'शुचेर्दश्च' इति सूत्रद्वयमधिकमन्ये पठन्ति ।

CC-0. In Public Domain. Digitization by eGangotri

॥ जो री च ॥ २३ ॥

जीरोऽग्निः ।

॥ सुसूधागृधिभ्यः क्रन् ॥ २४ ॥

अभिषूयते सुरा । सुवति प्रेरयति कर्मणि जनान् सूरः । किस्वादीत्त्वम् । दधाति प्रज्ञया सर्वं धीरः । काङ्[1]क्षति मांसं गृध्रः ।

॥ शुसिचिमिञां दीर्घश्च ॥ २५ ॥

शुर्गत्यर्थः । असम्भ्रमं गच्छन् शूरः । वृक्षायोभिर्वध्यते सीरम् । चीयते विस्तीर्यते आर्ज्यते वा चीरम् । मीरः समुद्रः ।

॥ वाविन्धेः ॥ २६ ॥

[2]किस्वान्नलोपः । वीध्रं निर्मलम् ।

॥ वृधिवपिभ्यां रन् ॥ २७ ॥

गुणः । वृधेर्बहुवृत्तित्वाद् वध्रः चर्मरज्जुः । उप्यतेऽस्मिन् बीजं वप्रः केदारः । उप्यन्ते निधीयन्ते शिला अत्रेति सालश्च । रुधीण्भ्यां च भोजः । रलयोरैक्याद् रुणद्ध्यौष्ण्यं लोध्र[3]ः । एरा तृणभेदः ।

॥ ऋज्रेन्द्राग्रवज्रविप्रकुप्र(ब्र)चुप्र(ब्र)क्षुरखुरभद्रोग्रभेरभेल-
शुक्र शुक्लगौरवन्रामालाः ॥ २८ ॥

ऋज्रो नायकः । इन्देरिन्द्रः । अङ्गति पुरोगच्छत्यग्रमञ्चलम् । वजत्यप्रतिहतं गच्छति वज्रम् । उप्यतेऽस्मिन् पुण्यं विप्रः । कुप्र (ब्रं) वनम् । चुप्रं(ब्रं)वक्त्रम् । क्षौति वपने क्ऋदिति स्वनति, छिनत्ति वा क्षुर[4]म् । छिनत्ति भुवं खुरः । भन्देर्भद्रम् । उच्यति समवैत्यत्र तमोगुण इत्युग्रः । भेरो भारुः । बिभेत्यस्मिन् भेलो

1 'क्षते मांसं' घ. 2 'क्रनः किस्वा' घ. 3 'ध्रो वृक्षः । ए' घ.
4 'क्षुरः' घ.

CC-0. In Public Domain. Digitization by eGangotri

जलतरणम्। बिभेत्यस्या भेरी दुन्दुभिः। भेरभेलावपि दुन्दुभ्यर्थावित्यन्ये। शोचति देवगुणैः शुक्रः। शोचनीयत्ववैपरीत्यात् शुक्लः। गुरी उद्यच्छत्युन्नमति वर्णान्तरात् गौरः। वन सम्भक्तौ। वन्रो विभागी। एति इरा जलम्। मा माने माला। अन्धरन्ध्रसिळिन्ध्रौड्रपुण्ड्रतीव्र[1](र)नीप्रशीव्रसान्द्रगुन्द्रादयो **भोजोक्ताः**। ओड्रः तरुः। नीप्रं गृहच्छदिरुपान्तः। गुन्द्रा जलतृणम्। आद्युक्तेः श्वभ्रम्।

॥ समि कस उकन्॥ २९॥

कसति गच्छति सङ्कसुकोऽस्थिरः। बाहुलकात् सङ्कुसुक इत्यन्ये। **भोजस्त्वाह– 'कमितिम्योर्दुक् च'**। कमनीयत्वात् कन्दुकः। तिन्दुकस्तरुः। **'अशिकचोर्नुम् च'**। अश्नुतेऽङ्गमंशुकम्। बध्यतेऽङ्गे कञ्चुकः। **'कुहेः कित्'**। कुहुकमाश्चर्यम्। **'क्रमेः क्रुम च वा'**। क्रमुकं क्रुमुकं बन्धनम्⊕ **'चुळुकोल्मुकचिबुकचूचुकजम्बुकगवेधुकामधुकभालुकादयः'**। गवेधुका तृणजाति[2]ः। भालुको भगिनीपतिः। आद्युक्तेर्मड्डुकवालुकादि इति।

॥ पचिनश्योर्णुकन् कनुमौ च॥ ३०॥

आभ्यां णुकन् पचेरन्त्यस्य को नशेर्नुम् च। वृद्धिः। पाकुकः सूपकारः। नंशुकश्चन्द्रः।

॥ भियः क्रुकन्॥ ३१॥

भीरुकः।

॥ क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि॥ ३२॥

अनुपपदस्य सोपपदस्यापि धातोः शिल्पिनि नाम्नि च क्वुन् स्यात्। वोः अकः। शिल्पिनि - लिखकः कायस्थः। तक्षकः। नाम्नि[3] ध्वनति मशकः। भक्ष्यतेऽनेन चषकः। सोपपदादप्यूह्यम्✿।

1 'तीर' घ. 2 'तिः। मधुको यष्टिमधुः। भा' घ 3 'म्नि तु ध्व' घ.
⊗ 'അടയ്ക്ക?' के. ✿'अत्र रमेरश्च लो वा' इति सूत्रमुज्ज्वलदत्तादयः पठन्ति।

CC-0. In Public Domain. Digitization by eGangotri

॥ जहातेर्द्वे च ॥ ३३ ॥

क्त्वादाल्लोपः। जहकस्त्यागो।

॥ ध्मो धम च ॥ ३४ ॥

धमकः कर्मारः॥

॥ हनो वध च ॥ ३५ ॥

वधको व्याधः।

॥ बहुलमन्यत्रापि ॥ ३६ ॥

रुचितिलिपुलिपिटिक्षिपिध्रुधूभ्य आह **भोजः**। दीप्यते रुचकोऽङ्गुलीयकम्। स्निह्यते आर्द्रीकृत्य योज्यते तिलकः। महत्तयोन्नमति पुल(ळ)कः। संहन्यते पिटकः। क्षिपक आयुधम्। उवङ्। टापि क्षिपकादित्वादित्त्वाभावः। ध्रुवका पात्रभेदः। धुवका सैव।

॥ कृषेर्वृद्धिश्चोदीचाम् ॥ ३७ ॥

कार्षकः कृषकश्च कृषिजीवी।

॥ उदकम् ॥ ३८ ॥

उनक्त्युदकम्। कीचकैरकैळ(ड)काश्मकादयो **भोजोक्ताः**। एरका तृणम्। एळ(ड)को मेषः। अश्मका जनपदः।

॥ वृश्चिकृषिकुशिभ्यः किकन्⊕ ॥ ३९ ॥

छिनत्ति पुच्छेन वृश्चिकः। कृषिकः कृषीवलः। हितं भाषते कुशिकः।

॥ प्राङि पणिकषः ॥ ४० ॥

प्रापणिक आगन्तुर्वणिक् च। प्राकषिको नर्तकः।

॥ मुषेर्दीर्घश्च ॥ ४१ ॥

मुष्णात्यपनयति धान्यादि मूषिकः।

॥ स्यमेः सम्प्रसारणं च ॥ ४२ ॥

'हलः' (६–४–२) इति दीर्घः। सोमिका उपजिह्वा, वल्मीकशिखा च।

⊕ 'कुशिमन्ये न पठन्ति।' के॰

CC-0. In Public Domain. Digitization by eGangotri

॥ क्रिय इकन् ४३ ॥

क्रयिकः ।

॥ आङि पणिपनिपतिखनिभ्यः ॥ ४४ ॥

आपणिको वणिक् । स्तूयत इत्यापनिकः इन्द्रनीलः । आपतिको मयूरः । आखनिक आखुः ।

ये तद्धितादिभिः सिद्धाः क्रयिकापणिकादयः ।
ते व्युत्पत्तेर्बाहुविध्यं वक्तुमुक्ता महर्षिणा ॥

अलि कलि दलि पुलि स्फटिपाभ्यश्च भोजः । अल्यते भूष्यतेऽलि(ळि)कम् । बद्धदलत्वात् कलिका । दलितं दारु । पुलिको मणिः । स्फट भेदने । आशु भिद्यते स्फटिकः । कित्त्वादाल्लोपः । पिबति मधूनि पिकः । **"पिपीलिकेतिकहृदिकमक्षिकादय"** इति च । पीडयति पिपीलिका । इतिको मुनिः । हृदिको यादवः । सङ्घातीभवति मक्षिका । आद्युक्तेः क्षुरिच्छुर्योश्छेदनार्थयोः क्षुरिका, छुरिका ।

॥ श्यास्त्याहृञविभ्य इनच् ॥ ४५ ॥

आद् गुण. । गच्छति श्येनः । संहन्यते घनमत्र स्त्येनः । स्तेन चौर्य इत्यस्य पचाद्यचि स्तेन इति यकारं विनापि । ह्रियते गीतेन हरिणः । अविनोऽध्वर्युः ।

॥ वृजेः किच्च ॥ ४६ ॥

वर्ज्यते वृजिनं पापम् ।

॥ अजेरज च ॥ ४७ ॥

वीत्वाभावार्थमजादेशोक्तिः । गतं देहादजिनम् ।

॥ बहुलमन्यत्रापि ॥ ४८ ॥

पीडयति कठिनम् । न दह्यते शत्रुभिः कुण्डिनम् ।

॥ द्रुदक्षिभ्यामिनन् ॥ ४९ ॥

द्रवति नश्यति द्रविणम् । दक्षते वर्धते फलमनया दक्षिणा ।

CC-0. In Public Domain. Digitization by eGangotri

॥ द्रुहेः कित् ॥ ५० ॥

न द्रुह्यति द्रुहिणः ।

॥ अर्तेरिच्च✿ ॥ ५१ ॥

रपर इदादेशः । न गम्यते इरिणमूषरम् ।

॥ वेपितुह्योर्ह्रस्वश्च ॥ ५२ ॥

वेपेर्ह्रस्वोक्तिः । वेपतेऽत्र भयाद् विपिनम् । अर्दयति तुहिनम्★।

॥ महेरिनण् च ॥ ५३ ॥

अस्मादिनण्, इनन् अपि स्यात् । माहिनं शरशयनम् । महिनो माहात्म्यवान् ।

॥ क्विब्वचिप्रच्छिश्रिद्रुस्रुकटप्रुज्वां दीर्घोऽसम्प्रसारणं च ॥ ५४ ॥

एभ्यः क्विब् दीर्घश्च, वचिप्रच्छ्योः प्राप्तं सम्प्रसारणं च न स्यात् । वाच् । पदत्वे कुत्वम् । उच्यते वाक् । शब्दप्राच्छ् । पदत्वे छशां षः । जश्त्वचर्त्वे । शब्दप्राट् । सेव्यते श्रीः । द्रूर्धारा, स्वर्णं च । स्रूर्नदीभेदः । कटप्रूः कामः । जूः पिशाच#ः ।

॥ परौ व्रजेः षश्च पदान्ते ॥ ५५ ॥

परिव्रजेः क्विप् दीर्घश्च स्यात्, पदान्ते षत्वं च । षस्य जश्त्वचर्त्वे । परिव्राट् । अपदान्ते तु षो न । परिव्राजौ ।

॥ हुवः श्लुवच्च ॥ ५३ ॥

श्लुवत् क्विप् दीर्घश्च स्यात् । श्लुवत्त्वाद् द्वित्वम् । जुहूः ।

॥ द्युतिदृणात्योर्ह्रस्वश्च* ॥ ५७ ॥

✿ 'अन्ये तु द्रुहेः किदित्यपठित्वा 'अर्तेः किदिच्चे' ति पठन्ति ।' के.

★ 'अत्र सूत्रत्रयमन्येऽधिकं पठन्ति ।' के.

'अत्र 'आप्नोतेर्ह्रस्वश्च' इत्यप्यन्ये ।' के.

* 'नैतदन्यत्रोपलभ्यते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

श्लुवत् क्विप् द्‌ऋधातोर्ह्रस्वश्च। द्यु द्युत्। 'द्युतिस्वाप्योः' (७-४-६७) इत्यभ्यासस्य प्रसारणम्। दिद्युत् सूर्यः। उरत्वम्⊗। ददृत् हिंस्रः।

॥ स्रुवः कः[1] ॥ ५८ ॥

कित्त्वादगुण उवङ्। स्रुवः।

॥ चिक् च ॥ ५९ ॥

स्रुधातोः चिक्प्रत्ययः स्यात्। इकावितौ। स्रुक्।

॥ तनोतेरनश्च वः ॥ ६० ॥

अन् इत्यस्य वः स्यात् चिक् च। विस्तीर्यते त्वक्।

॥ ग्लानुदिभ्यां डौः ॥ ६१ ॥

ग्लायति कृष्णपक्षे ग्लौः। नुद्यते नौः। एजन्तत्वात् 'कृन्मेजन्तः' (१-१-३९) इत्यव्ययत्वे प्राप्ते।

॥ च्विरव्ययम् ॥ ६२ ॥

ग्लावादयश्च्व्यन्ता एवाव्ययसंज्ञाः, नान्यदा। तेन सुब्लुङ्‌न। च्व्यन्तत्वे तु नौकरोति तरूनित्यव्ययत्वं स्यात्।

॥ रातेर्डैः ॥ ६३ ॥

दीयते राः॥

॥ गमेर्डोः ॥ ६४ ॥

गच्छति गौः। 'द्युगमिभ्यां डोः' इति भोजः। अभिगम्यते द्यौः।

॥ भ्रमेर्डूः ॥ ६५ ॥

भ्रमति चलति भ्रूः।

॥ दमेर्डोस्* ॥ ६६ ॥

1 'कन्' घ.

⊕ 'ह्रस्वस्य पिति कृतीति तुक्' के.

*'डोसिरित्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

सित्वं खलु पदत्वार्थं तस्य धातुष्वसम्भवात् ।
वैफल्यात् सस्य नेत्संज्ञा दाम्यत्यरिरनेन दोः ॥

॥ पणेरिज्यादेश्च वः ॥ ६७ ॥

इजिप्रत्ययः आदेर्वत्वं च । वणिक् ।

॥ वशः कित् ॥ ६८ ॥

कित्वात् प्रसारणम् । उशिगग्निः कमनीयश्च ।

॥ भृञ उच्च ॥ ६९ ॥

भुरिक् छन्दोभेदः ।

॥ जसिसहोरुरिन् ॥ ७० ॥

जसुरिरग्निः । सहुरिरनड्वान् । अङ्गेश्च भोजः । अङ्गुरिरङ्गुलिरेव ।

॥ सुयुरुवृञो युच् ॥ ७१ ॥

सवनः कालभेदः । जातिभेदाभावान्मिश्रोभवति यवन[1]: । रवणो भ्रमरः । वरणो वृक्षभेदः ।

॥ अशो रश च ॥ ७२ ॥

अशेर्युच्, रशादेशश्च । अश्नुते जघनं रशना ।

॥ उन्देर्नलोपश्च ॥ ७३ ॥

लघूपधगुणः । उद्यते घृताद्यैरोदनः✿ ।

॥ बहुलमन्यत्रापि ॥ ७४ ॥

चन्दनम्[2] । श्रुयज्यसिरसिरुचिरुहिभ्य आह भोजः । श्रवणा नक्षत्रम् । यजनमूर्णापटः । असनो वृक्षः । रसना रोचना गोशीर्षम् । रोहणो विदूराद्रिः ।

॥ रञ्जेः क्युन्[3] ॥ ७५ ॥

1 'नो म्लेच्छः । र' घ. 2 'नः' । घ. 3 'क्युः' घ

✿ 'गमेर्गश्च' इत्यप्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

कित्वान्नलोपः। रजनो रङ्गः। महारजनं कुसुम्भम्। गौरादित्वाद् रजनी।

॥ भूसूधूभ्रस्जिभ्यश्छन्दसि॥ ७६ ॥

बाहुलकाल्लोकेऽपि। भुवनम्। सुवनं चन्द्रतेजः। धुवनं धूपः। निधुवनं रतिः। भ्रस्जेः 'ग्रहिज्यादिना प्रसारणम्। सस्य जश्त्वचुत्वे। भृज्जनं भ्राष्ट्रः।

॥ कॄपॄवृजिमदिनिधाञ्भ्यः क्युः॥ ७७ ॥

ॠत इत्। कीर्यते दिक्षु किरणः। 'उदोष्ठ्यपूर्वस्य' (७-१-१०२) पुरणः समुद्रः। वृजनो विवेक्ता। व्रजीति क्वचित् पाठः। व्रजनमन्तरिक्षम्। बाहुलकान्नलोपः। मदनः। निधाञो नाशार्थत्वान्निधनम्। केवलादपि। धार्यते पोष्यते वा धनम्।

॥ धृषेर्धिष च संज्ञायाम्॥ ७८ ॥

प्रगल्भतेऽनया धिषणा बुद्धिः।

॥ हन्तेर्घुर च॥ ७९ ॥

घुरणः शम्भुः।

॥ गमेर्गग च॥ ८०॥

गच्छन्त्यत्र खगाद्या गगनम्★।

॥ वर्तमाने पृषद्बृहन्महज्जगश्चतृवच्च॥ ८१ ॥

अत्यन्ता एते वर्तमानेऽर्थे स्युः, शतृवच्च नुम्ङीबादि स्यात्। सिञ्चति पृषत् जलबिन्दुः। बृहत्। महान्। गच्छति जगत्। ङीपि पृषती [1]जगतीत्यादि। 'जगत्सरसां शतृवच्चेति क्वचित् पाठः। तेन वक्ष्यमाण[2]स्यापि सरश्शब्दस्य शतृवत्त्वान्ङीप्। सरसी।

॥ संश्चत्तृपद्वेहत्॥ ८२ ॥

1 'बृहतीत्यादि'। घ. 2 'णामुनन्तस्यापि' घ.

★ 'अन्ये तु नैतत् पठन्ति' गमेर्गश्च (७४) इत्यनेन गतार्थत्वात्' के.

CC-0. In Public Domain. Digitization by eGangotri

संश्चत् कुहकः। तृप्यन्त्यनेन तृपत् चन्द्रः। विजहाति गर्भं वेहत् गर्भघातिनी। अत्र वियदादयश्च दण्डनाथोक्ताः।

॥ छन्दस्यसानच् शुजृभ्याम् ॥ ८३ ॥

शवसानो ज्वलनः। जरसानः पुरुषः।

॥ ऋजिवृधिमदिसहिभ्यः कित् ॥ ८४ ॥

ऋजसानो मेघः⊕। वृधसानः पुरुषः। ऋजेव्रजीति क्वचित्पाठः। व्रजसानोऽपि पुरुषः। इदित्त्वान्नुम्। मन्दसानो जीवः। सहसानो मयूरः।

॥ अर्तेर्गुणः शुट् च ॥ ८५ ॥

अर्शसानो विप्रः।

॥ सम्यानच् स्तुवः ॥ ८६ ॥

संस्तवान उद्गाता।

॥ ✡युजिबुधिदृशिभ्यः किच्च ॥ ८७ ॥

युजानो विप्रः। बुधानः पण्डितः। दृशानो ज्योतिः। एतच्छन्दाः छान्दसाः।

॥ पर्षेर्णिच्च ॥ ८८ ॥

णिदानच् स्यात्। पाषाणः।

॥ मुचियुधिभ्यां सन्वच्च ॥ ८९ ॥

आभ्यामानच् सन्वत् स्यात्। तेन द्विर्वचनम्। 'रलोव्युपधात्' (१-२-२६) इति सन्वद्वा कित्त्वे प्राप्ते बाहुलकान्नित्यम्। मुमुचानो मेघः। युयुधानः साहसिकः सात्यकिश्च। 'मुषियुधिभ्या'मिति पाठे मुमुषाणो हरणेच्छुः। 'मुचिबुधिभ्या' मिति माधवपाठः। तत्र बुबुधानो ज्ञानेच्छुः। 'हलन्ताच्चे'ति (१-२-१०) सन्वत्कित्त्वम्।

⊕ ऋ'ञ्जीति पठित्वा ऋञ्जसान इत्यन्ये। ✡'युधिबुधीत्यन्ये' के

CC-0. In Public Domain. Digitization by eGangotri

॥ हुर्छेः सनो लुक् छलोपश्च ॥ ९० ॥

जुहूर्छिषेत्यस्मात् सनो लुकि छलोपे हल्परत्वाभावाददीर्घः। जुहुराणः कुटिलाचारः। 'शिवतेर्दश्च' इति च टीकासर्वस्वे दृष्टम्। शिश्विदानः शुद्धकर्मा। पापकर्मेत्यन्ये।

॥ तृन्तृचौशंसिशसिशासिदसिक्षदादिभ्यः संज्ञायां चानिटौ ॥ ९१ ॥

एभ्यः संज्ञायां कर्तरि च तृन्तृचावनिटौ स्तः। शंस्ता होता। शस्ता हिंसकः। शास्ता। दस्ता क्षयकृत्। क्षत्ता सारथिः*।

॥ बहुलमन्यत्रापि ॥ ९२ ॥

उद्गाता उन्नेता तृजन्तौ, प्रतिहर्ता, प्रतिप्रस्थाता, प्रशास्ता, प्रस्तोता तृन्नन्ता ऋत्विगाख्याः।

॥ नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृजामातृपितृमातृभ्रातृदुहितृ ॥ ९३ ॥

अत्र क्षता रुद्र इति भेद⊕ः। पाति पि[...]। मानयति माता। दोग्धि सर्वमर्थं पितुः सकाशाद् दुहिता। 'आपो ह्रस्वश्च' इति भोजोक्तेस्तृच्। अप्ता यज्ञः।

॥ सुन्यसेरृन् ॥ ९४ ॥

सुतरामस्यते त्यज्यते परस्मै दीयत इति स्वसा✡।

॥ यतेर्वृद्धिश्च ॥ ९५ ॥

याता भ्रातृजाया।

॥ नञि च नन्देः ॥ ९६ ॥

ऋन् वृद्धिश्च। ननान्दा पत्युर्भगिनी। बाहुलकान्नञो नलोपाभावः।

*'अन्ये तु शंसिक्षदादिभ्य इति पठित्वा शंस्यादिभ्यस्तृन्, क्षदादिभ्यस्तृच्, इत्याहुः।' के.

⊕ 'सावसेरृन्निति सिद्धान्तकौमुदी'। के.

✡ 'उज्ज्वलदत्तादयस्तु क्षत्तृशब्दमत्र न पठन्ति।' के

CC-0. In Public Domain. Digitization by eGangotri

॥ दिवेर्ऋः ॥ ९७ ॥

देवृशब्दो देवरार्थः ।

॥ नयतेर्डिच्च ॥ ९८ ॥

नृशब्दः ।

॥ सव्ये स्थश्छन्दसि ॥ ९९ ॥

डिदृः स्यात्। लोकेऽपि **भोजः**। बहुलकादलुक्। 'स्थास्थिन्-स्थूऋणामिति वाच्यम्' इति स्थृशब्दस्य षत्वम्। सव्येष्ठा सारथिः।

॥ अर्तिसृधृधम्यश्यवितृभ्योऽनिः ॥ १०० ॥

प्राप्यतेऽग्निरत्र अरणिः। गम्यतेऽनया सरणिः। ध्रियते स्थिरमवतिष्ठते धरणिः। धमिः सौत्रः। धमनिः सिरा। व्याप्नोति शत्रुम् अशनिः, व्याप्नोत्याकाशं वा। रक्ष्यते नृपैरवनिः। तरति द्यां तरणिः सूर्यः। कृरजिकटयटिभ्यश्च **भोजः**। करणिरनुकृतिः। रञ्जेर्निपातनान्नलोपः। रज्यन्त्यत्र जना रजनिर्निशा। कटनिः शैलमेखला। प्राप्यते ज्यया अटनिः चापाग्रम्।

॥ आङि शुचेः सनश्छन्दसि* ॥ १०१ ॥

बाहुलकाल्लोकेऽपि। शुचेर्दीप्त्यर्थत्वात् समन्ताज्ज्वलितुमिच्छन् आशुशुक्षणिः। बाहुलका[1]च्छुचेः सन्यनिट्त्वम्।

॥ कृषेरादेश्च चः¤ ॥ १०२ ॥

कृष्यते कर्मभिश्चर्षणिर्नरः।

॥ अदेर्मुट् च ॥ १०३ ॥

अद्मनिरग्निः।

1 'कात् सन्य' घ.

* 'आङि शुषेरित्यन्ये। रूपं तुल्यम्'। के.

¤ 'आदेश्च घ इत्युज्ज्वलदत्तः।' के

CC-0. In Public Domain. Digitization by eGangotri

॥ वृतेश्च ॥ १०४ ॥

वर्तन्तेऽस्यां जना वर्तनिः। 'मुट् च' इत्यनुवृत्त्या वर्त्मनिरित्यपि माधवः। सापि मार्ग एव।

॥ क्षिपेः किच्च ॥ १०५ ॥

क्षिपणिरायुधम्।

॥ अर्चिशुचिहुसृपिच्छदिच्छर्दिभ्य इसिः ॥ १०६ ॥

अन्त्य इकार इत्। पूज्यतेऽर्चिः। दीप्यते शोचिः। हविः। सर्पति स्यन्दते सर्पिः। छर्दिर्वमनम्। णिलोपः, 'इस्मन्त्र'ेति (६-४-९७) ह्रस्वः। छदिर्गृहोर्ध्वावरणम्। रुचेश्च भोजः। रोचिः।

॥ बृंहेर्नलोपश्च ॥ १०७ ॥

लघूपधत्वे गुणः। बृंहयति धर्मकृत्यानि बर्हिर्दर्भोऽग्निश्च। वर्धते वा।

॥ द्युतेरिसिन्नादेश्च जः ॥ १०८ ॥

ज्योतिः।

॥ वसौ रुचेः संज्ञायाम् ॥ १०९ ॥

वसुरोचिरग्निः।

॥ भुवः कित् ॥ ११० ॥

भुविः शरत्।

॥ सहेर्धश्च ॥ १११ ॥

सधिः सत्त्वम्।

॥ पिबतेस्थुक् च ॥ ११२ ॥

पाथिः सूर्यः।

॥ जनेरुसिः ॥ ११३ ॥

जनुर्जन्म।

॥ मनेर्धश्छन्दसि ॥ ११४ ॥

CC-0. In Public Domain. Digitization by eGangotri

अन्त्यस्य धः। मधुः सान्तः क्षौद्रार्थः।

॥ अर्तिपॄवपियजितनिधनितपिभ्यो नित् ॥ ११५ ॥

व्याप्नोत्यरुर्व्रणः। पूर्यते सिराभिः परुः पर्व। उप्यन्ते सर्वदुःखान्यत्र वपुः। इज्यतेऽनेन यजुः। तनुः शरीरम्। धनुः। तपुः सीसम्⊗। अन्त्यास्त्रय उदन्ता अप्युक्ताः।

॥ प्रेऽदः ॥ ११६ ॥

प्रपूर्वाददेरुसिर्नित् स्यात्। प्रादुः प्रकाशेऽव्ययम्✶।

॥ एतेर्णिच्च ॥ ११७ ॥

[1]एत्यायुः।

॥ चक्षेः शिच्च ॥ ११८ ॥

शित्त्वाच्चक्षिङः ख्याञभावः☼। पश्यन्त्यनेन चक्षुः।

॥ बहुलमन्यत्रापि ॥ ११९ ॥

चक्षेः शित्त्वमन्यत्रापि स्यात्। तेनास्यानुदात्तेत्त्वाद् युचि ख्याञभावः। विचक्षणः।

॥ मुहेः कित् ॥ १२० ॥

उसिः कित् स्यात्। मुहुः।

॥ कॄगॄशॄवॄ चतिभ्यः ष्वरच् ॥ १२१

कर्वरो व्याघ्रः। गर्वरो दर्पः। शर्वरः सायाह्नः। षित्त्वान्ङीष्। शर्वरी रात्रिः। वर्व(बर्ब)रः कुटिलकेशः। चतेर्गत्यर्थवृत्तेर्गम्यतेऽत्र चत्वरः।

॥ नौ सदेः ॥ १२२ ॥

1 'एतीत्यायुः' घ.

⊗ 'अन्ये 'तपिभ्य' इति पठित्वा तपुः सूर्याग्निशत्रुष्वित्याहुः।' के.

✶ 'अन्ये तु प्रादुशब्दं बाहुलकात् साधयन्ति।' के.

☼ 'ख्याञोऽसार्वधातुकविषयत्वात्।' के.

CC-0. In Public Domain. Digitization by eGangotri

निषीदन्ति लगन्त्यत्र पदार्था इति निषद्वरः पङ्कः। 'सदिरप्रतेः' (८-३-६६) इति षत्वम्।

॥ इति द्वितीयः पादः ॥

तृतीयः पादः।

॥ छित्वरच्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वर-कट्वरसंयद्वराः ॥ १ ॥

छित्वरः कार्यातिक्रमी। छत्वरो निकुञ्जम्। चत्वरमिति माधवपाठः। दधाति गृह्णाति मत्स्यान् धीवरः। प्यायते पीवरः। मीवरो हिंस्रः। चीयत आर्ज्यते विस्तीर्यते वा चीवरः। तीवरो म्लेच्छः। नीवरो गम्भीरः। गाह्यते गह्वरः। ⁵सिञ्चति कट्वरो द्रवः। संयद्वरोऽनूपदेशः। उपह्वरो दुम्ब(म्व) रकूब(व) रतूवरादयश्च भोजोक्ताः। उपह्वरं समीपम्*। कूब्र(व)रो रथाङ्गम्। तूवरो निश्श्मश्रुः। आद्युक्तेर्डम्ब(म्व)रादि।

॥ इण्सिञ्दीङुष्यविभ्यो नक् ॥ २ ॥

व्याप्नोति विश्वमिनः। सिनं शरीरम्। दीनः। उष्णम्। 'ज्वरत्वर–' (६-४-२०) इत्यूठ्। ऊनः। जेश्च भोजः। अभिभवति वैदिकार्थान् जिनो बुद्धः⊗।

॥ फेनमीनौ ॥ ३ ॥

फणत्यूर्ध्वं गच्छति फेनः। मीयते हिंस्यते मीनः।

॥ कृषेर्वर्णे ॥ ४ ॥

कर्षति दृष्टिं कृष्णः।

॥ बधेर्ब्रधिबुधी च ॥ ५ ॥

* 'रहश्च।' के.

⊗ 'इण्षिञ्जिदीङित्युज्ज्वलदत्तादिपाठः।' के.

CC-0. In Public Domain. Digitization by eGangotri

वधेर्नगेतावादेशौ च स्तः। उदयेन लोकान् कर्मणि वध्नाति व्रध्नः सूर्यः। पृथ्वीबद्धत्वात् बुध्नो मूलम्।

॥ धाप्ऋवस्यज्यतिभ्यो नः॥ ६॥

धीयन्ते भक्षणार्थमुद्ध्रियन्ते धानाः। पूरयति तरुं पर्णम्। वसन्त्यनेन वणिजो वस्नं मूल्यम्। अजेर्वी। क्षिपति धर्मं वेनः। अत्नो वायुः। सिवेश्च **भोजः**। वस्य ऊठ्। गुणः। यण्। स्योनं मुखम्।

॥ पणेरिच्चोपधायाः॥ ७॥

इत्त्वसामर्थ्यान्न गुणः। पिण्णस्तिलकल्कः✪।

॥ लक्षेरट् च॥ ८॥

लक्षेर्नः, तस्याट् च। लक्षणा दुर्योधनसुता।

॥ सिवेष्टेर्यू च॥ ९॥

इव्शब्दस्य यणभावः। स्यूना रशना।

॥ कॄवॄजॄसिद्रुपन्यनिस्वपिभ्यो नित्॥ १०॥

एभ्यो नो नित् स्यात्। कीर्यते शब्दोऽत्र कर्णः। किरति शरान्, धनं वा कर्णः। आवृणोति द्रव्यमिति पूर्वं रक्तादिर्वर्णः, इह तु वृणुते स्वधर्ममिति ब्राह्मणादिरिति भेदः। जर्णस्तरुः। सिनोति बध्नाति रिपुं सेना। वेगेन द्रवति द्रोणः। द्रूयते प्राप्यते व्रीह्यादिभिरिति मानपात्रं च। पन्नं मानम्। प्राणन्त्यनेनान्नम्। स्वप्नः। व्रश्च **भोजः**। प्लवते वल्गति तर्णो वत्सः।

॥ धेट ई च॥ ११॥

गुणः। धेना वाक्।

॥ तृषिशुषिरसिभ्यः कित्॥ १२॥

✪ उज्ज्वलदत्तादिभिरेतत्सूत्रं न पठितम्। एतदुत्तरसूत्रात्परतो 'वनेरिच्चोपधाया' इति त्वन्यत्पठ्यते। के.

CC-0. In Public Domain. Digitization by eGangotri

निच्च स्यात्। तृष्णा। शुष्णो दैत्यः। रस्नोऽश्वः।

॥ सुञो दीर्घश्च ॥ १३ ॥

सूना वधस्थानम्।

॥ रमेस्त च ॥ १४ ॥

रमतेऽनेन रत्नम्।

॥ रास्नासास्नास्थूणावीणाः ॥ १५ ॥

रास्ना रज्जुः। तिष्ठति स्थूणा। क्षिप्यते नखैर्वीणा। सुम्न-द्युम्ननिम्नशिश्नाभीक्ष्णच्यौत्न्यादयश्च **भोजोक्ताः**। सुम्नं सुखम्। द्युम्नं द्रविणम्। च्यौत्नी कांस्यादिपात्री।

॥ गादाभ्यामिष्णुच् ॥ १६ ॥

आभ्यामिष्णुच्। 'आद् गुणः'। गेष्णू रङ्गोपजीवी। देष्णु-र्दाता।

॥ कृत्यशूभ्यां क्स्नुः ॥ १७ ॥

कित्वादगुणः। वेष्टयति व्याप्नोति कृत्स्नम्। 'छशां षः'। 'षढोः कः–'। षत्वम्। अक्ष्णमखण्डम्।

॥ तिजेर्दीर्घश्च ॥ १८ ॥

झलि चोः कुः। चर्त्वषत्वे। तिज निशातने। तीक्ष्णम्।

॥ श्लिषेरच्चोपधायाः ॥ १९ ॥

षस्य कः। श्लिष्यति स्पर्शे श्लक्ष्णं स्निग्धम्।

॥ यजिमनिशुन्धिदसिजनिभ्यो युः ॥ २० ॥

बाहुलकादनादेशाभावः। यज्युः ऋत्विक्। ज्ञायते परैर्मन्युः। शुन्ध्युः पवित्रम्। ण्यर्थान्तर्भावाद् उपक्षिणोत्यर्थं दस्युः। जन्युः प्राणी।

भुजिमृङ्भ्यां युक्त्युकौ ॥ २१ ॥

क्रमात् स्तः। भुज्युः ऋषिः। मृत्युः।

॥ सर्तेरयूः ॥ २२ ॥

सरयूर्नदी। **वृत्तौ** 'सर्तेरयुः' इत्युदन्तमुक्त्वा सरयुरित्युदाहृत्य

CC-0. In Public Domain. Digitization by eGangotri

'अप्राणिजातेः–' (वा.) इत्यूङि सरयूरित्युक्तम्।

॥ पानीविषिभ्यः पः ॥ २३ ॥

पिबति सुखं पापम्। नेपः पुरोहितः। वेष्पं जलम्। अलिशीङ्भ्यां च **भोजः**। अल्पः। शेते शेपः।

॥ च्युवः किद् दीर्घश्च ॥ २४ ॥

च्यूपः सङ्ग्रामः★।

॥ स्त्यः सम्प्रसारणमूश्च ॥ २५ ॥

यस्य प्रसारण इत्वे पूर्वरूपत्वे च कृत ऊत्वम्। स्तूपः सङ्घातः। उश्चेति पठित्वा स्तुप इत्याह **माधव***:।

॥ सुशृभ्यां निच्च ॥ २६ ॥

नित् पः स्यादूश्चान्तादेशः। सूयते गवा सूपः। ऊतो रपरत्वम्। तुषादयो विशीर्यन्तेऽनेन शूर्पः। किरतेश्च **भोजः**। [1]कूर्पो भ्रूमध्यम्।

॥कुयुभ्यां च ॥ २७ ॥

नित् प ऊश्च स्यात्। कौति जलेन कूपः। यौति पशुरत्र यूपः।

॥ खष्प शिष्प शष्प बाष्पपर्परूपतल्पाः ॥ २८ ॥

खष्पो बलात्कारः। शिष्पः कालयोगः⊕। शस्यते हिंस्यते पशुभिः शष्पं तृणम्। वातेः षुक्। निर्गच्छति वा (बा)ष्पम्। पृणाति पालयति जलात् पर्पः प्लवः। रौति रूपो हरिणः। [2]तलति प्रतितिष्ठत्यत्र तल्पः। शिल्पक्षुपनीपचम्पाशम्पादयश्च **भोजो**क्ताः। शील्यतेऽभ्यस्यते शिल्पम्। क्षुपो ह्रस्वशाखस्तरुः। नीपो

1 'कूर्पं भ्रू' घ. 2 ''तलन्ति प्रतितिष्ठन्त्यत्र' घ.

★ 'च्युवः किच्चेत्येवान्ये।' के.

* 'स्तुवो दीर्घश्चेत्यन्ये।' के

⊕ 'शिल्पेत्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

वृक्षभेदः। चम्पा पुरी। शाम्यति तमोऽनया शम्पा विद्युत्। चम्पापि विद्युदिति केचित्। आद्युक्तेः पम्पा [1]सरित्।

॥ स्तनिहृषिपुषिशुषिगदिमदिभ्यो णेरित्नुच्✿ ॥ २९ ॥

'अयामन्त–' (६-४-५५) इति णेरयादेशः। स्तनयित्नुर्मेघः हर्षयित्नुः सुजनः। पोषयित्नुर्भर्ता। शोषयित्नुः सूर्यः। गदयित्नुर्वाग्मी। मदयित्नुः शीथुः। घुषिगडिमण्डिजनिनन्दिभ्यश्च **भोजः**। घोषयित्नुः पिकः। गड(ळ)यित्नुः मेघः। मण्डयित्नुः कामुकः। जनयित्नुः पिता। नन्दयित्नुः पुत्रः।

॥ कृहनिभ्यां क्नुः ॥ ३० ॥

कृणुः खड्गादिकोशकृत्। बाहुलकादझलादावपि कित्यनुनासिकलोपः। हनुः। पुनरुक्तिः स्वरभेदात्। 'कृहनिभ्यां त्नुगि'ति च पाठः#। कृत्नुः ऋषिः। हत्नुर्हन्ता।

॥ गमेः सन्वच्च ॥ ३१ ॥

गमेः क्नुः सन्वत् स्यात्। प्राग्वदनुनासिकलोपः। जिगनुरग्निः। अत्रापि त्नुगधिकारे जिगत्नुः।

॥ दाभाभ्यां नुः ॥ ३२ ॥

दानुर्दाता। भानुः।

॥ वचेर्गश्च ॥ ३३ ॥

वग्नुर्वाग्मी।

॥ धेट इच्च ॥ ३४ ॥

गुणः। धीयते वत्सेन धेनुः।

॥ सुवः किच्च ॥ ३५ ॥

1 'सरः।' घ.

✿ 'अन्ये शुषिं न पठन्ति' के.

'क्तनुरित्यन्ये।' के.

CC-0. In Public Domain. Digitization by eGangotri

सूनुः ।

जहातेर्द्वे अन्तलोपश्च ॥ ३६ ॥

जहात्यधर्मं जह्नुः ।

॥ स्थो णुः ॥ ३७ ॥

स्थाधातोर्णुः स्यात् । स्थाणुः ।

॥ अजिवृरीभ्यो नित् ॥ ३८ ॥

एभ्यो णुर्नित् स्यात् । अजेवीत्वम् । गुणः । निर्गच्छति शब्दोऽस्माद् वेणुः । वर्णुर्नदः । रीयते च्यवते रेणुः ।

॥ विषेः किच्च ॥ ३९ ॥

विष्णुः ।

॥ कृदाधारार्चिकलिभ्यः कः ॥ ४० ॥

बाहुलकात्★ कस्येत्त्वं न । करोति वेगेन गतिं कर्कः श्वेताश्वः । दाको यज्ञः । धाकः ओदनः । दानं कुर्वन्त्यस्यां, राति सुखं वा राका✿ । अर्चेः सेट्त्वेऽपि 'तितुत्र–' (७-२-९) इति कस्यानिट्त्वम् । चोः कुः । अर्च्यतेऽर्कः । क्षिप्यते कल्कं मलम् । कुतुस्तूयीभ्यश्च भोजः । कौति कोकः । क्रमाद् वर्धते तोकः बालः । अल्पस्य कौतुककरत्वात् स्तूयते जनैः स्तोकः । ऊयेर्यलोपः ऊकः समूहः ।

॥ सृवृभूशुषिमुषिभ्यः कित् ॥ ४१ ॥

सृका आयुधभेदः । वृकः । भूकः कालः । शुष्को नीरसः । निष्ठया सिद्धेऽप्युक्तिरभूतकालेऽपि सिद्ध्यर्थम् । वस्त्रादिना मुष्यते तिरोधीयते मुष्कः ।

॥ शुकवल्कोल्काः ॥ ४२ ॥

शोभते शुकः । शोर्गत्यर्थाद्वा । संव्रियतेऽनेन वल्कं तरुत्वक् । ओषति दहत्युल्का । षस्य लः । **निष्कतुरुष्कोदर्काळर्कशुल्कश्ववल्ककिञ्जल्कोल्काच्छेककेकादय** इति **भोजः** । अळर्क उन्मत्तः श्वा ।

★ 'लशक्वति' के. ✿ एषु त्रिषु 'केऽण' इति ह्रस्वाभावोऽपि बाहुलकाद् बोध्यः ।' के.

CC-0. In Public Domain. Digitization by eGangotri

शल गतौ। गच्छत्यनेन दत्तेन शुल्कः। श्वफल्कोऽन्धकभेदः। किञ्चिदल्पः सन् ज्वलति तीक्ष्णो भवति किञ्जल्कः। कै शब्दे केका।

॥ इण्भीकापाशल्यतिमर्चिभ्यः कन् ॥ ४३ ॥

एति संख्यान्तरेषु व्याप्नोति एकः। बिभेति सर्पादेः भेकः। कै काकः। पिबति स्तनं पाकः। पाति स्वबलमिति दैत्यश्च। शलति गच्छत्यवयविभ्य इति शल्कं शकलम्। सततं गम्यते अत्कं समीपम्। मर्चिः सौत्रो गत्यर्थः। धावति मर्को मार्जारः।

॥ नौ हः ॥ ४४ ॥

निलीय गच्छति निहाका गोधा☼।

॥ स्यम ईट् च ॥ ४५ ॥

स्यमीकं जलम्। पुंसि मेघश्च।

॥ अजियुधुनीभ्यो दीर्घश्च ॥ ४६ ॥

अजेर्वी। वीका अक्षिमलम्*। यौति केशेषु यूका। धूका पताका। नीका द्यूतम्। शुघुभ्यां च भोजः। शूकः। घुङ् शब्दे। घूक उलूकः।

॥ ह्रियो रश्च लो वा ॥ ४७ ॥

[1]ह्रीका, ह्लीका लज्जा।

॥ शकेरुनोन्तोन्त्युनयः ॥ ४८ ॥

शक्नोति द्यां गन्तुं शकुनः। शकुन्तः। शकुन्तिः। शकुनिः।

॥ भुवो झिच् ॥ ४९ ॥

'झोऽन्तः' (७-१-३)। भवन्तिः कालः। अवेश्च भोजः। अवन्तिर्नृपः।

1 'ह्रीकः पिता ह्लीको लज्जा' घ.

☼ 'अत्र नौ सदेर्डिच्चेति सूत्रमन्येऽधिकं पठन्ति।' के

* 'दीर्घोक्तिसामर्थ्यादगुणः।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ कन्युच् क्षिपेश्च ॥ ५० ॥

क्षिपेर्भुवश्च कन्युच्। क्षिपण्युर्वायुः। भुवन्युरग्निः।

॥ चनुङ् नुदेश्च ॥ ५१ ॥

नुदेः क्षिपेर्भुवश्च चनुङ्। नुदनुः क्षिपणुश्च वायुः। भुवनुर्भवितव्यता। नदिवदिपतिदाभ्यश्च भोजः। नदनुर्मेघः। वदनुर्वक्ता। पतनुः पक्षी। ङित्वादाल्लोपः। दनुरसुरमाता।

॥ कृवृतॄदारिभ्य उनन् ॥ ५२ ॥

करोत्यन्यहितं करुणो दयावान्। करोति हितमनयेति करुणा दया च। व्रियते प्रार्थ्यते वरुणः। बाल्यं तरति तरुणः। दारयति परान् दारुणः।

॥ त्रो रश्च लोपो वा ॥ ५३ ॥

तरतेरुननि परे रस्य लत्वं वा स्यात्। तलुनोऽपि तरुण एव।

॥ क्षुधिपिशिमिथिभ्यः कित् ॥ ५४ ॥

क्षुधुनो बुभुक्षावान्★। पिंशति विभजति गूढार्थं पिशुनः। मिथृ सङ्गमे। मिथुनम्। 'फलेर्गुक् च' इति भोजः। फलति शुभं फल्गुनी नक्षत्रम्⊗।

॥ अशेर्लश च ॥ ५५ ॥

लशुनं पलण्डुभेदः।

॥ अर्जेर्णिलुक् च ॥ ५६ ॥

अर्जेरुनन् णिलुक् च। अर्ज प्रतियत्ने। निर्मलीकृतत्वाद्धवलोऽर्जुनः[1]।

॥ तृणाख्यायां चित् ॥ ५७ ॥

अर्जुनाख्यं तृणम्। स्वरे भेदः।

1. 'नः। आर्जयति श्रियमर्जनः। तृणा' घ.

★ 'म्लेच्छजातिश्च' के.

⊗ 'अन्ये त्वेतत् पञ्चपाद्यामेवान्तर्भावयन्ति।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ अर्तेश्च ॥ ५८ ॥

चिदुनन् स्यात्। गच्छत्यरुणः।

॥ धारेर्णिलुक् च ॥ ५९ ॥

णिलुकि वृद्ध्यभावः। धरुणो धर्ता। अस्य नित्त्वं चित्त्वं च विना प्रत्ययस्वर एव दृष्टः✿।

॥ अजियमिशीङ्भ्यश्च ॥ ६० ॥

उनन् स्यात्। प्राप्यत्वाद् वयुनं भद्रम्। उपरमयति पापं यमुना। शयुनोऽजगरः। वयुनादेरपि धरुणवत् स्वरो दृष्टः।

॥ वृतॄवदिहनिकमिकषियुमुचिभ्यः सः ॥ ६१ ॥

'तितुत्र[1]–' (७-२-९) सस्य इडभावः। वर्षम्। तर्षः सूर्यः। वर्त्वम्। वदति किञ्चिद् वत्सो बालः। हन्ति सम्यग् गच्छति हंसः। काम्यते कंसः पात्रम्। 'षढोः कः'। कष्यते भुजेन कक्षः। कषति हिनस्तीति वनं च। सङ्गच्छते योषा। चोः कुः। मोक्षः। 'युमाभ्यां षः' इति भोजोक्त्या माषः★।

॥ प्लुषेरच्चोपधायाः ॥ ६२ ॥

प्लक्षः। यजिवामाभ्यश्च भोजः। व्रश्चादिषः[2]। सेव्यते यक्षः। वासा आटरूषः। मासः।

॥ मनेर्दीर्घश्च ॥ ६३ ॥

मन्यते काङ्क्ष्यते मांसम्।

॥ अशेर्देवने ॥ ६४ ॥

'–छशां षः'। कः। द्यूतकर्माण्यश्नुतेऽक्षम्।

॥ नदेः कश्च ॥ ६५ ॥

1 'त्र' इति सस्य' घ. 2 'षः। कः। से' घ.

✿ 'एतत्सूत्रमन्यत्र नोपलभ्यते।' के.

★ 'अन्यैस्त्वत्र युमुची न पठ्येते।' के.

CC-0. In Public Domain. Digitization by eGangotri

नक्षं नभः⊗ ।

॥ स्नुव्रश्चिकृत्यृषिभ्यः कित् ॥ ६६ ॥

स्नुषा । ग्रहिज्यादिना प्रसारणम् । सोपधत्वात् 'स्कोः–' (८-२-२९) इति सलोपः । व्रश्चादिषत्वम् । कत्वम् । वृश्च्यते वृक्षः । कृत्स उदरम् । गच्छत्यृक्षं नक्षत्रम् । रिषिशृभ्यां च **भोजः** । रलयोरभेदाल्लिक्षा क्षुद्रजन्तुः । 'ॠत इत्–' (७-१-१००) । दीर्घः । शीर्यते मृतौ शीर्षम् ।

॥ ऋषेर्जातौ ॥ ६७ ॥

ऋक्षो वानरः । पूर्वेण सिद्धेऽप्युक्तेः फलं चिन्त्यम्✿ ।

॥ गृधिपत्योर्दकौ च ॥ ६८ ॥

गृत्सो गृध्नुः । पतन्त्यनेन पक्षः≠ । **भोजस्त्वाह**–'अमेर्नित्' । सो नित् स्यात् । अंसः । 'उन्देर्नलोपश्च' । सश्च नित् स्यात् । उत्सो निर्झरः । [illegible] ।

॥ अशेः सरन् ॥ ६९ ॥

'तितुत्र–' (७-२-९) इति सरस्येडभावः । अश्नुते व्याप्नोति पदान्यक्षरम् । कयजिमाभ्यश्च **भोजः** । केसरः । अजेर्वी । वेसरोऽश्वतरः । मासर आचामः ।

॥ वसेश्च ॥ ७० ॥

सरन् स्यात् । 'सः सि–' (७–४–४९) इति तः । वसत्यस्मिन्नृतुगणो वत्सरः ।

॥ सपूर्वाच्चित् ॥ ७१ ॥

स्वरे भेदः । संवत्सरः । परिवत्सरः★ ।

⊗ 'नैतदुज्ज्वलदत्तादिभिः पठ्यते ।' के.

✿ 'अत्र उन्दिगुधिकुषिभ्यश्चेत्यपि सूत्रमन्ये पठन्ति ।' के.

≠ 'गृधिपण्योरित्यन्ये' के.

★ 'अन्ये तु सम्पूर्वादिति पठित्वा संवत्सरमेवोदाहरन्ति ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ कृधूमदिभ्यः कित् ॥ ७२ ॥

कृसरस्तिलमिश्रान्नम्। धूयते निरस्यते धूसरः। माद्यति मुह्यत्यनेन मत्सरः। केश्च भोजः। किसरो गन्धद्रव्यम्।

॥ पते रश्च लो वा ॥ ७३ ॥

पतेः सरन् रस्य लत्वं च वा स्यात्। पत्सरः, पत्सलः, गोमान्☼।

॥ तन्यृषिभ्यां क्सरन् ॥ ७४ ॥

कित्त्वाद् 'अनुदात्तोपदेश–' (६-४-३७) इति नलोपः। तसरः कौशेयसूत्रम्। ऋक्षरः कण्टकः।

॥ पीयिक्वणिभ्यां कालन् ह्रस्वः सम्प्रसारणं च ॥ ७५ ॥

पीयेर्ह्रस्वः। क्वणेः प्रसारणम्। पीयतिः सौत्रः। पियालश्चारः। कुणालः पक्षी। तमिबिडिमृणिकुलिपलिपञ्चिभ्यश्च भोजः। तमालः। बिडालो (विलाळो) मार्जारः। मृण हिंसायाम्। मृदुत्वात् पीड्यते मृणाल(ळ)म्। बन्धुमत्त्वात् कुलालः। लघुत्वाद गच्छति वायुना पलालम्। विस्तृतत्वात् पञ्चालाः। पुनश्चाह- 'कम्पेर्नलोपश्च'। भेदनावस्थायां चलति घटात् कपालम्। '[1]भजेर्गश्च'। भगालं कपालमेव। 'सर्तेर्गुक् च'। कालन्नपि। सरति सृगालः। 'कीलालकङ्काल(ळ)हिन्तालवेताल(ळ)जम्बाला(ळा)दयश्च'। कीलति प्रतितिष्ठति देहे कीलालं रक्तं जलं च। कङ्कति गच्छति कङ्कालः(ळः)कलेबरम्। हिन्तालस्तरुः। वेति गच्छत्यश्नोति खादति वा मांसं वेतालः(ळः)। जमति गिरतीव न्यस्तवस्तूनि जम्बालः(ळः)। आद्युक्तेश्चक्रवाल(ळ)करवाला(ळा)लवालादयः। इति।

॥ कुठिकुषिभ्यां काकुः★ ॥ ७६ ॥

1 'भञ्जेर्गश्च नलोपश्च' घ.

☼ 'अन्ये नित्यं लत्वमाहुः। पत्सलः पन्था इति च।' के.

★ 'कठीत्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

कुठाकुर्दरिद्रः। कुषाकुर्मूषिकः। शिवेश्च भोजः। शिवाकुः ऋषिः।

॥ चटिकठिभ्यामाकुः✿ ॥ ७७ ॥

चटाकुर्मुनिः। कठाकुः कुटुम्बपोषकः। 'वेहपत्योर्डिदिति भोजः। उपचाकुर्मुनिः। निचाकुर्निपुणः।

॥ सर्तेर्दुक् च ॥ ७८ ॥

सृदाकुर्वायु*ः।

॥ पर्देनित् सम्प्रसारणमल्लोपश्च ॥ ७९ ॥

शूत्कारादिकुत्सितशब्दं करोति[1] पृदाकुः सर्पः।

॥ सृयुवचिभ्योऽन्युजागूजक्नुचः ॥ ८० ॥

सर्तेरन्युच्। सरण्युर्मेघः। योरागूच्। मिश्रीक्रियते यवागूः। वचेरक्नुच्। वचक्नुर्विप्रः।

॥ आनकः शीङ्भियः ॥ ८१ ॥

शयानकोऽजगरः। भयानकः।

॥ लूशिङ्घिधात्र्भ्यश्च⊗ ॥ ८२ ॥

लवानको देशः। शिङ्घानकः श्लेष्मा। धानकः सङ्ग्रामः। 'अर्गेर्डिदि'ति भोजः। डित्वात् सर्वलोपः। आनकः पटहः।

॥ उल्मुकदर्विहोमि[2]नः ॥ ८३ ॥

उचेर्लत्वम्। समवैत्यग्निनोल्मुकः। दृणाति विभजत्यन्नं दर्विभिस्सटा। होमी सर्पिः।

॥ ह्रियः कुग् रश्च लो वा ॥ ८४ ॥

1 'तीति पृ' घ. 2 'मिन्' घ.

✿ 'अन्ये त्वेतन्न पठन्ति।' के.

* 'मण्डूकप्लुतया काकोरनुवृत्तेर्बाहुलकाद्वा गुणाभावो वाच्यः।' के.

⊕ 'आणको लूधूशिङ्घिधात्र्भ्य' इत्युज्ज्वलदत्तादिपाठः।' के.

CC-0. In Public Domain. Digitization by eGangotri

ह्रीकुः ह्लीकुश्च लज्जावान्। 'कैशीशमिरमिभ्यः कुरिति **भोजः**। आत्वम्। काकुः सविकारशब्दः। शेकुरुद्भिद्भेदः। स्थिरत्वात् शाम्यतीव शङ्कुः। रमते वने रङ्कुः।

॥ हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् ॥ ८५ ॥

'तितुत्र–' (७-२-९) इतीडभावः। हसेरुपादानार्थवृत्त्या हस्तः। मर्तो मनुष्यः। गिरत्यर्पितवस्तु गर्तः। एति नाना गच्छत्येतः सारङ्गवर्णः। वातः। अमति समाप्नोति अनेन इति अन्तः[1] समापनम्। दमयति चर्वणीयानि दन्तः। लोतः [2]कीटभेदः। पवतेर्गतिवृत्त्या गच्छत्यनेनाब्धौ पोतः। 'लोपो व्योः–' (६-१-६६) इति वलोपः। ह्रिनस्त्यन्यान् धूर्तः। वसेश्च **भोजः**। वसु स्तम्भे। अज्ञत्वात् व(ब)स्तः छागः।

॥ नञ्याप्नोतेरिट् च ॥ ८६ ॥

बाहुलकान्नलोपो न। अशुद्धत्वान्नाप्यते नापितः।

॥ तनिमृङ्भ्यां किच्च ॥ ८७ ॥

कित्त्वादनुनासिकलोपः। निषेकादिक्रियां तनोति ततः पिता। याचन[3]मस्य मरणतुल्यत्वान्म्रियत इवानेन मृतं याचितम्। 'हुर्छेर्मुट् च' इति **भोजः**। हुर्छेस्तन् कित्, धातोर्मुट् च। 'राल्लोपः' (६-४-२१) इति छलोपः। 'हलि च' (८-२-७७) इति दीर्घः। मुहूर्तः।

॥ अञ्जिघृसिभ्यः क्तः ॥ ८८ ॥

व्यक्तं जगत्। घृक्षरणदीप्त्योः। घृतम्। बध्नाति दृष्टिं सितः श्वेतः। निष्ठया सिद्धेऽपि नामत्वादुक्तिः। 'लूसूचितिभ्यश्च' **भोजः**। लुनात्यन्यजन्तून् लूता। प्रेरयत्यश्वान् सूतः। जानन्त्यनेन चित्तम्।

॥ दुतनिभ्यां दीर्घश्च ॥ ८९ ॥

1 'न्तं स' घ. 2 'मेषभेदः। कीटभेदः' घ. 3 'नस्य मरण' घ.

CC-0. In Public Domain. Digitization by eGangotri

क्तश्च स्यात् । गच्छति दूत: । नलोपे दीर्घः । तातस्ततवत् । बाहुलकात् षिञः क्तो दीर्घश्च । बीजानि सिनोति सीता ।

॥ जेर्मूट् चोदात्त: ॥ ९० ॥

जे: क्तः, तस्योदात्तो मूट्, धातोर्दीर्घश्च । जयत्युष्णं जीमूत: ।

॥ लोष्टपलितौ ॥ ९१ ॥

लूयते खण्ड्यते लोष्ट: । फलति विशीर्यतेऽनेन देह इति पलितं जरा । व्रातालातसुतपुतपित्तमुस्तापुस्ततूस्तबिस्तवितस्तादयो भोजोक्ताः व्रजति व्रातम् । अर्धदग्धत्वेनान्यानुपयुक्तत्वाद् न लात्येतदलातम् । षूङो ह्रस्वः । सुतः । पुतः स्फिक् । पतन्त्यनेन पित्तम् । मुस खण्डने । खण्ड्यते वराहैर्मुस्ता । पुषेः सत्वम् । पुष्यत्यनेन ज्ञानं पुस्तं लेख्यं पुस्तकम् । तूस्तानि वस्त्रदशाः⊕ । बिस्यते प्रेर्यते क्रयाद्यर्थं बिस्तं कर्षपरिमितहेम । वितस्ता नदी । आद्युक्तेः अयुतं, नियुतम् ।

॥ हृश्याभ्यामितन् ॥ ९२ ॥

हरति चित्तं हरितः । व्याप्नोति श्येत: सित: ।

॥ रुहेश्च लो वा ॥ ९३ ॥

वर्णान्तरेभ्य उपरि गच्छति रोहित:, लोहित: । **भोजेन** पिशिपृषिभ्यां किदुक्तः । अशीकृतत्वात् पिशितम् । पृषितं बिन्दुः✿ ।

॥ श्रुदक्षिस्पृहिभ्य आय्य: ॥ ९४ ॥

श्रवाय्य: श्रोता । दक्ष गतिहिंसयोः । दक्ष वृद्धौ शीघ्रार्थे च । सर्वत्र गन्तृत्वात्, हिंसकत्वात् वृद्धाङ्गत्वात् शीघ्रगामित्वाद्वा दक्षाय्यो गृध्रः । 'अयामन्त–' (६-४-५५) इति णेरय् । स्पृहयाय्यः स्पृहयालुः । 'स्पृहिगृहिभ्य' इति पाठे गृहयाय्यो गृहस्वामी ।

⊗ 'तूस्तं पापं च ।' के.

✿ 'अन्यैस्तु 'पिशेः किच्चेति' पञ्चपाद्यामेव पठ्यते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ दधिषाय्यः ॥ ९५ ॥

आज्यार्थे निपात्यते ।

॥ वृङ एण्यन् ॥ ९६ ॥

सम्भज्यते वरेण्यः श्रेष्ठः ।

॥ स्तुवः क्सेय्यश्छन्दसि ॥ ९७ ॥

स्तुषेय्यः स्तुत्यः# ।

॥ राजेरन्यः ॥ ९८ ॥

राजन्यः क्षत्रियः★ ।

॥ अर्तेर्नित् ॥ ९९ ॥

न गच्छन्त्यस्मिन् अरण्यम् ।

॥ पर्जन्यः ॥ १०० ॥

पृणातेरन्यन्, प्रत्ययस्य जुट् । पालयति, पूरयति वा पर्जन्यः । शॄरम्योश्च[1] भोजः । शरण्यो रक्षिता । रमण्या योषित् ।

॥ वदेरान्यः ॥ १०१ ॥

वदान्यः प्रियवाक्, दाता च । दातॄणामपि सम्यग्भाषित्वात् ।

॥ अमिनक्षियजिवधिपतिभ्योऽत्रन् ॥ १०२ ॥

अमति भक्षयत्यस्मिन्नमत्रम् । गच्छति नक्षत्रम् । यजत्रो यज्वा । वधत्रमायुधम् । पतत्रम् ।

॥ गलेरादेश्च कः ॥ १०३ ॥

गलति भुङ्क्ते भर्तुः स्वं कल(ळ)त्रम् ।

1 'रमोश्च' घ.

'उज्ज्वलदत्तस्तु 'स्तुवः केय्य' इति पठित्वा उवङि स्तुवेय्य इत्युदाजहार ।' के.

★ 'अन्येत्वत्र 'शॄरम्योश्च' इत्यपि सूत्रं पठन्ति, देववृत्तिकारादृते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ वृञश्चित् ॥ १०४ ॥

व्रियते वेष्ट्यतेऽनया वरत्रा रज्जुः ।

॥ सुविदेः कत्रन् ॥ १०५ ॥

सुविदत्रं धनम् ।

॥ कृतेर्नुम् च ॥ १०६ ॥

कृन्तत्रं लाङ्गलम् ।

॥ भृमृदृशियजिपर्विपच्यमि [तमि]-
नमिहर्यिभ्योऽतच् ॥ १०७ ॥

भरतः । मरतो वायुः । दर्शतो दर्शनीयः । यजतो यज्वा । पर्व्यते पूर्यते वृक्षादिभिः पर्वतः । पचतः कालः । अमतो मृत्युः‡ । नमतः कुयभेदः । गच्छन्त्यनेन स्वर्गं, काम्यते वा देवैर्हर्यतो यज्ञः । 'वलेश्च' भोजः [1]वलतं कुसूलम् ।

॥ पृषिरञ्जिभ्यां कित् ॥ १०८ ॥

सिञ्चति रेतःसेकं करोति पृषतो मृगः । रज्यते काङ्क्ष्यते रजतम् । सिकेश्च भोजः । सिकता ।

॥ खलतः ॥ १०९ ॥

दुर्जनार्थोऽयम्☼ ।

॥ शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ॥ ११० ॥

शयथोऽजगरः । शपथः । रवथः शब्दकारः । गमथः पन्थाः । वञ्चथः कालः । जीवथो वायुः । प्राणथो बलवान् । वन्दिवन्दिभ्यां च भोजः । वन्दथः स्तोता । बन्धथः कोकिलः । दृभृशमिदमिभ्यश्च★ ।

1 'वलतः कु' घ.

‡ 'तमतस्तृष्णापरः' के.

☼ 'अन्यैस्त्विवदन्तो नीरोमशीर्षार्थः पठ्यते ।' के.

★ 'भोज इत्येव पञ्चपाद्यामीदृशसूत्रस्यादर्शनात् ।' के.

CC-0. In Public Domain. Digitization by eGangotri

दरथो गर्तः। शमथः शान्तिः। दमथो दमः।

॥ उपसर्गे वसेः॥ १११ ॥

आवसन्त्यस्मिन् आवसथो गृहम्। उपवसन्त्यत्र देवा उपवसथः सुत्यापूर्वमहः⊗।

॥ भृञश्चित् ॥ ११२ ॥

भरथो लोकपालः।

॥ रुविदिभ्यां कित् ॥ ११३ ॥

उवङ्। रुवथः श्वा। विदथो यज्ञो योगी च*।

॥ अत्यमिचमितमिरभिनभितपिपणिपनिभ्योऽसच् ॥ ११४ ॥

अतसी तरुः। अमसमुदकम्। चमसः। तमसा नदी। रभसः। 'रभेरशब्लिटोः' (७-१-६१) इति नुम् बाहुलकान्न। नभसः समुद्रो नभो वा। तपसः सूर्यः। पणसः पण्यम्। स्तूयते भुञ्जानैः पनसः★। अल्यविरधिचटिभ्यश्च भोजः। शक्त्यर्थस्य वैपरीत्यादलसः। अवसं पाथेयम्। रधसोऽन्धकजातिः। चटसश्चर्मपुटम्।

॥ वियस्तुट् च✡ ॥ ११५ ॥

शोभते वेतसः।

॥ वयो णित् ॥ ११६ ॥

वय गतौ। वायसः।

॥ वाहसः ॥ ११७ ॥

न वहति गच्छति वाहसोऽजगरः।

वहियुभ्यां णिदित्येके गोभक्षः किल यावसः।

⊗ 'इदं सूत्रं सिद्धान्तकौमुद्यामत्र न दृश्यते।' के.

* 'उपसर्गे वसेः' इति सूत्रं सिद्धान्तकौमुद्यामत्र पठितम्।' के.

★ 'अत्र अमिस्थानेऽवि नमिलभिपतिमहींश्चाधिकानन्ये पठन्ति।' के.

✡ 'वेञ इत्यन्ये।' के.

CC-0. In Public Domain. Digitization by eGangotri

अत्र भोजस्तामरसपुल्कसादीन् न्यपातयत् ॥

॥ दिविसिविभ्यां किच्च⊕ ॥ ११८ ॥

दीव्यति व्याप्रियते, गच्छति वात्र दिवसः। शोभते वा। सिवसः स एव।

॥ कृॠगॄशॄशलिगर्दिभ्योऽभच् ॥ ११९ ॥

करभ उष्ट्रः। गरभो हिंस्रः। शृणाति शरभः। गच्छति शलभः। गर्दभः।

॥ ऋषिवृषिभ्यां कित् ॥ १२० ॥

गच्छति ऋषभः। सदा रेतः सिञ्चति वृषभः।

॥ रुषेर्नित्लुश च ॥ १२१ ॥

हिनस्ति लुशभो गन्धहस्ती।

॥ रासि वल्लिभ्यां च ॥ १२२ ॥

शब्दायते रासभः। संवृणोत्यनिष्टं वल्लभः।

॥ गळेः कळ च ॥ १२३ ॥

जलेन सिञ्चत्यात्मानं कळभः#।

॥ जॄविशिभ्यां झच् ॥ १२४ ॥

'झोऽन्तः' (७-२-३)। जरन्तो महिषः। विश्यते गाह्यते वेशन्तः पल्वलम्। रेवेश्च भोजः। रेवन्तः सूर्यपुत्रः।

॥ रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ॥ १२५ ॥

आशिषि द्योत्यायां रुहादिभ्यो झच् षित् स्यात्। रोहत्वित्याशास्यमानत्वाद् रोहन्तो वृक्षः। षित्वाद् रोहन्ती लता। नन्दन्तः सुखी। जीवन्त ऋषिः। जीवन्त्योषधिः। प्राणन्तो वायुः।

॥ तॄभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ॥ १२६ ॥

⊕ 'दिवः किदित्येवान्ये' के.

'अन्यत्रैतन्न दृश्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

एभ्यः षित् झच् स्यात्। तरन्तः समुद्रः। भवन्तः कालः। सुखं वसन्त्यस्मिन्[1] वसन्तः। निवसन्तो निवासस्थानम्। वहन्तो रथः। भासन्तः सूर्यः। 'अयामन्त–' (६-४-५५) इति णेरय्। साधयन्तो भिक्षुः※। गड(ळ)यन्तो मेघः। मण्डयन्तोऽलङ्कर्ता। जयन्त इन्द्रपुत्रः। नन्दन्तः सुखकृत्★।

॥ हन्तेर्हि मुट् च ॥ १२७ ॥

तुषारेण हन्ति जनान् हेमन्तः। दुषेः षुक् च **भोजोक्तः**। न दुष्यति दुष्षन्तः, सिनोतेरी च✲। झचो मुट् ईत्वं च। सीमन्तः।

॥ भन्देर्नलोपश्च ॥ १२८ ॥

भदन्तः क्षपणः।

॥ ऋच्छेररः ॥ १२९ ॥

ऋच्छरः त्वरावान्।

॥ मुदेर्गुक् च[2] ॥ १३० ॥

मोदन्ते योद्धारोऽनेन मुद्गरः।

॥ गुरेर्जुक् च ॥ १३१ ॥

गुर्जरो देशः⊗।

॥ अर्तिकमिचमिभ्रमिदेविवासिवाशिभ्यश्चित् ॥ १३२ ॥

अर्यतेऽनेनेत्यररं कवाटम्। कमरः कामुकः। भक्षयति तृणादि चमरो मृगः। भ्रमरः। देवरः पत्यनुजः* सुखं वासयति जनान्

1 'न् इति व' घ. 2 'च इति भोजः। मोदन्ते' घ.

※ 'अन्ये त्वमुमण्यन्तमाहुः'। के.

★ 'अनाशिष्यपि यथा स्यादिति नन्देः पुनरुपादानमित्युज्ज्वलदत्तः' के.

✲ 'भोजोक्त एव स्यात्। अन्यत्रानुपलब्धेः।' के

⊗ 'सूत्रद्वयमिदमन्यत्र नोपलभ्यते' के

* 'पतिभ्रातेति तूचितम्' के

CC-0. In Public Domain. Digitization by eGangotri

वासरः । वाशरोऽग्निः* । **भोजस्तु**- सुन्दिकन्दिमन्दिमन्थिमञ्जिपञ्जि-पिञ्जिचटिकासिकुटि[1]कबिशबिदुकदिबदिभ्यो नित् स्यादित्याह । सुन्दरः । प्रतिध्वनिना सिंहादिशब्दैर्वा रोदितीव कन्दरः । मन्दन्ते मृगादयोऽत्र मन्दरः । क्षोभयति चारुगत्या हृदयं मन्थरः । गौरा-दिङीष् मञ्जरी । पञ्जरः । पिजि वर्णे । पिञ्जरः पिङ्गः । चटरो मधुकरण्डः । कुत्सितशब्दकृत्त्वात् कासरो महिषः । बाहुल-कात् 'गाङ्कुटादि–' (१-२-१) इति ङित्त्वाभावः । प्रायेणानृजुरन्ध्र-रूपत्वात् कोटरम् । स्तूयते कबरः केशो नानावर्णश्च । गच्छति वने शबरः । दवरो गुणः । कदरः सितखदिरः । गौरादित्वाद् बदरी । भूयोऽप्याह क्‍ऋग्‍ऋघ्‍ऋज्‍ऋझ्‍ऋदृबृभृमृभ्यः सधात्वा-दिष्टित् । एभ्यः क्रमाद्धात्वादिभूतकगादिवर्णसहितोऽरप्रत्ययः टित् स्यात् । तेन कर गर घर इत्यादिप्रत्ययः । कर्करः क्षुद्रात्मा । टित्त्वात् कर्करी [illegible] । गर्गरो राजर्षिः । घर्घरो घोषः । जर्जरो जीर्णः । झर्झरो दर्दरोऽपि वाद्यभेदौ । बर्बरो म्लेच्छजातिः । भर्भरः छद्मवान् । मर्मरः शुष्कपत्रचयः । "मर्मरायां दूर्वायाम्" इत्यादौ टित्त्वेऽपि बाहुलकान्न ङीप् । पिठरक्रकरमकरशिखरशेखर-डहरकुहरकूर्परकर्परशफरडमरडामरपामरसगरतगरतोमराजगरादयोऽप्य-रान्ता उक्ताः । क्रकरः तित्तिरिः । डहरं हृत्पद्मम् । दन्त्यादिं केचित् पठन्ति । कूर्परो हस्तैकदेशः । कर्परः कपालः । डमरो डामरश्च विशृङ्खलः । तगरो वृक्षः । आद्युक्तेः कडङ्गरो बुसम् । इति ।

॥ कुवः क्रन् ॥ १३३ ॥

कौति कुररः पक्षी ।

॥ अङ्गिमदिमन्दिभ्य आरन् ॥ १३४ ॥

1 'टि शबि' घ.

* 'वाशिरन्यैर्न पठ्यते ।' के

CC-0. In Public Domain. Digitization by eGangotri

अङ्गतेर्दीप्त्यर्थत्वादङ्गारः। मदारो वराहो रत्नं च। मोदन्तेऽनेन मन्दारः। अगिकासिभ्यां च भोजः। अगति गतप्रत्यागतैः कुटिलं गच्छत्यत्र अगारम्। दुर्जलत्वात् कासन्तेऽनेन पीतेन कासारः सरः।

॥ गडेः कट च ॥ १३५ ॥

गड(ळ)यत्यत्र जलं कटारो जलपात्रम्। 'कड चे'ति पाठे कडारः पिङ्गलः।

॥ शृङ्गारभृङ्गारौ ॥ १३६ ॥

शृङ्गति व्याप्नोति सामाजिकहृदयं शृङ्गारः। भ्रियते जलमस्मिन् भृङ्गारः।

॥ कञ्जिमृजिभ्यां चित् ॥ १३७ ॥

कञ्जारः [1]कुसूलम्। 'मृजेर्वृद्धिः'। जिह्वया मार्ष्टि सर्वपात्राणि मार्जारः। आखुभ्यो गृहं मार्ष्टि शोधयति वा। कृञो मुट् चेति भोजः। कर्मारो लोहकारः।

॥ कमेरुच्चोपधायाः ॥ १३८ ॥

काम्यते काङ्क्ष्यते कुमारः।

॥ तुषारादयश्च ॥ १३९ ॥

अत्र भोजः – तुषिकुठिभ्यामारक्'॥ तुष्यन्त्यनेन शीतार्थिनः तुषारः। कुठारः॥ कल्हार कान्तार केदार कोविदारकर्बुदारकाञ्चनारादयः॥ कलन्तेऽत्र भृङ्गाः। कल्हारः। काम्यते मृगैः कान्तारः। क्लिद्यते जलैः केदारः। अन्त्यास्त्रयो वृक्षभेदाः। आद्युक्तेः दीनारः काञ्चनम्, मसार इन्द्रनीलः≠। इति।

॥ सर्तेरपः षुक् च ॥ १४० ॥

1 'कुसूलः' घ.

≠ 'केचिदत्र दीङो नुट् च इति सूत्रं पठन्ति।' के

CC-0. In Public Domain. Digitization by eGangotri

व्याप्नोति व्यञ्जनेषु सर्षपः।

॥ उषिकुटिदलिकचिखजिभ्यः कपन्॥ १४१ ॥

उषपः सूर्यः। कुटपः प्रस्थचतुर्भागः। कुडुप इत्यव्युत्पन्नमस्तीति हरः। दलपः शरः। कचपः शुकः। खजपो घृतमन्थः। कुषिकलिभ्यां च भोजः। कुषपो विन्ध्यः। कलपः शाकपर्णम्।

॥ क्वणेः सम्प्रसारणं च ॥ १४२ ॥

पूर्वमक्वणत् कुणपः शवम्।

॥ कवंश्चाक्रवर्मणस्य ॥ १४३ ॥

तन्मते कुणवः शवम्✿।

॥ विटपविष्टपविशिपोलपाः ॥ १४४ ॥

विट शब्दे। स्वनन्त्यत्र खगा विटपः। विष्लृ व्याप्तौ। व्याप्तत्वाद् विष्टपम्★। विशिपो गृहम्। उच्यति सङ्घातीभवत्युलपस्तृणम्। कुतपचातपशिंशपादयश्च भोजोक्ताः। कुतपः छागलोम। चातपो मुनिः।

॥ वृतेस्तिकन्॥ १४५ ॥

वर्तिका चित्रोपकरणम्।

॥ कृतिभिदिलतिभ्यः कित्॥ १४६ ॥

कृत्तिका। भित्तिका शतावरी, वज्रं च। लतिः सौत्रः। लत्तिका गोधा। पुतेश्च भोजः। पुत्तिका मधुमक्षिका।

॥ इष्यशिभ्यां तकन्॥ १४७ ॥

कित् स्यात्। इष्यते चयनार्थमिष्टका। अश्नन्ति पितरोऽत्रेत्यष्टका भियो द्वे च इति भोजः। बि(वि)भीतकः।

✿ 'अन्ये तु कपश्चाक्रवर्मणस्य इति पठित्वा स्वरे विशेष इत्याहुः।' के

★ 'अन्येतु पिष्टपेति पठित्वा विशतेरादेः पः, प्रत्ययस्य तुट् षत्वादि कार्यमित्याहुः।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ इणस्तशंस्तशसुनौ ॥ १४८ ॥

एतश इन्द्रः। एतशसुर्ब्राह्मणः।

॥ वीपतिभ्यां तनन् ॥ १४९ ॥

वियन्त्यश्नन्त्यनेन वेतनम्। पत्यते गम्यते जनैः पत्तनम्। पृपूभ्यां किदिति भोजः। प्रीणयति नृपं पृतना पूतना ॥

॥ दृदलिभ्यां भः ॥ १५० ॥

दृणाति पाणिं दर्भः। दल्भो वल्कलम्।

अर्तिगृभ्यां भन् ॥ १५१ ॥

अर्यते रम्यत्वाद् अर्भो बालः। गीर्यतेऽन्तर्ध्रियते गर्भः।

॥ इणः कित् ॥ १५२ ॥

एति मन्दम् इभः।

॥ असिसञ्जिभ्यां क्थिन् ॥ १५३ ॥

अशुद्धत्वादस्यतेऽस्थि। नलोपः। अन्यो[illegible] सजति सक्थि ऊरुः। अजेश्च भोजः। वीभावः। गम्यतेऽनया वीथिः।

॥ प्लुषिशुषिकुषिभ्यः क्सिः ॥ १५४ ॥

'षढोः कः–' (८-२-४१) प्लुक्षिरग्निः। शुक्षिर्वायुः। कुक्षिः।

॥ अशेर्नित् ॥ १५५ ॥

अश्नुते विषयानक्षि।

॥ इष्यशिभ्यां क्सुः ॥ १५६ ॥

इष्यते भक्षणार्थमिक्षुः। 'छशां षः' (८-२-३६)। 'षढोः कः–' (८-२-४१) अक्षुरादित्यः⊗।

॥ अवितॄस्तॄतन्त्रिभ्य ईः ॥ १५७ ॥

अवत्यात्मानमवीः पुष्पिता स्त्री। तरीर्नौः। स्तरीर्निवृत्तप्रसवा। धार्यते वीणया तन्त्रीर्वीणागुणः। तन्द्रेश्च भोजः। तन्द्रीः।

⊗ 'इषेः क्सुरित्येवान्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

माधवस्त्विकारान्तमुक्त्वा 'कृदिकारात्–' (वा.) इति वा ङीष् इत्याह । तन्द्रिः, तन्द्री ।

॥ यापोः किद् द्वे च ॥ १५८ ॥

कित्त्वादाल्लोपः । ययीर्दीर्घयष्टिः✿ । पपीर्दन्ती✶ ।

॥ लक्षेर्मुट् च ॥ १५९ ॥

लक्षयति पश्यति सुकृतिनं लक्ष्मीः । अङ्कयति हरेर्गात्रं वा ।

॥ इति तृतीयः पादः ॥

॥ चतुर्थः पादः ॥

॥ वातप्रमीः ॥ १ ॥

मृगविशेषः । देवयजीरित्यपि **कौमुद्याम्** । देवान् यजतीत्यर्थे बाहुलकादीप्रत्ययः **प्रसाद** उक्तः । बाहुलकादिप्रत्ययादिदन्त एवायमिति शङ्करः ।

॥ अर्तितन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्योऽत्निज्य-तुजलिजिष्ठुजिष्णुजिशन्स्यनिथिनुल्यषासनानुकः# ॥ २ ॥

अर्तेरत्निच् । अर्यते मीयतेऽनेनेत्यरत्निः । तनेर्यतुच् । तन्यतुः सूर्यः । अञ्जेरलिच् । अज्यते जलेनेत्यञ्जलिः । पाटेश्च **भोजः** । पाटलिर्वृक्षः । वनेरिष्ठुच् । वनिष्ठुर्मांसभेदः । अञ्जेरिष्णुच् । अञ्जिष्णुर्वृतम् । अर्पेरिशन् । अर्पिशो हस्ती । मदेः स्यन् चर्त्वम् । माद्यति जले मत्स्यः । अतेरिथिन् । सततं गच्छत्यतिथिः । अङ्गेरुलिः । अङ्गति चलत्यङ्गुलिः । कोः अषः । कवषो मुनिः । योः असन् । यवन्ति पशवोऽत्र यवसम् । कृशेरानुक् । तनूकरोत्याधारं कृशानुः ।

॥ शॄः करन् ॥ ३ ॥

✿ 'अश्व इत्यन्ये' के. ✶ 'सूर्यः सोमश्चेत्यन्ये' के.

'पाठोऽत्र बहुधा' के ।

CC-0. In Public Domain. Digitization by eGangotri

शृणाति पादं, रसान्तरं वा शर्करा। वृकिभ्यां च भोजः। व(ब)र्करः छागशिशुः। केकरो वक्रदृष्टिः।

॥ पुषः कित्॥ ४॥

पुष्यति जले पुष्करं पद्मम्। पुष्णाति धान्यादिकमिति जलमपि। व्याप्नोतीत्यम्बरं च। पुष्यति शब्दोऽत्रेति वाद्यमुखं* च।

करा‌ग्रं करिणां व्योम कुशेशयमसेः फलम्।

आननं चानकादीनां ब्रुवते पुष्करं बुधाः॥

सूपुषिभ्यां किदिति भोजः। बहुसूते सूकरः।

॥ कलच् च॥ ५॥

पुषः कलच् कित् स्यात्। पुष्यति पुष्कलम्। वलेः कलजिति भोजः। संवृणोत्यङ्गं वल्कलम्।

॥ गमेरिनिः॥ ६॥

गमी। गमिष्यन्नित्यर्थः✡।

॥ आङि णित्॥ ७॥

आगामी। आङि च णिदिति भोजः। तेन केवलादपि गामी।

॥ भुवश्च॥ ८॥

भावी।

॥ प्रेः स्थः॥ ९॥

प्रस्थायी। यातेः प्रतौ च इति भोजः। प्रतियायी, प्रयायी। बुधेश्च यातिवत् स्यात्। प्रबोधी, प्रतिबोधी। एषां 'भविष्यति गम्यादयः' (३-३-३) इति भविष्यदर्थता।

॥ परमे कित्॥ १०॥

* 'करिहस्ताग्रं' के.

✡ 'भविष्यति गम्यादयः इत्युक्तत्वात्।' के.

CC-0. In Public Domain. Digitization by eGangotri

परमेशब्दपूर्वस्य स्थाधातोः किदिनिर्भवेत् ।
आल्लोपात् परमेष्ठीति स्थास्थिन्स्थ्रॄणामितीह षः ॥
स्थास्थिन्नितोह स्थाशब्दः स्थाधातोः क्विपि वर्णितः ।
गिरिष्ठाश्च रथेष्ठा इत्यलुक् तत्पुरुषे कृति ।

॥ मथः ॥ ११ ॥

मथेरिनिः स्यात् । मथिन्शब्दो मन्थार्थः ।

॥ पतस्थ च ॥ १२ ॥

पतन्ति गच्छन्त्यत्र पन्थाः

॥ खजेराकः ॥ १३ ॥

खजाको मन्थः ।

॥ वलाकादयश्च ॥ १४ ॥

वलति गच्छति वलाका । मनाका कामिनी । नभाक ऋषिः । पवाकः पूतः । प्लवाकः प्लवः । लवाकः कर्मकारः । नवाकं नवम् ।
(नवाकनिर्व्यूढनिवासभेदेष्वित्यत्राऽयमेवाऽर्थः)

शलिपटिपतिभ्यो नित् । शल गतौ । सूक्ष्मस्थानेऽपि गच्छति शलाका । गच्छति गगन इति पटाका पताके समार्थे ।

॥ पिनाकादयश्च ॥ १५ ॥

पिनाकपिण्याकश्यामाकपुलाकवार्ताकवृन्ताकज्योन्ताकादयश्चेति भोजः । पिनष्ट्यरीन् पिनाकः । गच्छत्युदरं श्यामाकः । पुल महत्त्वे, वैपरीत्यात् पुलाकस्तुच्छधान्यम् । वार्ताक वृन्ताकौ बृहतीभेदौ । ज्योन्ताकं स्वेदसद्म । आद्युक्तेर्गुपाकः क्रमुकः । गुवाक इति वकार इत्यन्ये । स्योनाकस्तरुः । पराको व्रतभेदः । भवाकः कपोतः । शुभाकश्शोभनः । तड आघात इत्यस्मात्तडाकोऽत्रेतिवृत्तिकृत् । तडागं मन्यते भोजस्तडेरागाजितीरयन् । १ । टीकासर्वस्वकारस्तु तटाकमपि रक्षितुम् । आकेकृते तडेरेव बाहुल्याट्टत्वमिच्छति । २ ।

CC-0. In Public Domain. Digitization by eGangotri

॥ कषिदूषिभ्यामीकन् ॥ १६ ॥

कषीका मक्षिका। दूषीका नेत्रमलम्। माधवे न त्विकनुक्त्या दूषिका साधिता। तस्योत्तरत्रानुवृत्तिं न विद्म इति ण्वुल्यैवैतत्। (अत्राऽनिहृषिभ्यां किच्चेति सूत्रमप्यन्यत्र दृश्यते।)

॥ चङ्क्वण्यतेः किङ्किण च ॥ १७ ॥

यङन्तात् क्वणेरीकन्, किङ्किणादेशश्च। किङ्किणीका क्षुद्रघण्डिका। किङ्किणी तु पृषोदरादित्वाद्वार्धुषिवत्। (अन्ये तु चङ्क्णः कङ्क्ण चेति पठित्वा शब्दार्थात् कणेर्यङ्लुगन्तादीकनि कङ्क्णीकेत्याहुः)

॥ शॄपॄवृञां द्वेरुक् चाभ्यासस्य ॥ १८ ॥

उरत्वे हलादिशेषे च कृतेरुक्। शर्शरीकोऽश्वः। पर्परीको भक्षोऽग्निश्च। वर्वरीकः केशसङ्घातो गजश्च।

॥ फर्फरीकादयश्च ॥ १९ ॥

फर्फरीको मृदुः। दर्दरीक इन्द्रः। मर्मरीकश्शुष्कपर्णम्। कर्करीका जलपात्रम्। मृद्वीका तिन्तिडीक। बाल्हीक वल्मीक कल्मलीक पुण्डरीकचञ्चरीक प्रतीक समीक पूतीकादयश्च भोजोक्ताः। आशु मृद्यते मृद्वीका। मृद्वीशब्दात् कपि ह्रस्वे मृद्विकेति माधवः। तिन्तिडीकस्तरुः। बाल्हीको राजा। वलन्ते। स्त्रियोऽत्र वल्मीकः। कलते ध्वनति कल्मलीको ज्वाला। पुडि खण्डने। खण्ड्यते दुष्पार्थिभिः पुण्डरीकम्। चञ्चति भ्रमति चञ्चरीको भृङ्गः। रलयोरैक्याच्चञ्चलीकः। संयन्त्यत्र समीकं युद्धम्। पृथक् प्रतीयते प्रतीकोऽङ्गम्। पूयते दशापवित्रेण पूतीकस्सोमप्रतिनिधिर्लता। आद्युक्तेस्तिन्त्रिणीकः। झर्झरीकः। अर्थो मृग्यः।

॥ अनिदृशिभ्यां किच्च ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri

ईकन् कित् स्यात्। जीवन्त्यनेन नृपा अनीकं सेना। दृशीकं रम्यम्।

॥ ऋचेश्च ॥ २१ ॥

ऋचीक ऋषिः। ऋजेरिति पाठादृजीक इत्यन्ये।

(सूत्रद्वयमिदमन्यैर्न पठ्यते। तैरुत्तरसूत्रे किद् ग्रहणं क्रियते)

॥ इषेर्ह्रस्वश्च ॥ २२ ॥

इषीका तृणभेदः।

[अत्र ऋजेश्चेति सूत्रमन्यैः पठ्यते।]

॥ सर्तेनुम् च ॥ २३ ॥

सृणीकोऽग्निः।

॥ मृडेः कीकन् ककनौ ॥ २४ ॥

मृडीकस्सुखकृत्। मृडकस्सुखी।

॥ अळीकादयश्च ॥ २५ ॥

अल्यते वार्यत इत्यली(ळी)कमप्रियमसत्यं च। भूष्यत इति ललाटं च।

(ललाटमळिकं गोधिरित्यळिकशब्दस्त्वन्य एव।)

आद्युक्तेः किणीकं निमीलनम्। मणीकं भाजनम्।

(दिन मणि मणिग्राव मणिक इति श्रीहर्षप्रयोगात् भाजनार्थो मणिकशब्दोऽप्यस्ति। तथा च कोशः अलञ्जरस्यान् मणिक इति।]

बलीको बलवान्। हृषिवलिस्यमिभ्यश्च कीकन् भोजोक्तः। हृष्यति विषयैर्हृषीकमिन्द्रियम्। संवृणोति वलीक वेश्मप्रान्तः। स्यमीकं जलम्।

॥ कॄतॄभ्यामीषन् ॥ २६ ॥

कीर्यते करीषस्। तरीषं प्लवः।

॥ शॄपॄभ्यां कित् ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

ॠत इत्। शीर्यते चूर्ण्यते स्नानीयार्थं शिरीषः। उदोष्ठ्यपूर्वस्य। पूर्यतेऽन्तः पुरीषम्।

॥ अर्जेश्चिदृज च ॥ २८ ॥

अर्जितोऽस्माद्रस इत्यृजीषं पिष्टम्।

॥ अम्बरीषश्च ॥ २९ ॥

अम्बते शीशब्दं करोत्यम्बरीषो भ्राष्ट्रः। क्लीबेऽम्बरीषं भ्राष्ट्रो नेत्यमरः। अम्बरीषः पुमान् भ्राष्ट्रमिति कोशान्तरम्) शब्द्यते जनैरिति राजा च। उषेर्नुक् चेति भोजः। ओषति दीप्यते शोभत इत्युष्णीषम्।

॥ कॄपॄशॄगॄकटिपटिशौटिभ्य ईरन् ॥ ३० ॥

(गॄ इत्यन्यैर्न पठ्यते।)

कीर्यते क्रमाद् विस्तीर्यते करीरं वंशाङ्कुरः। परीरं फलम्। शीर्यते शरीरम्। गरीरः पर्वतः। आव्रियते कटीरं कटी। गम्यते जनैः पटीरः। शौटीरो गर्ववान्। मञ्जिकुटि पूङ्भ्यश्च भोजः। मञ्जीरम्। बाहुलकादङित्त्वम्। कोटीरो मौलिः। पवीर बोजावपनम्।

॥ वशः कित् ॥ ३१ ॥

कित्वादुत्त्वम्। काम्यत उशीरम्। कुलेश्च भोजः। सङ्घातत्वेन जायते। कुली(ळी)रः।

॥ कशेर्मुट् च ॥ ३२ ॥

गच्छन्त्यत्र कश्मीरो देशः।

॥ कृञ उच्च ॥ ३३ ॥

कुरीरं मैथुनम्।

॥ घसेश्चिच्च ॥ ३४ ॥

घसेरीरः किच्च चिच्च स्यात्। कित्वात् गमहनेत्युपधालोपः। षत्वचर्त्वे। अद्यते क्षीरम्।

CC-0. In Public Domain. Digitization by eGangotri

गभीरगम्भीरौ ॥ ३५ ॥

कृच्छ्रेण गाह्यते गभीरः। गम्भीरः। डिण्डीरवानीराभीर कुम्भीर कीर जम्बीरकिर्म्मीरादयश्च भोजोक्ताः। जले गच्छति डिण्डीरः फेनः। वन्यते सेव्यते भृङ्गादिभिर्वानीरो वेतसः। आप्यते गव्यार्थिभिराभीरः। कुम्भिर्धारणार्थः। धारयन् गच्छति जन्तून् कुम्भीरो नक्रः। कैशब्दे कीरः। जम्यते भक्ष्यते जम्बीरः। कीर्यते नाना भवति किर्म्मीरो नानावर्णः। आद्युक्तेस्तूण्यते पूर्यते शरैस्तूणीरः। नासृ शब्दे ध्वनति नासीरम्। करेण वीयते प्राप्यते करवीरम्।

॥ विसाविहा ॥ ३६ ॥

विसा विसखण्डः। विहा विरागः। एते अव्यये इति तद्वृत्तिः।

॥ पच एळिमच् ॥ ३७ ॥

पचेळिमो माषः।

॥ भिदेः किच्च ॥ ३८ ॥

[नैतदन्यत्र दृश्यते।] भिदेळिमं काष्ठम्। अस्य चित्त्वात् केळिमरो भेदः।

॥ शीङस्थुग्लग् वालञ् वलञः ॥ ३९ ॥

शेरतेऽनेन पीतेन शीघुः। शीङो धुगिति पाठे शीधुः। हृद्यत्वात् परहृदयेषु शेते शीलम्। शेते जले शैवालं, शैवलं च। वलन् प्रत्ययेन शेवलमित्यन्ये।

॥ मृकणिभ्यामूको कणौ ॥ ४० ॥

मरूको मयूरः। काणूकः श्रेष्ठः।

॥ वल्ल ऊकः ॥ ४१ ॥

वल्लूकः पक्षी। वलूक इति क्वचिन्निपात्यते। (बलेरूक इत्यन्ये) तदुत्पलनाम।

CC-0. In Public Domain. Digitization by eGangotri

उलूकादयश्च ॥ ४२ ॥

उचेर्लत्वम् । समवैति सदा स्त्रियेत्युलूकः । अत्र भोजः । कणिज लवलिबन्धिभल्लिभ्य ऊकः । कणूको धान्यस्तोकः । अतीक्ष्णत्वाज्जलू (ळू) का । बध्यते स्रजि बन्धूकः । भल्ल परिभाषणे । शब्दं करोति भल्लूकः कपिः । मधूकोरुबूकशम्बूकपरूकादयः । ऊरुबूको हिरण्यम् । शम्बूकः क्षुद्रशङ्खः । परूकस्तृणभेदः । आद्युक्तेर्मलूकः कृमिजातिः इति ॥

॥ शलिमण्डिभ्यामूकण् ॥ ४३ ॥

शल्यते जलमग्नत्वात् कृच्छ्रेण प्राप्यते शालूकमुत्पलादिकन्दम् । मण्ड्यते रेखाभिर्मण्डूकः ।

॥ नियोमिः ॥ ४४ ॥

नीयते रथोऽनया नेमिः ।

॥ अर्तेरू च ॥ ४५ ॥

रपर ऊः । तटं गच्छत्यूर्मिः ।

॥ अशेरश च ॥ ४६ ॥

अश्नुते व्याप्नोति रश्मिः ।

॥ भुवः कित् ॥ ४७ ॥

भवन्त्यस्यां भूमिः ।

॥ दल् मिः ॥ ४८ ॥

दलयति भूमिं दल्मिशङ्कुः ।

॥ वीज्यात्व (ज्व) रिभ्यो निः ॥ ४९ ॥

बाहुलकाण्णत्वम् । गच्छति वेणिः प्रवाहः । कान्तिमत्वात् केशश्च । ज्यानिः । अनुनासिके परे ज्वरत्वरेत्यूठ् । तू (जू) र्णिरादित्यः ।

॥ सृवृषिभ्यां कित् ॥ ५० ॥

CC-0. In Public Domain. Digitization by eGangotri

सरत्यनया गजस्सृणिरङ्कुशः। वर्षत्यभीष्टं वृष्णिः। घोश्च भोजः। कम्पमाना गच्छति धुनिर्नदी।

॥ अङ्गेर्नलोपश्च ॥ ५१ ॥

देवानां पुरस्तादङ्गत्यग्निः।

॥ वह्निश्रिश्रुयुग्लाहात्वरिभ्यो नित् ॥ ५२ ॥

[द्रुमप्यन्ये योः पश्चाद्योजयन्ति ।]

वहति हविर्वह्निः। श्रयन्त्येनां श्रेणिः। श्रूयते न तु दृश्यते वस्त्रच्छन्नत्वाच्छ्रोणिः। युवन्ति सङ्गच्छन्तेऽत्र योनिः। ग्लानिहानी- नित् स्वरार्थमुक्ते। तूर्णिरश्वोमनश्च। क्षोश्च भोजः। क्षोणिः। शाशीङोर्ह्रस्वश्चेतिच । तनूकरोति सुखं शनिः। शिनिर्यादवः।

॥ घृणिपृश्निपार्ष्णिभूर्णिचूर्णि ॥ ५३ ॥

घृक्ष रणदीप्त्योः। दीप्यते घृणिः। पृच्छ्यते समूहगतः पृश्नि- रल्पतनुः। पारयति कर्मसु पार्ष्णिः। भूर्णिर्धरणिः। चूर्णिर्ग्रन्थः।

॥ पृॠद्ॠभ्यां विन् ॥ ५४ ॥

पर्विश्शकटम्। (वृदृभ्यामिति पठित्वा र्वविर्घस्मर इत्यन्ये) दर्विः प्राङ् निपातनात् [३-८३] विफला।

॥ जॄशॄस्ॄजागृभ्यः क्विन् ॥ ५५ ॥

ॠत इत्। हलि च। जीर्विर्वृद्धः। शीर्विर्हिंस्रः। स्तीर्वी रुचिरः। अविचिण् णल् ङित्स्विति गुणाभावः। जागृविर्विनिद्रः।

॥ दिवो द्वे दीर्घश्चाभ्यासस्य ॥ ५६ ॥

दीदिविस्स्वर्गोऽन्नं च।

॥ कृवि घृष्वि च्छवि स्थवि दिवि किकादिवि ॥ ५७ ॥

कृविस्तन्तुवायः। घृष्विर्वराहः। "वराहः सूकरो घृष्विः" इति पाठ इति वृत्तौ। छिनत्ति तिमिरं छविः। स्थविस्तु- सवायः। दिविर्धर्मशीलः। दविरित्यन्ये। (अन्ये तु दिविं वा दविं

CC-0. In Public Domain. Digitization by eGangotri

वा न पठन्ति।) किकी इत्युक्त्वा क्रीडति, गच्छति वा। किकीदिविः पक्षिः। अटविश्शिवि [बि] श्च भोजोक्तौ।

॥ पातेर्डतिः ॥ ५८ ॥

रक्षति पतिः।

॥ शकेर्ऋतिन् ॥ ५९ ॥

इनावितौ। शक्नोत्यनेन देहश्शकृत्। यजेः कश्चेति भोजः। यकृन्मांसभेदः।

॥ अमेरतिः ॥ ६० ॥

अमतिर्मार्गः। योः कित् भोजोक्तः। यौति पुंसा युवतिः स्त्रीमात्रन्। [यूनस्तिरिति निष्पन्नस्य तरुण्यर्थत्वमेवेति भावः।]

॥ वहिवस्यर्तिभ्यश्चित् ॥ ६१ ॥

वहतिर्गौः। वसतिः। अरतिः क्रोधः। खलेश्च भोजः। खलतिर्गतकेशः।

॥ अञ्चेः को वा ॥ ६२ ॥

अङ्कतिर्वायुः। अञ्चतिरग्निः। (द्वावपि वाय्वर्थावित्यन्ये।)

॥ हन्तेरंह च ॥ ६३ ॥

अंहतिर्मृगः। ("अपवर्जनमंहतिः" इति कोशात् दानार्थत्वमपि।)

वृञो व्रत चेति भोजः। आवृणोति भुवं व्रततिर्लता।

॥ रमेर्नित् ॥ ६४ ॥

रमतिस्स्वर्गः।

॥ षूङः क्रिः ॥ ६५ ॥

सूते वाचस्सूरिः।

॥ आदिशदिभूशुभिभ्यः क्रिन् ॥ ६६ ॥

अदन्ति मृगादयो अत्रेत्यद्रिः। शाद्रिर्हस्ती। भूरि [प्रभूतं सुवर्णं च] शुभ्रिर्ब्रह्मा।

CC-0. In Public Domain. Digitization by eGangotri

॥ वङ्क्र्यादयश्च ॥ ६७ ॥

वकि कौटिल्ये। वङ्क्रिः पार्श्वास्थि। अङ्घति गच्छत्यङ्घ्रिः। अभ्रिः खननशङ्कुः। विभ्रिर्मृत्युः। कुद्रिस्समुद्रः।

॥ राशदिभ्यां त्रिः ॥ ६८ ॥

राति सुखं भयं वा रात्रिः। शत्रिर्गजः।

॥ अदेस्त्रिन् ॥ ६९ ॥

फलाद्यत्तीत्यत्त्रिः।

॥ पतेरत्रिन् ॥ ७० ॥

पतत्रिः पक्षी।

॥ मृकणिभ्यामीचिः ॥ ७१ ॥

तापान्म्रियन्तेऽत्र मरीचिः। कणीचिर्लता। अविदधिभ्यां च भोजः। अवीचिर्नरकभेदः। दधीचिः ऋषिः।

॥ वेञो डित् ॥ ७२ ॥

तन्तुवानवत् सन्ततो भवति वीचिः।

॥ श्वयतेश्चित् ॥ ७३ ॥

श्वयीचिश्चन्द्रः।

॥ ऋहनिभ्यामू [मु] षन् ॥ ७४ ॥

अरू(रु)षो व्रणः। हनूषो राक्षसः।

॥ पुरः कुषन् ॥ ७५ ॥

पृऋधातोः कुषन्। उदोष्ठ्यपूर्वस्य। देहं विश्वं वा पृणाति, पालयति, पूरयति वा पुरुषः।

॥ विदि पूरोश्च ॥ ७६ ॥

विदुषो विद्वान्। पूरुषः। (नैतदन्यत्रोपलभ्यते)।

॥ पृकलिभ्यामुषन् ॥ ७७ ॥

पृ प्रोता। वैरतोत्यात् परुषम्। कल्यते बध्यते पङ्कैः

CC-0. In Public Domain. Digitization by eGangotri

कलुषम्। कलिपहृपिभ्यां च भोजः। कल्पुषः क्रियानुगुणः। हपुष ओषधिः।

॥ नहि कलि हनि लसिभ्य उषच्॥ ७८॥

(अन्ये त्वेतन्न पठन्ति। पूर्वसूत्रस्थाने च पृनहिकलिभ्य उषजिति पठन्ति।) नहुषः। कलुषहनुषौ स्वरान्तरार्थमुक्तौ। (७४ ऋहनिभ्यामुषन्निति पाठाभ्युपगमादेव मुक्तम्। ग्रन्थान्तरेषु दीर्घपाठ उपलभ्यते। स एव च न्याय्यः। ह्रस्वपाठे हि ७७–पृकलिभ्यामुषन्निति सूत्रपृथक्करणानर्थक्यम्।)

॥ लसुषो लसन्। पीये रूषन्॥ ७९॥

पीयतिस्सौत्रः पानार्थः। पीयूषम्।

॥ मूज्योर्लोपश्च ॥ ८०॥

अनयोरूषन्नन्त्यलोपश्च। मूषा लोहद्रावणपात्रम्। जूषः पेयविशेषः। (अन्यैस्त्वेतन्न पठ्यते)।

॥ मस्जेर्नुम् च ॥ ८१॥

सात् पूर्वं नुमि कृते सस्य जश्त्वे चुत्वे झरो झरि। मज्जन्त्यन्तर्भवन्त्यत्र वस्तूनि मञ्जूषा। (इतः परं अर्तेररुरित्यतः प्राग्गण्डेश्चेत्येवाऽन्ये।)

॥ अङ्गूषः॥ ८२॥

एष बाणार्थोऽजगरार्थश्च। जॄपॄकृहनि गण्डिभ्योऽप्यूषन् भोजोक्तः। जरूषस्सूर्यः। परूषो वृक्षः। करूषो नृपो, जनपदश्च। हनूषो राक्षसः। गण्डूषः। यूषशूषार्कलूषकारूषकोरदूषाटरूषशैलूषादय इति च। यूषः पेयभेदः। शूषो बलम्। अर्कलूष ऋषिः। कारूषा जनपदः। कोरदूषआटरूषश्चोद्भिद्भेदौ। आद्युक्तेः प्रत्यूषादि।

॥ अर्तेररुः॥ ८३॥

अररुर्दैत्यः।

CC-0. In Public Domain. Digitization by eGangotri

॥ कुटः कित् ॥ ८४ ॥

कुटरुः पक्षिभेदः । कुटेर्ङित्त्वेन सिद्धेऽपि यदयं किद्ग्रहः कृतः । तेन कोटरकोटोराद्युणादौ ज्ञापितो गुणः ॥ १ ॥

॥ शकादिभ्योऽटच् ॥ ८५ ॥

अत्र भोजः । कृ सृवृकलिमशकिकङ्किकर्किमर्क्यविभ्योऽटच् । करटः काकः । सरटः कृकलासः । वरटा हंसी । कलमटः क्षुद्रपत्तनम् । शक्नोत्यनेन गन्तुं शकटः । कङ्कटः । कर्कटः । मर्कटः । अवत्यस्मात् पतनभियेत्यवटः । कीकट कपट कर्पटादयः । कीकटो मगधदेशः । कम्यतेऽनेन परद्रव्यं कपटम् । कर्पटम् वस्त्रम् । आद्युक्तेः पर्पटो भक्ष्यभेदः । देवटश्शिल्पिभेदः । कमटो वानरः । इति ।

॥ अर्तिशॄभ्यामटुच् ॥ ८६ ॥

अरटुश्शरटुश्च हिंस्रः ।

(नान्यत्रैतद् दृश्यते ।)

अवेश्च भोजोक्तः । अवटुः कण्ठपश्चाद्भागः ।

॥ कॄकलिकटिकडिभ्योऽम्बच् ॥ ८७ ॥

सङ्कीर्यते करम्बस्सम्मिश्रः । कल विक्षेपे । कल(ळ)म्बश्शरः । कटम्बो वृक्षः । कडम्बो धान्यभेदः ।

॥ कदेर्णिद्वा ॥ ८८ ॥

कद्यते पीड्यते वर्षेणाऽवर्षेण च कादम्बो हंसः, कदम्बो वृक्षः । सङ्घर्षेण पीड्यत इति समूहोऽपि । (अन्ये तु कॄकदित्यादि पठित्वा कदेर्णित् पक्षिणीति पठन्ति ।)

॥ कर्दिकलोरमः ॥ ८९ ॥

पादक्षेपे कुत्सितशब्दं करोति कर्दमः । क्षिप्यते भूमौ कल(ळ)मः । सर्तेश्च भोजः । सरमा शुनी ।

॥ कुणिपुलोः किन्दच् ॥ ९० ॥

CC-0. In Public Domain. Digitization by eGangotri

कुणिन्दो वृषलः। पुल महत्त्वे। स्थूलो भवाते पुलि(ळि)न्दः। किरातः। अलिकलिभ्यां च भोजोक्तः। भूष्यते पुष्पाद्यैरलि(ळ)न्दः। ध्वनन्ति मृगादयोऽत्र कलि[ळि]न्दो गिरिः।

॥ कुवश्च ॥ ९१ ॥

कुविन्दस्तुन्नवायः। (अन्ये तु कुपेर्वाविश्चेति पठित्वा कुपिन्दः, कुविन्द इति रूपद्वयमुदाहरन्ति।)

॥ नौषज्जेर्घथिन् ॥ ९२ ॥

घित्वाच्च जोः कुः। निषङ्गथिर्धनुर्धरः।

॥ उद्यर्तेश्चित् ॥ ९३ ॥

उदरथिस्समुद्रः।

॥ सर्तेर्णित् ॥ ९४ ॥

सारयति प्रेरयत्यश्वादिकं सारथिः।

॥ खर्जिपिञ्जादिभ्यामूरोलचौ ॥ ॥ ९५॥

अत्र भोजः। खर्जिखडिकृपिवल्लिमयिमण्डिभ्य ऊरः। खर्जूरस्तरुः। खडू(ळू)रः खुरळीरुथानम्। गौरादित्वात् खडू(ळ्)री। कल्पते शक्नोति सुरभीकर्तुं कर्पूरः। बाहुलकात् कृपो रोलाभावः। वल्लूरं मांसम्। मयते गच्छति वने मयूरः। मण्डूरः कल्कभेदः। तलिमलिशलिभ्यो णित्। तालूरो जलावर्तः। धार्यते श्रीकामैर्मालूरो विल्वः। गच्छति शालूरो भेकः। विडूरसिन्दूरपत्तूरधुस्तूरधुर्तू(धू)रादयः। स्यन्दनं कृत्वा निर्मितत्वात् सिन्दूरम्। पत्तूरं गन्धद्रव्यम्। अन्त्यावुन्मत्तकाख्ये। आद्युक्तेः कस्तूरी। मार्जूरस्सुवर्णशोधकः। मसेरूरन्। मसूरो धान्यभेदः। कृञश्चुट् च। लघूपध गुणः। कर्चूर ओषधिः। इति। पिञ्जातिस्तु पिञ्जूलो हस्तिबन्धनपाशः। कलूलं बदरविकारः। मव बन्धने। मवूलो हस्ती। कुकूलदुकूलबल्बूललाङ्गूलादयश्च भोजोक्ता।

CC-0. In Public Domain. Digitization by eGangotri

कौत्युण्णाद्रोदित्यनेन कुकूलस्तुषाग्निः। दुगतौ। प्राप्यते धन्यैः दुकूलम्। बल्बूलस्तरुः। लङ्गति चलति लाङ्गूलम्। शृणातेर्दुक् दीर्घश्च। ऊलच्च स्यात्। गुणे कृते दीर्घः। हिनस्ति शार्दूलः। तमेर्बुक् च। दीर्घश्च। तम्यते काङ्क्ष्यते ताम्बूलम्।

॥ कुवश्चट् दीर्घश्च ॥ ९६ ॥

कूचो हस्ती। टित्त्वात् कूची प्रमदा।

॥ समीणः ॥ ९७ ॥

चट् दीर्घश्च। समीचश्चन्द्रः।

॥ सिवेष्टेरू च ॥ ९८ ॥

टित्त्वात् सूची। सूचयतेरचइरिति सूचिरपि। कृञश्चेति भोजः। कृञश्चट् स्याट्टेरूत्वं च। रपरत्वात् कूर्चं श्मश्रु। टित्त्वात् कूर्ची।

॥ शमेर्बन् ॥ ९९ ॥

शमयत्यरीञ्छम्बो वज्रम्। नितमेश्च भोजः। नितरां ताम्यते काङ्क्ष्यते नितम्बः। रत्या ग्लायति वा।

॥ उल्बादयश्च ॥ १०० ॥

अत्र भोजः। अलिशलोरत उच्च। उल्बं गर्भवेष्टनम्। शुल्वं ताम्रं रज्जुश्च अमेर्णिद्वा। गम्यते बालैरम्बा। आम्बोऽपह्नवः। निम्बबिम्बडिम्बहिडिम्बसाम्बादयश्च। डिम्बो व्यसनम्। आद्युक्तेः। कुशाम्बो नृपः। इति।

॥ स्थस्स्तोऽम्बजबकचौ ॥ १०१ ॥

स्थाधातोस्स्त इत्यादेशः, अम्बच् अबकच् इति प्रत्ययौ च स्तः। स्तम्बः स्तबकः।

॥ हृसृस्यां क्वनिप् ॥ १०२ ॥

हृत्वा मत्स्यहन्ता। सृत्वा भीरुः। स्त्रियां हृत्वरी सृत्वरी। (वनोरचेति ङीब्रश्च।)

CC-0. In Public Domain. Digitization by eGangotri

॥ सृजेरम् च ॥ १०३ ॥

स्रज्वा ब्रह्मा, पटश्च। (अन्यैस्त्वेतत् सूत्रद्वयं न पठ्यते)

॥ शाशपिभ्यां ददनौ ॥ १०४ ॥

आतपेन तनूक्रियते शादः षङ्कः, तृणं च। शब्दः।

॥ अब्दादयश्च ॥ १०५ ॥

आप्नोति भावानित्यब्दो वत्सरः। अत्र भोजः। गुवः कित्। गुदम्। वृतुकुतुभ्यो नुम् च। आवृणोति वृन्दम्। वर्धते तुन्दमुदरम्। सुन्दोऽसुरः। कुवन्त्यत्र भृङ्गाः कुन्दः। इति ।

॥ वलिमलितनिभ्यः कयन् ॥ १०६ ॥

वलति संवृणोति प्रकोष्ठं वलयः। धारयति चन्दनादीन् मलयः। तनोति कुलं तनयः।

॥ वृह्रोष्षुग्दुकौ च ॥ १०७ ॥

वृषयश्श्रेष्ठः। ह्रियते विषयैर्हृदयम्। किसलयगयगवयमुकय केकयादय इति भोजः। कसत्युद्गच्छति, विकसति वा किसलयम्। गच्छति जानाति धर्मं गयःऋषिः। गम्यते गया। गवयमुकयौ मृगभेदौ। केतति निवसत्यत्र केकयो जनपदः।

॥ मा पोरुरीच् ॥ १०८ ॥

मापाभ्यां रुरन्त्यस्येत्त्वं च। मीयते सूर्येण, नमीयते वा मेरुः। मान्ति देवा अत्र वा। पाति जले पेरुर्नौः।

(मिपीभ्यां रुरित्यन्ये)

॥ जत्र्वादयश्च ॥ १०९ ॥

जत्रु शरीरावयवः। गत्रुर्गमनशीलः। शेरुस्स्वापशीलः। शिग्रुः। पूरुः।

॥ रुशतिभ्यां क्रुन् ॥ ११० ॥

रौति रुरुः। शत्रुः। शतिस्सौत्रः। शातयति शत्रुरिति जत्र्वादितयाऽपि सिद्धिः।

CC-0. In Public Domain. Digitization by eGangotri

॥ कुसे रूलोम्भोण्डोमेदेताः किच्च ॥ १११ ॥

कुसेः ऊल, उम्भ उण्ड, उम, ईद इत इत्येते कितस्स्युः। संश्लिष्यति व्रीह्याद्यत्र कुसूलम्। संश्लिष्यति वस्त्रादिभिः कुसुम्भः। कुसुण्डः (?) श्लिष्यति मालादौ कुसुमम्। संश्लिष्यति मूलधनेन कुसीदं वृद्धिः। कुसित ऋषिः। (अन्ये तु सूत्रद्वितयात् परतः कुसेरुम्भोमेदेता इति पठन्ति।)

॥ जनिदाच्युसृवृमदिशमिशमिनमिभृञ्भ्य इत्वन् त्वन् क्वनन् क्निन् शक् छक् खठक् टगटचः ॥ ११२ ॥

जन्यादिभ्यः क्रमादित्वनादयस्स्युः। जनित्वं लोकः। दाधातोस्त्वन्। दात्वो यज्वा। च्युधातोः क्वनन्। द्विककारयोगात् कित्त्वम्। च्युक्नः क्षीणपुण्यः। च्योक्ना च्योक्ता दा रात्रिरिति क्वचिद् वृत्तौ। सृधातोः क्निन्। सृणिरिन्द्रः। पूर्वं त्वङ्कुश उक्तः। वृञश्शक्। वृशं शृङ्गवेरम्। मदेश्छक्। मच्छो मत्स्यः। (मदेस्स्य इत्यन्ये।) शमेः खः। शाम्यत्यनेन पापं पावनत्वाच्छङ्खः। पुनश्शमेरेव ठक्। शमेरनुदात्तोपदेशत्वाभावेऽपि बाहुलकात् किति मलोपः। शठः। (अन्ये तु शमिं, अपरे च षमिं, एकमेव पठित्वा क्रमात् ठे डे च शण्ठोऽकृतदारः षण्डः क्लीब इत्याहुः।) नमेष्टक्। अनुदात्तोपदेशत्वान्मलोपः। नमति सर्वान् नटः। भृञोऽटच्। भ्रियते भरटो भृत्यः।

॥ अन्येभ्योपि दृश्यन्ते ॥ ११३ ॥

इत्वनादयोऽन्यधातुभ्योऽपि दृश्यन्ते पाधातोरित्वन्। आत् गुणः। पेत्वो मेषः। णोञस्त्वन्। गुणः। नेत्रः। प्यायी। प्यात्वो ब्राह्मणः। होत्वो यजमानः। शगादि विस्तरस्तु भोजोक्तित्तो ग्राह्यः। (अथ स एव प्रदर्श्यते।) भृवम्यमिकुभ्यश्शक्। भृशम्। वंशः। अंशः। कुशः। गु गम्यमितुदिमदिभ्यश्छक्। गवन्ते भृङ्गा अत्र गुच्छः। कित्त्वादनुदात्तोपदेशेति मलोपः। गच्छो गतसंख्या।

CC-0. In Public Domain. Digitization by eGangotri

अच्छः। तुदति व्यथयत्यपर्याप्तत्वात्तुच्छः। पूङ् पीङोर्ह्रस्वश्च। पुच्छम्। पिच्छं बर्हिः। कच्छगुळुच्छपिलिपिञ्छादयः। पिलिपिञ्छो राक्षसः। आद्युक्तेः पिञ्छः। शमिमनिभ्यां खः। मङ्खो मागधः। निय ऊक्। (प्रत्ययस्य नुट् (?)) च। यण्। नस्यानुस्वारपर सवर्णौ। न्यूङ्खः। पुवोनुम् ह्रस्वश्च। पुङ्खः। अश्नोतेर्डित्। डित्वात् सर्वलोपः। व्याप्तत्वात् खम्। मयेरूक् च। मयते सर्वत्र प्रसरति मयूखः। पीङे कुणिभ्यां ठगुक्तः। पीठम्। कुण्ठः। एते भोजोक्ताः। टकि तु वनति तनोत्योः कित्वान्न लोपः। प्रार्थ्यते छायार्थिभिर्वटः। विस्तृतत्वात्तटः। भोजस्तु जुकिजनिपणिभ्यो दीर्घश्च। टश्च स्यात्। जूटो मौलिः। कीटः। जाण्टपाण्टौ पक्षिणौ। घण्टाजटासटादयः। आद्युक्तेश्छटा। इति। अटजिस्तरस्तु शकादिभ्योऽटजित्यत्रोक्तः।

॥ मूशक्यम्बिभ्यः क्लः॥ ११३ ॥

बध्यते भूमौ मूलम्। शक्लः प्रियंवदः। इदित्वान्नलोपाभावः। अम्बते रोदिति क्रौर्यादम्ब्लो रस भेदः। भोजस्त्वाच। स्याशक्यमिभ्यो लः स्यालः। अम्ल इत्येतन्मते। भिल्लाच्छभल्लसौविदल्लादयः। भिनत्ति मृगान् भिल्लश्शबरः। अच्छभल्लः कपिभेदः। सूत्रा वृद्धिः। सुष्ठु वेत्ति सौविदल्लः कञ्चुकी। आद्युक्तेर्भनक्ति भल्लः इति

॥ सानसि व (स) र्णसि पर्णसि तण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः। ॥ ११४ ॥

सानसिर्हिरण्यम्। व(स)र्णसिर्जलम्। पर्णसिर्जलगृहम्। अञ्चत्यनेन गज इत्यङ्कुशः। चषालो यूपाङ्गम्। इल्वलोऽसुरः। (तारकाभेदश्च।) पालयति मृगान् पल्वलम्। तुल्वलो मुनिर्भोजोक्तः। धिष्ण्यं स्थानम्। शलति गच्छति देहे शल्यम्। [एतत् सूत्रद्वयस्य पौर्वापर्यव्यत्ययोऽन्यत्र दृश्यते।)

CC-0. In Public Domain. Digitization by eGangotri

॥ मा छा ससिसूभ्यो यः ॥ ११५ ॥

न मीयते न ज्ञायते माया। छिनत्यातपं छाया। छिनत्यन्धकारमिति शोभाऽपि। ससस्वप्ने। सेकाभावे स्वप्नमिवालस्यं प्राप्नोतीति सस्यम्। गुणे - धातोस्तन्निमित्तस्येत्यव्। सव्यम्।

॥ जनेर्यक् ॥ ११६ ॥

जन् य ये विभाषेत्यात्वं वा। स्वयं पुत्ररूपेण जायतेऽस्यामिति जाया। जन्यं युद्धम्।

॥ जघ्न्यादयश्च ॥ ११७ ॥

न हन्तव्येत्यघ्न्या गौः। अत्र भोजः। कलिगलिकनिबन्धिभ्यश्च। यस्स्यात्। क्षिपति जहाति रोगान् कल्यः। पल्यं कटकुसूलम्, करिणां भोजनं वा। कान्तिमत्त्वात् कन्यां बध्नाति प्रतिहन्ति फलं ब(व)न्धरः। सृजेर्यश्च। सजतोऽस्यां रात्र्यहनी सन्ध्या। सम् पूर्वस्य ध्यायतेराल्लोप इति वृत्तौ। तत्र हलो यमामिति यलोपः। सम्यग्ध्यायन्त्यस्यामिति सन्ध्या। जनिपुणिकृतिभ्यः क्याप्। पुणकर्मणि शुभे। पुण्यम्। कृन्तति कृत्या पिशाचः। मध्यविन्ध्यान्यहर्म्यपस्त्यागस्त्यपुलस्त्यापत्यसत्यकुड्यकुल्याहल्यादयः। विधति करोति भीतिं विन्ध्यः। [विध विधाने—तौदादिकः।] हरति चित्तं हर्म्यम्। वसेरादिपत्वं तुट् चेति नाथः। पस्त्यं गृहम्। वस्त्यमिति स्वाम्यादयः। न पतन्त्यनेनाऽपत्यम्। कोलति संस्त्यायति जलं मृत्तिका चात्र कुड्यं कुल्या। आद्युक्तेस्सह्योऽद्रिः। मर्त्यः। इति।

॥ स्नामदिपद्यर्तिपॄऋशकिभ्यो वनिप् ॥ ११८ ॥

इपावितौ। स्नावा स्नायुः। मद्वा तृप्तः। पद्वा पादः। गच्छत्यर्वाऽश्वः। पूर्यते सिराभिः पर्व। शक्वा तक्षा। स्त्रियां वनोरचेति ङीब्रौ। शक्वरी छन्दः।

॥ शीङ् क्रुशि रुहि जिक्षि सृधृभ्यः क्वनिप् ॥ ११९ ॥

CC-0. In Public Domain. Digitization by eGangotri

शीवाऽजगरः। बाहुलकाद्ध्रस्वेन शिवा क्रोष्टेति क्वचिद्वृत्तौ। कुश्चाक्रोष्टा। रुह्वा वृक्षः। जित्वा शत्रुः। क्षित्वा मृत्युः। सृत्वा कालः। धृत्वा विष्णुः। हृवृभ्यां च भोजः। हृत्वा रुद्रः। वृत्वाऽऽकाशः। सृजेः कश्चेति च। सृक्व ओष्ठ-प्रान्तः।

॥ ध्याप्योस्सम्प्रसारणं च ॥ १२० ॥

हल इति दीर्घः। धीवा मनीषी। पीवा स्थूलः।

॥ अतेर्धश्च ॥ १२१ ॥

अतन्त्यत्रेत्यध्वा। (अदेरित्यन्ये।)

॥ प्रईरिसद्योस्तुट् च ॥ १२२ ॥

प्रेत्वा सागरः। प्रसत्त्वा धर्मः। (ईरिशद्योरित्यन्ये।)

॥ इन् सर्वधातुभ्यः ॥ १२३ ॥

यतते मुक्त्यै यतिः। यजिर्यजमानः। वन्तिर्हठहृता स्त्री। पुनर्ज्ञीषि वन्दी। हल विलेखने। हलिर्महद्धलम्। क्षिपन्त्यन्योन्य-मत्रेति कलिः। किल क्रीडने। केलिः(ळिः)। आव्रियते कटित्रुटेर्ण्यर्थवृत्तेस्त्रोटिश्चञ्चुः। कोटिः। भूषयति मञ्जरीमलिः (ळिः)। पटिर्गुलिका। इत्यादि।

॥ पचिपठिकाशिनन्दिभ्य इन् ॥ १२४ ॥

(नैतदन्ये पठन्ति।) सत्सूद्विषादिवत् पूर्वस्य प्रपञ्चोऽयम्। पचिरग्निः। पठिर्विद्वान्। प्रकाशते शिवोऽत्र काशिर्वाराणसी। नन्दिर्वृषः।

॥ हृपिशिरुहिवृतिविदिकीर्तिभ्यश्च ॥ १२५ ॥

हरति पापं, मृगान् वा हरिः। पेशिर्मांसभेदः। (पिषीति पठित्वा पेषिर्वज्रमित्यन्ये।) रोहिर्वृक्षभेदः। वृत्यते हस्तेन वर्तिर्दशा। वेदिः। कीर्तिः। (विदेः पश्चाच्छिदिमप्यन्ये पठन्ति।)

CC-0. In Public Domain. Digitization by eGangotri

॥ इगुपधात् कित् ॥ १२६ ॥

इन् कित् स्यात्। शुचिः। ऋषी गतौ। जानात्यृषिः। 'वौ रिचेर्नृम् च' इति **भोजः**। विरिङ्क्ते सूते लोकान् विरिञ्चिर्ब्रह्मा।

॥ भ्रमेः सम्प्रसारणं च ॥ १२७ ॥

भृमिश्चलनम्।

॥ क्रमितमिनमिस्तम्भामत इच्च* ॥ १२८ ॥

इन् किच्च स्यात्। क्रामति क्रिमिः। ताम्यन्त्यनेनान्ये तिमिः। निमिर्नृपः। कित्त्वान्नलोपः। स्तिभिः केतकादिसूचिः।

॥ मनेरुच्च ॥ १२९ ॥

जानाति मुनिः।

॥ वलेर्वल्लि चाऽहिरण्ये ॥ १३० ॥

वलेरिन् कित्स्यादहिरण्ये वल्ल्यादेशश्च। वल्लिर्लता। वलिर्हिरण्यम्। अहिरण्य इत्युपलक्षणम्। तेन दानवादावपि बलिर्वलिश्च★।

॥ वसिवपियजिराजिध्रजिध्वजिसदिहनिकमिवाशिवदिवृभ्य इञ् ॥ १३१ ॥

वसन्त्यनेन तक्षका वासिस्तक्षणसाधनम्। उप्यते जलमस्मिन् वापिः सरः। याजिर्यजमानः। एकरूपत्वाद् राजते राजिः। ध्राजिः पद्धतिः। ध्वाजिः पताका✪। सीदत्यास्तेऽश्वे सादिरश्वारोहः। ञित्त्वात् तत्वघत्वे। घातिरस्त्रभेदः। कामिः कामुकः⊕।

* 'नमिस्थाने शकीत्यन्ये' के.

★ 'वर्णेर्वलिश्चाऽहिरण्य इत्यन्ये' के.

✪ 'ध्रजिध्वज्योः स्थाने व्रजीति पठित्वा व्राजिर्वाताळिरित्यन्ये'। के

⊗ 'कमिरन्यैर्न पठ्यते' के.

CC-0. In Public Domain. Digitization by eGangotri

वाशिर्झिल्लिका। वादिर्वक्ता। व्रियते सर्वैर्वारि जलम्#। शकृवमिफलिसम्पतिभ्यश्च भोजः। [1]शृणात्यन्योन्यं शारिर्द्यूतोपकरणम्। वामिः स्त्री। फालिः दलम्। सम्पातिः पक्षी।

॥ नहो भ च ॥ १३२ ॥

नह्यन्तेऽत्र सिरामुखानि नाभिः।

॥ कृषेर्वृद्धिश्छन्दसि ॥ १३३ ॥

कार्षिः शशी समुद्रश्च★।

॥ श्रः शकुनौ ॥ १३४ ॥

शारिः शुकी। द्यूते तु शारिर्भोजोक्तः।

॥ कृञ उदीचाम्⊕ ॥ १३५ ॥

कारिस्तक्षादिः। प्राचां मते तु 'अच इः' (१४५) इति वक्ष्यमाण इः। करिर्विष्णुः।

॥ जनिघसिभ्यामिण् ॥ १३६ ॥

'जनिवध्योश्च' (७-३-३२) इति वृद्ध्यभावाज्जनिर्वधूः। इह णित्सु योजनसामर्थ्याद् वृद्ध्या जानिरिति केचित्। घासिर्भक्ष्यम्। 'अलिशलिपलितलिजम्यणिभ्यश्च' भोजः। अलति भूषयत्यालिः (ळिः) सखी। जलं वारयतीति सेतुश्च। तत्तुल्यत्वात् पङ्क्तिश्च। शल्यते प्राप्यतेऽर्थिभिः शालिः। पल्यते गम्यते बहुभिः पालिः(ळिः) समूहः। तलति प्रतितिष्ठति वक्षसि तालिराभरणम्। जमति

1. शृणोत्य' (?) घ.

'अन्ये तु वदिवृञौ ण्यन्तौ पठन्ति'। के.

★ 'लोके तु कृषिः' के.

⊗ 'सूत्रान्ते कारुष्वित्यपि योजयन्त्यन्ये'। के.

CC-0. In Public Domain. Digitization by eGangotri

भुङ्क्ते भ्रातुः स्वं जामिः स्वसा। अणति ध्वन[1]ति खननकाल आणिः कीलः।

॥ अज्यतिभ्यां च ॥ १३७ ॥

इण् स्यात्। गच्छन्त्यत्र योद्धारो, मिथः क्षिपन्ति वा आजिः। आतिः पक्षी।

॥ पादे च ॥ १३८ ॥

आभ्यां पादे चोपपद इण्। 'पादस्य पद–' (६-३-५२) इति पदभावः। पदाजिः पदातिश्च तुल्यार्थौ।

॥ अशिपणाय्योरुड्लुकौ✲ ॥ १३९ ॥

आभ्यामिण्, अशेरुडागमः पणायेरायस्य लुक् च स्यात्। वृद्धिः। समूहिषु व्याप्तत्वाद् राशिः। व्यवहरन्त्यनेन पाणिः।

॥ वेञो डित् ॥ १४० ॥

वेञो गतिवचनः विः पक्षी≠।

॥ प्रे हरतेः कूपे ॥ १४१ ॥

डिदिण् स्यात्। प्रह्रियते जलमस्मात् प्रहिः।

॥ नौ व्यो यलोपः पूर्वपदस्य च दीर्घः ॥ १४२ ॥

डिदिण् च स्यात्। नितरां वीयते बध्यते नीविः। संव्रियत इति निधिश्च।

॥ समाने ख्यः स चोदात्तः ॥ १४३ ॥

समान उपपदे ख्याधातोर्डिदिण्, यलोपश्च स्यात्, पूर्वपदस्य चोदात्तः सादेशः। समानं ख्यानं प्रतिभानमस्मिन् सखा, समानं ख्याति वदति वा।

1. 'नति निखननकाल' घ.

✲ 'रुडायलुकौ इत्यन्ये' के.

≠ 'वातेर्डिच्च' इत्यन्ये के.

CC-0. In Public Domain. Digitization by eGangotri

॥ आङि श्रिहनिभ्यां ह्रस्वश्च ॥ १४४ ॥

पूर्वपदस्याङो ह्रस्वः। डित्त्वाट्टिलोपः। अश्रिः। आहन्त्यहिः।

॥ अच इः ॥ १४५ ॥

अजन्ताद् इः स्यात्। रु - रूयते स्तूयते रविः। कवयति ग्रथ्नाति कविः। पुनाति युद्धवधात् पविर्वज्रम्। तरिर्नौः।

॥ खनिकष्यञ्ज्यसिवसि[1](वनि) सनिध्वनि-ग्रन्थिचरिभ्यश्च ॥ १४६ ॥

खनिराकरः। कषिः खनित्रम्। अञ्जिरागन्तुः। अस्यत इत्यसिः। वसिर्वसिता[2]। (वनिरग्निः)। सनिर्याच्ञा। ध्वनिः। ग्रन्थिः। चरिर्दवाग्नि*ः। मणेश्च भोजः। शब्द्यते स्तूयते जनैरिति रत्नं मणिः। मणतीति घञ्डापि। रविकविपविखनिध्वनिग्रन्थि-मणय इन्प्रत्ययान्ता इत्येके।

॥ उभेर्द्विः ॥ १४७ ॥

उभेरिप्रत्ययो द्व्यादेशश्च। इकार उक्त्यर्थः। द्विशब्दः। **उभेद्वत्रौ च'** इति **भोजः**। तेन त्रिशब्द☼ः।

॥ वृतेश्छन्दसि ॥ १४८ ॥

वर्तिरित्यन्तोदात्तं गृहनाम।

॥ भुजेः कित् ॥ १४९ ॥

भुजिर्भोक्ता।

॥ कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च १५० ॥

1. 'सिसनि', 2. 'ता। सनि' घ.

* 'चलिभ्यश्चेति पाठः सिद्धान्तकौमुद्याम्'। के.

☼ 'उभेद्विरिति नान्यत्र दृश्यते' के.

CC-0. In Public Domain. Digitization by eGangotri

ऋत इत्। विक्षिपति भुवं किरिः सूकरः। गिरत्यावृणोति गगनं गिरिः। शिरिर्हिंस्रः। 'उदोष्ठ्यपूर्वस्य' (७-१-१०२)। पूर्यते जनैः, पाल्यते वा पुरिर्नगरी। कुटिर्गृहम्। भिदिर्वज्रम्। छिदिश्छेत्ता

॥ कुण्ठिकम्प्योर्नलोपश्च ॥ १५१ ॥

कुठिः पर्वतः। कम्पते सर्वत्र चरति कपिः। **'तरतेः सन्वत्, तुक् चाभ्यासस्य'** इति **भोजः**। कित्वाद् ऋत इत्। तिर् इ। कृ ऋशब्दस्य द्वित्वमुरत्वम्। सन्वदित्त्वम्। तितिर् [1]इ। (अभ्यासस्य) तुक्। तरति लङ्घयति तरून् तित्तिरिः पक्षी।

॥ मनिन्★ ॥ १५२ ॥

सर्वधातोर्मनिन् स्यात् शृणाति दुःखं शर्म। आवृणोत्यङ्गं वर्म। वर्ततेऽस्मिन् वर्त्म। श्लिष्यति देहे श्लेष्मा। भस्म। चर्म। जन्म। कर्म। 'कर्माणँ चिनुते शुभम्' इति प्रयोगात् वर्मा पुंस्यपीति **टीकासर्वस्वे**। प्रीणाति प्रेम। छादनसाधनं छद्म। छादेर्णिलोपः। 'इस्मन्त्र–' (६-४-९७) इति ह्रस्वः।

॥ [2]बृंहेर्नलोपोऽम् च* ॥ १५३ ॥

अमि यण्। बृंहति व्याप्नोति ब्रह्म।

॥ ऊषिकुषिसृपिभ्यः कित्⊕ ॥ १५४ ॥

ऊषति रुजत्यूष्मा। कुष्मा जरायुः। सृप्मा गन्ता।

॥ अशिशकिभ्यां छन्दसि ॥ १५५ ॥

व्याप्नोति भुवमित्यश्मा लोकेऽपि। शक्मा शक्तः।

॥ भृसृहृधृस्तृषूभ्य ईमनिन्8 ॥ १५६ ॥

1 'इ। तुक्' घ. 2 बृंहेरम्नलोपश्च' घ.

★ 'सर्वधातुभ्यो मनिन्' इत्यन्ये। के.

* 'बृंहेर्नोऽच्च' इत्यन्ये। के ⊗ 'नैतदन्यैः पठ्यते' के.

8 'अन्ये तु प्रत्ययं ह्रस्वादिं सूतिस्थाने शृणातिं च पठन्ति'। के.

CC-0. In Public Domain. Digitization by eGangotri

भरीमा स्वामी। सरीमा कालः। हरीमा वायुः। धरीमा रूपम्। स्तरीमा आस्तरणम्। सवीमा प्रसवः।

॥ जनिमृङ्भ्यामिमनिन् ॥ १५७ ॥

जनिमा जन्म। मरिमा मृत्युः।

॥ वेञः सर्वत्र ॥ १५८ ॥

लोके वेदेऽपि वेञ इमनिन् स्यात्। आत्वम्। गुणः। वेमा वानदण्डः।

॥ नामन् सोमन् सामन् होमन् हेमन् रोमन् लोमन्-व्योमन् विधर्मन् ध्यामन् पाप्मन् ॥ १५९ ॥

एते मनिनन्ताः। नीयते आनीयतेऽनेन नाम। सोमा सोमः। होमा अग्निः। हि गतौ वृद्धौ च। हेम। रुहेर्हलोपः। रोहति रोम। लूयते लोम। व्ययते संवृणोति लोकं व्योम, अवकाशदानाद् विशेषेणावति वा। विधर्मा वायुः। ध्याम प्रहरणम्। पातयति पाप्मा☆। 'क्लोमन् ललामन् यक्ष्मन् पक्ष्मन् वर्ष्मन्' इति च **भोजो**क्ताः। क्लोमा शरीरान्तरवयवः। ललति विलसति ललामभूषणम् वर्धते वर्ष्म। **नाथो**क्तास्तु - कोक्मा अङ्कुरः। शुष्मा अग्निः। रुक्म स्वर्णम्।

॥ मिथुने मनिन् ॥ १६० ॥

मैथुने द्योत्ये मनिन् स्यात्। शॄ धातोः सुशर्मा मैथुनेच्छावती स्त्री। स्त्रीपुंसलिङ्गयोः सर्वधातोर्मनिन् स्यादित्यन्ये। तत्राद्यपक्षे सुशर्ममात्रार्थत्वे सामन्योक्त्यनुपपत्तिः। उत्तरत्र सर्वधातोर्मनिनिनुक्त्यैव सिद्धे वैयर्थ्यम्। स्वरार्थोऽनुबन्धान्तरपाठस्तु न दृष्ट★ः।

☆ 'अत्र सोमन्नित्यादिमाश्चत्वारो विधर्मन्निति चान्यैर्न पठ्यन्ते। सोमन्नित्यधिकश्चास्ति।' के

★ 'अन्ये तु निरनुबन्धमेव पठन्ति। उपसर्गक्रिययोः सम्बन्धो मिथुनमिति च व्याचक्षते।' के

CC-0. In Public Domain. Digitization by eGangotri

॥ सातिभ्यां ङ्मनिन्मनिणौ ॥ १६१ ॥

ङ्मनिनो ङित्त्वाद् 'घुमास्था–' (६-४-६६) इति साधातोरीत्वम्। अन्तं करोति सीमा। णित्त्वाद् वृद्धिः। सातत्येन गच्छति व्याप्नोत्यात्मा #।

॥ ष्ट्रन् ⊗ ॥ १६२ ॥

सर्वधातोः षित् त्रन् स्यात्। पिबन्त्यनेन, पाति संग्राह्य वस्तूनि वा पात्रम्। षित्त्वात् पात्री। छादेः 'तितुत्र–' (७-२-९) इतीडभावः। णिलोपः। 'इस्मन्त्र–' (६-४-९७) इति ह्रस्वः। छत्रम्। राजेर्व्रश्चादिषः। राष्ट्रम्।

॥ भ्रस्जिगमिनमिहनिविष्यशां वृद्धिश्च ॥ १६३ ॥

भ्रस्जेः 'स्कोः–' (८-२-२९) इति सलोपः। व्रश्चादिषः। भृज्यतेऽत्र भ्राष्ट्रोऽम्बरीषः। गान्त्रं मर्म। नान्त्रं शिरः। हान्त्रं रक्षः। वैष्ट्रो विष्णुः। आष्ट्रमाकाशम्। 'नशेश्च' भोजः। छशां षः। बाहुलकाद् 'मस्जिनशोः–' (७-१-६०) इति नुमभावः। नाष्ट्रो राक्षसः।

॥ दिवेर्द्युच्च ॥ १६४ ॥

वृद्धिश्च स्यात्। द्यौत्रं स्वर्गः।

॥ उषिखनिभ्यां कित् ॥ ॥ १६५ ॥

ष्टुत्वम्। उष्यते आतपैरुष्ट्रः। 'जनसनखनाम्–' (६-४-४२) इति झल्यात्वम्। खात्रं खनित्रम्।

॥ सिविमुचोष्टेरू च ॥ १६६ ॥

'अन्ये तु पूर्वत्र सीमन्निति निपातितत्वादत्राङि तमेव मनिनमुक्त्वा सामेत्युदाहरन्ति।' के

⊕ 'अन्ये तु हनिमशिभ्यां सिकन्नित्यादिसूत्रपञ्चकात् परतः सर्वधातुभ्यः ष्ट्रन्निति पठन्ति।' के

CC-0. In Public Domain. Digitization by eGangotri

सीव्यत्यनेन सूत्रम्। मुच्यते मूत्रम्।

॥ हुयामाश्रुवसिभसिभ्यस्त्रन्॥ १६७॥

होत्रमाहुतिः। षित्त्वाभावाट्टाप्। यात्रा। मात्रा। श्रोत्रम्। वस्त्रम्। भस्त्रा। लुपेश्च **भोजः**। लोप्त्रं मुषितद्रव्यम्।

॥ गमेरा च॥ १६८॥

अन्त्यस्यात्वम्। गच्छति गात्रम्✿।

॥ अमिचिमिदिशंसिभ्यः क्त्॥ १६९॥

कित्त्वाद् 'अनुनासिकस्य क्विझलोः–' (६-४-१५) इति दीर्घः। व्याप्नोत्युदरमान्त्रम्। क्वचिद् वृत्तावन्त्रमित्यदीर्घमुक्तम्। 'कुक्ष्यन्त्रनाडय' इति **श्रीभागवते**। मघो कोशेषु पाठश्च। चीयते व्याप्यते भित्त्यादौ चित्रम्। मेद्यति स्निह्यति मित्त्रम्। कित्त्वान्नलोपः। शस्त्रं स्तुतिभेदः।

॥ पुवो ह्रस्वश्च॥ १७०॥

पुनात्यृणापाकरणात् पुत्र★ः।

॥ स्त्री॥ १७१॥

एष स्त्यायतेर्ड्ट्प्रत्ययान्तो निपात्यते। डित्त्वात् टिलोपः। 'लोपो व्योः-' (६-१-६६) इति यलोपः। स्त्र। टित्त्वान्ङीप्। स्त्री। संस्त्याने स्त्यायतेर्ड्डिति **भाष्यपाठः**। संस्त्यान इति। गर्भस्यास्त्यां सङ्घातीभावे गम्यमान इत्यर्थः*।

✿ 'अन्ये त्वेतत्सूत्रद्वितयममिचिमिदीत्यादिवक्ष्यमाणसूत्रचतुष्टयात् परतः पठन्ति।' के.

★ 'पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयंभुवा इति स्मृतेः तथा व्युत्पत्त्यन्तरमपि। तत्र स्वतस्तकारद्वयम्।' के.

* 'स्त्यायतेर्ड्डित्येवान्ये।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ॥ १७२ ॥

नायं नित्। गुङ् शब्दे। आख्यायते गोत्रम्। धत्रं गृहम्। व्रियन्ति गच्छन्त्यनेन प्रेरिता वेत्रम्। पक्त्रो गार्हपत्याग्निः। वक्त्यनेन वक्त्रम्। यम्यते बध्यतेऽनेन यन्त्रम्। सीदन्त्युपविशन्त्यत्र जनाः सत्त्रम्। क्षदिः सौत्रः। क्षत्त्रम् 'वृमनितनिक्षिभ्यश्च' **भोजः**। वत्रं चर्म★। ध्यायते मन्त्रम्। विस्तीर्यते तन्त्रम्। निवसन्त्यत्र क्षेत्रम्।

॥ दादिभ्यश्छन्दसि ॥ १७३ ॥

दात्रम्। योत्रम्। पोत्रम्।

॥ भूवदिगृभ्यो णित्रन् ॥ १७४ ॥

भावित्रं त्रैलोक्यम्। वदति ध्वनति वादित्रम्। गारित्र आचार्यः।

॥ चरेर्वृत्ते ह्रस्वश्च वा ॥ १७५ ॥

चरित्रं चारित्रम्⊗।

॥ अशित्रादिभ्य इत्रो त्रौ॥ १७६ ॥

अश्यादिभ्य इत्रः तृप्रभृतिभ्य उत्रश्च स्यात्। अशित्रमन्नपानम्। कटित्रं श्रोणिः। बन्धित्रः कामः। भ्रियते भरित्रं शूल्यमांसम्। वहित्रं वाहनम्। उत्र - तरुत्र✿ः। करुत्रमभिप्रेतम्।

॥ अमेर्द्विषति चित् ॥ १७७ ॥

इत्रः स्यात्। रुजत्यमित्रः।

॥ आसमिण्निकषिभ्याम् ॥ १७८ ॥

★ 'वध्रमिति प्रयोगो दृष्टः। "संलक्ष्यपल्ययनवध्रपदास्तुरङ्गाः' इति माघः।" के.

⊗ 'चरेर्वृत्त इत्येवान्ये।' के.

✿ 'अन्ये तु त्रैङ् पालने इत्यादिभ्यः उत इति व्याचक्षते।

CC-0. In Public Domain. Digitization by eGangotri

आप्रत्ययोऽत्र सम्पूर्वस्येण: स्यान्निकषेस्तथा ।
समया निकषा चेति समीपार्थेऽव्ययद्वयम् ।।
आप्रत्ययोऽन्यतोऽपीष्टो मृषिसन्योर्मृषा सना ।
मुधा स्वधा मुचिस्वद्योः कार्यं बाहुलतोऽखिलम् # ।।

।। सूचेः स्मन् ।। १७९ ।।

झलि चोः कुः । षत्वम् । सूच्यते सूक्ष्मम् ।

।। पातेर्डुम्सुन् ।। १८० ।।

उकार उगित्त्वार्थ⊗ः । डित्त्वाट्टिलोपः । पुंस् शब्दः । डुम्सुजिति केचित् ।

।। रुचिभुजिभ्यां किष्यन् ।। १८१ ।।

रुचिष्यमिष्टम् । भुङ्क्ते वेतनं भुजिष्यो दासः ।

।। पचेरुष्यन् ।। १८२ ।।

पचुष्यो नकुलः । पचेरूष्यन्निति क्वचित् पाठ★ः ।

।। वसेस्तिः ।। १८३ ।।

वसत्यत्र मूत्रं वस्ति☼ः ।

।। वौ तसेः ।। १८४ ।।

'तितुत्र–' (७-२-९) इतीडभावः । वितस्तिर्द्वादशाङ्गुलः । सपिपदिभ्यां च भोजः । सपति समवैति रथेन सप्तिरश्वः । पत्तिः ।

।। प्रथेर्नित्* ।। १८५ ।।

प्रथेस्तिर्नित् स्यात् । चर्त्वम् । प्रत्तिः ख्यातिः ।

।। दृणातेर्ह्रस्वश्च ।। १८६ ।।

'अत्र चितेः कणः कश्चेति सूत्रमन्यैः पठ्यते ।' के.

⊗ 'द्वितीय उकारो विवक्षितः ।' के.

★ 'अन्ये त्वेतन्नैव पठन्ति ।' के.

☼ 'अत्र सावसेरित्यप्यन्ये पठन्ति ।' के.

* 'पदिप्रथिभ्यां निदित्यन्ये' के.

CC-0. In Public Domain. Digitization by eGangotri

विदार्यते निर्माणकाले दृतिश्चर्मपात्रम्। **भोजस्त्वाह- 'भसेर्गट् च'**। भसेस्तिः, धातोर्गडागमश्च। दीप्यते गभस्तिः। **'यजेस्तिः'**। व्रश्चादिषः। यष्टिः। कुङोयषुक् च'। कुङस्तिः, तस्य यषुक् च। कोयष्टिः। 'गिरः षुग् ह्रस्वश्च'। गृष्टिः। '[1]कृषिरिषिविषि-मुषिशाशुच्यशिभ्यः क्तिन्'। कृष्टिर्विद्वान्। रिष्टिरायुधम्। व्याप्नोति बहुतिथिषु विष्टिः। [2]खण्डति परान् मुष्टिः। 'शाच्छोः-' (७-४-४१) इतीत्॥ ≠। शितिः कृष्णः, श्वेतश्च। दीप्यते शुक्तिः अष्टिश्छन्दः। 'कुचिञोश्चिन्नुक् च'। आभ्यां चित् क्तिन् नुक् च। कुन्तिश्चिन्तिश्च नृपौ। इति।

॥ क्ऋत् ऋकृपिभ्यः कीटन्॥ १८७॥

ऋत इत्। क्षिप्यते शिरसि किरीटम्। तिरीटं प्लवः। कल्पते तृप्त्यै कृपीटं जलम्।

॥ रुचिवचिकुत्सिकुषिभ्यः कितच्॥ १८८॥

रुचितमिष्टम्। वचेर्यजादित्वादुत्वम्। उचितम्। कुत्सितम्। निष्ठया सिद्धेऽपि चित्स्वरार्थमुक्तिः। कुषित ऋषि*।

॥ कुषिकुटिभ्यां क्मलच्॥ १८९॥

कुष्मलः श्लेष्मा। कुटिलत्वात् कुट्मलं(ळं) मुकुळम्। **'डुकृशिशालिभ्यश्च' भोजः**। डुमलं जलम्। कश्मलम्। शाल्मलस्तरुः।

॥ कुशेर्लश्च॥ १९०॥

कुल्मलं देश[3]।

1 'दृकृषि – क्तिन्। कृष्टि' घ. 2. 'खण्डयति' घ.

3 'शः। असुन्। सर्वधातोरसुन् स्यात्। इण्' घ.

≠ वैकल्पिकोऽपि स बाहुलकादत्र नित्यः।' के.

* 'अन्ये तु कुत्सिकुष्योः स्थाने कुचिकुटी पठन्ति।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ सर्वधातोरसुन् ॥ १९१ ॥

इण् - अयः । तिज - तनूकरोत्यन्यांस्तेजः । रक्षन्त्यस्माद् रक्षः । ज्ञायतेऽनेन मनः । एवं चेतः । सरन्त्येतज्जनाः सरः । वचः ।

॥ पिबतेरी च ॥ १९२ ॥

गुणः । पीयते पयः । पयते गच्छति वा✡ ।

॥ अशेर्युट् च# ॥ १९३ ॥

अश्नुते व्याप्नोति यशः ।

॥ उब्जेर्बलोपश्च⊗ ॥ १९४ ॥

गुणः । उब्जत्यार्जवेन गच्छतीत्योजः ।

॥ श्वेः सम्प्रसारणं च ॥ १९५ ॥

गुणः । शवः*

॥ श्रयतेः स्वाङ्गे शिरः किच्च ॥ १९६ ॥

स्वाङ्गेऽर्थे श्रयतेः किदसुन्, शिरादेशश्च । प्रधानेन्द्रियाणि श्रयन्तेऽस्मिन् शिरः ।

॥ अर्तेरुच्च ॥ १९७ ॥

रपर उत् । व्याप्नोत्युरः ।

॥ व्याधौ शुट् च ॥ १९८ ॥

अर्तेर्व्याधावसुन् (तस्य) शुट् च । निर्गच्छत्यर्शः ।

॥ उदके नुट् च ॥ १९९ ॥

अर्यते पिपासुभिरर्णः ।

✡ 'रपेरत एच्चेति सूत्रमेतत्स्थानेऽन्यैः पठ्यते ।' के

'अशेर्देवने युट् चेत्यन्ये । देवनं स्तुतिः' के.

⊗ 'उब्जेर्बले बलोपश्चेत्यन्ये । के

* 'शवसी, शवांसि । शवो मृतशरीरमित्युज्ज्वलदत्तः । बलपर्यायोऽयमिति सिद्धान्तकौमुद्याम् । के

CC-0. In Public Domain. Digitization by eGangotri

॥ इण आगसि ॥ २०० ॥

असुन्, नुट् च। निष्कृत्यागच्छत्येनः।

॥ रिचेर्धने घिच्च ॥ २०१ ॥

घिदसुन्, नुट् च। गुणः। घित्वात् 'चजोः-' (७-३-५२) इति कुः। रेक्णो धनम्★।

॥ चायेरन्ने ह्रस्वश्च ॥ २०२ ॥

नुटि यलोपः। चनः।

॥ वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च ॥ २०३ ॥

वर्पो रूपम्। न शेते शेपो मेढ्रम्। अदन्तः प्रागुक्तः।

॥ स्रुरीभ्यां तुट् च ॥ २०४ ॥

स्रवति स्रोतः। रीयते स्रवति रेतः। 'यातेर्दुक् चे'ति भोजः। यादो[redacted] जलजन्तुः। 'इन्धेर्नलोपश्च' इति च। एध इन्धनम्।

॥ पातेर्बले जुट् च ॥ २०५ ॥

पाजो बलम्।

॥ उदके थुट् च ॥ २०६ ॥

पाति जन्तून् पाथः।

॥ अन्ने च ॥ २०७ ॥

पाथोऽन्नम्।

॥ अदेर्नुम् धश्च[1] ॥ २०८ ॥

अद्यतेऽन्धः। **'नुम् धश्च वा'** इति **भोजः**। अहस् शब्दः।

॥ स्कन्देश्च स्वाङ्गे ॥ २०९ ॥

1 'श्च। अदेरन्नेऽर्थेऽसुन् धश्च। अद्यते'।

★ 'उज्ज्वलदत्तस्तु घित् किच्चेति पठित्वा रिक्णः सुवर्णमित्युदाजहार'। के.

CC-0. In Public Domain. Digitization by eGangotri

असुन् घश्च। स्कन्धो भुजशिरः। अदन्तः स्कन्धो वक्ष्यते।

॥ आपः कर्माख्यायां ह्रस्वो नुट् च वा ॥ २१० ॥

आप्नः अपश्च कर्म✡।

॥ रूपे जुट् च ॥ २११ ॥

आपे रूपेऽर्थेऽसुन् ह्रस्वो जुट् च। अब्जो रूपम्।

॥ उदके नुम् भश्च ॥ २१२ ॥

आपेरुदकेऽर्थेऽसुन् ह्रस्वो नुम् पस्य भश्च। आप्यते सर्वैरम्भः।

॥ नहेर्दिवि भश्च ॥ २१३ ॥

नह्यते सम्बध्यते सर्ववस्तुभिर्नभः।

॥ इण आगोऽपराधे ॥ २१४ ॥

असुन् आगादेशश्च। गच्छति प्रसादनेन आगः।

॥ अमेर्हुट् च ॥ २१५ ॥

अमति रुजत्यंहः।

॥ रमेश्च[1] ॥ २१६ ॥

रमन्तेऽनेन शूरा रंहः।

॥ देशे ह्रश्च ॥ २१७ ॥

मस्य हः। रमन्तेऽत्र रहः।

॥ अञ्च्यञ्जियुजिभर्जां कुश्च ॥ २१८ ॥

अञ्च्यते[2]ऽनेनेत्यङ्कश्चिह्नम्। अङ्गा अशक्तः। योगा मनुः।
भर्जति तपति भर्गस्तेजः।

॥ भूरञ्जिमिथित्ऋप्ऋभ्यः कित्⊕ ॥ २१९ ॥

1 'श्च॥ असुन् हुट् च। रमन्ते' घ.

2. 'ते ज्ञायतेऽनेने' घ.

✡ 'तुट् च वेत्यन्ये।' के.

⊗ 'भूरञ्जिभ्यां किदित्येवान्ये।' के.

CC-0. In Public Domain. Digitization by eGangotri

भुव आकाशः। रज्यति रूषयति रजः। मिथः। तिरः। पुरः। त्रीण्यव्ययानि।

॥ वसेर्णित् ॥ २२० ॥

वस्तेऽनेन वासः।

॥ चन्देरादेश्छ च ॥ २२१ ॥

चन्दत्याह्लादयति वैदिकान् छन्दः।

॥ पचिवचिभ्यां सुट् च ॥ २२२ ॥

कुत्वषत्वे। पक्षो मासार्धम्। वक्षः।

॥ वहि हाधाञ्भ्यः छन्दसि ॥ २२३ ॥

एभ्योऽसुन्, तस्य सुट् च। हो ढः। षढोः कः। वक्षा अनड्वान्। हासाः कालः। धासा पुरुषः।

॥ इण आसिः ॥ २२४ ॥

अया उदकम्।

॥ मिथुनेऽसिः पूर्ववच्च सर्वम् ॥ २२५ ॥

पुंस्त्रीलिङ्गयोर्धातोरसिः स्यात्, न त्वसुन्। असुन्वच्च युडादि कार्यं स्यात्। यशाः ओजाः। एवं व्याख्या क्वचिद् वृत्तौ; यशआद्याश्च पुंस्त्रियोः। न दृष्टा इति भीतिर्नः, को वा शब्दान्तमीक्षते★॥

॥ नञ्याहन एह च ॥ २२६ ॥

नञ्पूर्वस्याहनेः असिः, सोपसर्गस्य धातोरेहादेशश्च स्यात्। न आहन्ति गतो न पुनरागच्छतीत्यनेहा काल*।

॥ विधाञो वेध च ॥ २२७ ॥

★ 'अत्रापि धातूपसर्गयोगो मिथुनमित्यन्ये।' के.
* 'नञि हन इत्येव सिद्धान्तकौमुद्यां पाठः।' के.

CC-0. In Public Domain. Digitization by eGangotri

त्रिधात्रोऽसिर्वेधादेशश्च । विदधाति विश्वं वेधाः ।

॥ नुवो धुट् च ॥ २२८ ॥

गुणः । नौति नोधा ऋषिः ।

॥ गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ॥ २२९ ॥

गतिकारकपूर्वस्यापि धातोरसिः पूर्वपदप्रकृतिस्वरत्वं च स्यात् । कृदुत्तरपदप्रकृतिस्वरापवादः । सुयशाः । देवयशाः ।

॥ चन्द्रे मो डिच्च ॥ २३० ॥

चन्द्रपूर्वस्य माधातोरसिः स्याड्डिच्च चन्द्रमाः ।
स्वरः पूर्वपदोक्तः स्याच्चन्द्रोऽन्तोदात्त एव हि ॥

आह्लादकः सन् मिमीते कालं चन्द्रमाः ।

॥ वयसि धात्रः ॥ २३१ ॥

वयोधा अन्नम् ।

॥ पयसि च ॥ २३२ ॥

पयोधा मेघः ।

॥ पुरसि च ॥ २३३ ॥

पुरो निधीयते कार्येषु पुरोधाः पुरोहितः । रेतसि च भोजः । रेतोधाः पिता ।

॥ पुरूरवाः ॥ २३४ ॥

पुरु प्रभूतं रूयते गीयते [1]जनैरिति पुरूरवाः ।

॥ चक्षेर्बहुलं शिच्च ॥ २३५ ॥

शित्त्वात् ख्याञभावः । चक्षश्चक्षुः । नॄननुत्तं सर्वत्र पश्यति नृचक्षा राक्षसः । बहुलोक्तेः सर्वेषूपपदेषु न ।

॥ उषः कित् ॥ २३६ ॥

1 'सर्वैरिति' घ.

CC-0. In Public Domain. Digitization by eGangotri

ओषति दीप्यते उषः ।

॥ दमेरूनसिः ॥ २३७ ॥

दमूना उपशान्तः । दमेरुनसिरिति भोजः । दमुना अग्निः* ।

॥ अङ्गिरा अप्सराः⊗ ॥ २३८ ॥

अस्यन्तावेतौ । अङ्गति जानाति धर्ममङ्गिराः । अद्भ्यो निःसृतवत्योऽप्सरसः ।

॥ ऊधः ॥ २३९ ॥

वहति क्षीरमूधः# । भोजोक्तास्तु रीयते क्षीयते रेपः पापम् । वजिहीते व्याप्नोति विहायः, रूपस्पर्शादीन् विजहाति वा । ओकः गृहम् । सुनरां काङ्क्षयते सुमनसः पुष्पाणि पुरुदंशा इन्द्रः । इति ।

॥ विदिभुजिभ्यां विश्वे ॥ २४० ॥

आभ्यां [redacted] उपपदेऽसिः स्यात् । विश्ववेदा अग्निः । विश्वभोजा लोकपालः ।

॥ [1]वशेः कनसिः ॥ २४१ ॥

कित्त्वाद् 'ग्रहिज्या'दिना प्रसारणम् । इच्छति दैत्यहितमुशनाः ।

॥ इति चतुर्थः पादः ॥

पञ्चमः पादः ।

॥ अदि भुवो डुतच् ॥ १ ॥

अदित्याश्चर्यार्थेऽव्ययम् । आश्चर्यं भवतीत्यद्भुतम् ।

1 'वशः कनसि' घ.

* 'सप्तार्चिर्दमुना इत्यमरः ।' के.

⊕ अन्ये त्वेतत्सूत्रं द्विधा विभज्य लिखन्ति ।' के.

'एतदन्यत्र न दृश्यते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ गुधेरूमः ॥ २ ॥

परिवेष्ट्यते वृतिभिर्गोधूमः ।

॥ मसेरूरन् ॥ ३ ॥

पाकेऽन्यथा परिणमति मसूरो धान्यभेदः ।

॥ स्थः किच्च ॥ ४ ॥

कित्त्वादाल्लोपः । स्थूरोऽश्वादिपृष्टम् ।

॥ पातेर्डतिः ॥ ५ ॥

पतिः । इदं प्रागुक्तेः (४-५८) हेयम्★ ।

॥ वातेर्नित् ॥ ६ ॥

[1]वतिर्वायु⊗ः ।

॥ तृहेः क्नन् हलोपश्च ॥ ७ ॥

कित्त्वादगुणः । तृह्यते हिंस्यते पशुभिस्तृणम् ।

॥ वृञ्लुटितनितडितण्डिभ्य उलच ॥ ८ ॥

वरुलं वेरेण्यम् । लोटुलं न ज्ञातम् । तनुलं मृदु । तडुलमपि न ज्ञातम् । तण्डुलः पूर्वमुक्तत्वात् हेय✡ः ।

हृषिमङ्गिशङ्किचटिवन्दिभ्यश्च ॥ कुमुलतुमुलमुकुल(ळ)मञ्जुला(ळा)दयश्च ॥ [2]उत्तुरादयश्च ॥ कटिपटिमदिलपिललिकल्यनिरटिलटित्ऋभ्योऽहलच् ॥ पुलेः किच्च ॥ कुलादिभ्यः कित् ॥ एतानि षट् सूत्राणि व्याख्यासु न दृष्टानि

1. 'डतिर्नित् स्यात् । वति', 2. 'उत्तुरुधादयश्च ।' घ.

★ 'उज्जवलदत्तादयस्तु पातेरतिरित्येव पठन्ति । पातिः स्वामी । सम्पातिः पक्षिराज इति चोदाहरन्ति ।' के.

⊗ 'अश्विपक्षे वातिरादित्यसोमयोः । अन्ये त्वर्तेरप्यतिमाहुः । उद्वेगोऽर्थः ।' के.

✡ 'अन्ये तु वृञ्लुटितनिताडिभ्य उलन् तण्डश्चेति पठित्वा व्रियन्ते, लुट्यन्ते, तन्यन्ते, ताड्यन्ते इति वा तण्डुला इति व्याचक्षते ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ दन्सेष्टटनौ न आ च ॥ ९ ॥

दन्सेः टटनौ स्तः, नस्य आत्वं च। तत्तत् कुर्विति भाष्यते दासः। टटनोः स्वरभेदः। टित्त्वान्ङीप्। दासी।

॥ दंशेश्च ॥ १० ॥

टटनौ, नस्यात्वं च। दशति मत्स्यादीन् दाशः ‡।

॥ सौ रमेः क्तः ॥ ११ ॥

कित्त्वादनुनासिकलोपः। सुरतम्। निष्ठया सिद्धेऽपि नामत्वादुक्तिरिति मन्यते।

॥ दमे पूर्वपदस्य च दीर्घः ॥ १२ ॥

दमे द्योत्ये सुपूर्वस्य रमेः क्तः, सोर्दीर्घश्च। सुतरां रमयति सूरतः शान्त★ः।

॥ पूञो यण्णुड्ह्रस्वश्च ॥ १३ ॥

पूञो यक् स्यात्, तस्य णुट्, धातोर्ह्रस्वश्च। पुनाति पुण्यम्✿।

॥ स्रंसेः शिः कुट् किच्च ॥ १४ ॥

स्रंसेर्यत् कित् स्यात्, तस्य कुट् धातोः श्यादेशश्च। लम्बते शिक्यम्

॥ अर्तेः क्युनुच्च ॥ १५ ॥

रपर उत्। योरनः। उरणो मेषः।

॥ हिंसेरीरन्नीरचौ ॥ १६ ॥

हिंसीरो व्याघ्रः। स्वरे भेदः।

॥ उदि दृणातेरलचौ र्शपदान्त्यलोपश्च ॥ १७ ॥

‡ 'अन्ये तु उदिचेर्डेसिः नौ दीर्घश्च इति सूत्रद्वयमत्र पठन्ति।' के.

★ 'अन्ये तु सूत्रद्वयमेतदेकीकृत्य पठन्ति।' के.

✿ 'णुग्घ्रस्वश्चेत्यन्ये। तन्मते धातोरेव णुक्।' के.

CC-0. In Public Domain. Digitization by eGangotri

उत्पूर्वस्य दॄधातोरल्, अच् इति स्तः, उदो दकारलोपश्च। गुणः। उद्दीर्यते सरन्ध्रं भवतीत्युदरम्। अलचोः स्वरे भेदः।

॥ डित् खनेर्मुट् चोदात्तः ॥ १८ ॥

खनेर्डितावलचौ स्तः, धातोरुदात्तो मुट् च। डित्वाट्टिलोपः। मुखम्।

॥ हन्तेश्च द्वे ॥ १९ ॥

हनेरलचौ द्वित्वं च। आहन्यते जघनम्#।

॥ अमेरसच् ॥ २० ॥

अमसो व्याधिः। स्वरभेदात् पुनरुक्ति⊗ः।

॥ मुहेः खो मूट् च ॥ २१ ॥

मुहेः खः स्यात्, मूट् इत्यादेशश्च। मुह्यति मूर्खः।

॥ नहेर्लोपश्च ॥ २२ ॥

नह्यतेऽङ्गुलिषु नखः।

॥ महेश्च ॥ २३ ॥

मह्यन्तेऽत्र देवा मख☼ः।

॥ शीङो निद्ध्रस्वश्च ॥ २४ ॥

शिरसि शेते शिखा।

॥ शाखा ॥ २५ ॥

श्यतेर्निपात्यते। वृक्षांशत्वेन तनुत्वाच्छाखा≠।

॥ माङ उखा ॥ २६ ॥

'अभ्यासाच्चेति हस्य कुत्वेन घः।' के.

⊗ 'अमेः सन्नित्येवान्येषां पाठः।' के.

☼ 'अन्यत्र नैतदुपलभ्यते' के.

≠ 'नेदमन्यत्र दृश्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

माङो धातोः खान्त उखाशब्दः। मित्वा अर्प्यतेऽस्मिन् पाक्यमुखा★।

।। कलेः फगस्योच्च ।। २७ ।।

कलेः फक्, अत उत्वं च। कुलफो गुलफः।

।। गलेश्च ।। २८ ।।

गल अदने। अद्यते तिरोधीयते पादे गुल्फः। गूढगुल्फत्वस्य गुणत्वात्*। 'शिफाशफकफादय' इति [भोजः। श्यतेरित्वमत्वं च। तनुत्वाच्छिफा वृक्षजटा। तनूकरोति भुवं शफः खुरः। रुद्धकण्ठाः कायन्त्यनेन कफः।

।। स्पृशेः श्वण्शुनौ पृ च ।। २९ ।।

स्पृशेः श्वण्शुनौ प्रत्ययौ, पृ इति सर्वादेशश्च। णित्त्वाद् वृद्धिः। [1]पार्श्वम्। पर्शुः पार्श्वास्थि।

।। श्मनि श्रयतेर्डुन् ।। ३० ।।

श्मन्युपपदे श्रिञो डुन्। श्मश्रु⊕।

।। अश्र्वादयश्च ।। ३१ ।।

अश्नुते व्याप्नोति नेत्रमश्रु। अस्यते मृज्यतेऽस्तु तदेव।

।। जनेष्टन् लोपश्च ।। ३२ ।।

[2]जायते जटा।

।। अच् तस्य जङ्घ च ।। ३३ ।।

तस्य जनेः जङ्घ इत्यादेशोऽच्प्रत्ययश्च स्यात्। जङ्घा।

1 'पार्श्वम्। गुणः। पर्शु।', 2 'जन्यते जटा।' घ.

★ 'अन्ये त्वेतत्स्थाने माङ ऊखो मयश्चेति पठन्ति।' के.

* 'अन्ये योगविभागं न कुर्वन्ति।' के.

⊗ 'श्मन्शब्दो मुखवाचीत्याहुः।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ लूञो मनिन् ॥ ३४ ॥

लोम। प्राङ् निपातितत्वादिदं हेयम्✪।

॥ क्लिशेरब्लोपश्च ॥ ३५ ॥

क्लिश्यतेऽनेन केशः।

॥ हन्तेः शरीरावयवे द्वे च ॥ ३६ ॥

अप् च स्यात्। जघनम्। प्रागुक्तेर्हेयम्।

॥ फलेरितजादेश्च पः ॥ ३७ ॥

पलितम्। एतच्च हेयम्।

॥ कृञादिभ्यः संज्ञायां वुन् ॥ ३८ ॥

क्रियते करकः। दरकः सुवर्णकारः। पिटकः पात्रभेदः। 'बदरपिटक' इति **भाष्योक्तेर्न** गुणः। अत्र **भोजः** 'कृसृभृवृस्तुकुक्षुचरिचटिचणितम्यविदेविकनिमनिपचिमचिमक्षि[illegible]किरिवृतिवल्लिमल्लिसल्यलिभ्यो वुन्।' सरको मद्यभेदः। भरको गोण्यादिः। वरको वाजसनेयभेदः। स्तूयते स्तव(ब)कः। स्थाधातोः प्रागुक्तः। कवको भक्ष्यद्रव्यभेदः। क्षवको राजसर्षपः। चरको मुनिः। चटकः पक्षी। चणको मुनिः। तमको व्याधि[1]ः। (अवको न ज्ञातः)। देवको राजा। दीप्यते कनकम्। 'नशिमन्योरेत्वं वाच्यम्'। मेनका। नशेस्त्वनेशदित्युक्तम्। पेचको हस्तिजघनम्★। मेचको वर्णः। **'मनिपचिमचां नाम्नि'** इति **भोजोक्तेरेत्वम्**। मश शब्दे। मशकः। क्षारको बालमुकुलम्। कुर शब्दे। ध्वनन्त्यत्र भृङ्गाः कोकरः प्रौढमुकुळम्। वर्तिका प्रागुक्ता। संव्रियते भरुत्वया वल्लकी।

1 'धिः। देवको' घ.

✪ 'अन्यैस्त्वेतन्न पठ्यते। हन्तेः शरीरावयवे द्वे च इति तु अत्र तैः पठ्यते।' के.

★ 'उलूकश्च' के.

CC-0. In Public Domain. Digitization by eGangotri

धारयत्यन्नादि मल्लकः शरावः। सल्लकी वृक्षः। भूषयति मुखमल-(ळ)कः। '**कौ रुरुण्टिरण्टिभ्यः**।' रुवन्त्यत्र भृङ्गाः कुरवकः। कुरव इत्यपि दृष्टम्। कुरुण्टकः पर्णगुच्छः। कुरण्टकः स एव। '**कटेर्नुम् च वा**'। आवृणोति वृक्षं, प्रकोष्ठं च कण्टकः, कटकः। इति।

।। जनेररष्ठश्च ।। ३९ ।।

ठोऽन्तादेशः। जायतेऽस्माज्जठरम्।

।। पचिवदिभ्यामिच्च ।। ४० ।।

अत इत्वमन्त्यस्य ठश्च। पचन्त्यस्मिन् पिठरः। वदत्यबद्धं विठरो मूर्खः।

।। वचिमनिभ्यां चिद्वा ।। ४१ ।।

आभ्यामरश्चिद् वा स्यात्: ठत्वं च। वठरो मूर्खः। मठरो ज्ञानी✡।

।। ऊर्जिदृणातेरलचौ पूर्वपदान्त्यलोपश्च ।। ४२ ।।

ऊर्ज् शब्दपूर्वाद्दृणातेरल् अच् इति स्तः ऊर्जो जलोपश्च। ऊर्दरः कुपूलः। अलचोः स्वेरे भेदः। आद्युदात्तस्तु दृष्टः।

।। कृदरादयश्च ।। ४३ ।।

कृदरो हिंस्रः॥ मृश्रोर्दृक श्रो ह्रस्वश्च॥ मृदरो मृत्युः। शृदरः सर्पः॥ श्रो गुणे रस्य बः॥ शृणाति शबरः। बद स्थैर्ये। बदरः।

।। हन्तेर्युजाद्यन्तयोर्घत्वतत्वे च ।। ४४ ।।

घतनो बहुवाशी।

।। क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च ।। ४५ ।।

क्रान्तुः प्रैयणिकः। गान्तुः पथिकः। क्षान्तुः पिता।

।। गुहेः कन् ।। ४६ ।।

✡ 'एतदव्यवहितपूर्वसूत्रमन्यत्र न दृश्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

क्त्विवादगुणः। गूहति स्वतेजसा शत्रून् गुहः स्कन्दः।

॥ करोतेर्द्वे च ॥ ४७ ॥

चक्रम्।

॥ विषेर्व्याप्तिकर्मणि ॥ ४८ ॥

व्याप्तिक्रियार्थाद् विषेः कन्। देहं व्याप्नोति विषम्★।

॥ हर्यतेः कन्यन् हिर च ॥ ४९ ॥

हर्य गतौ। सर्वत्र व्याप्नोति, अपयति, द्रवणि वा हिरण्यम्।

॥ कृञः पासञ् ॥ ५० ॥

कार्पासः। '**कृञ पासः**' इति कर्पासो वृक्ष इति केचित्।

॥ कठिचकिभ्यामोरः ॥ ५१ ॥

कठोरः। चकोरः। पूर्वं चिदुक्तः✿।

॥ जनेस्तो रश्च ॥ ५२ ॥

अन्त्यस्य रत्वम्। जर्तो योनिः। जीर्यतेस्तनिः प्रागुक्तः*।

॥ डोऽट् च ॥ ५३ ॥

जनेः डः स्यादडागमश्च। जायत इत्यजश्छागः#।

॥ ऊर्णोतेर्डः ॥ ५४ ॥

उर्णा छागादिलोम।

॥ दधातेर्यन्नुट् च ॥ ५५ ॥

धार्यते पोष्यते वा धान्यम्।

॥ जीर्यतेः क्रिन् रश्च वः ॥ ५६ ॥

★ 'सूत्रत्रयमेतदन्यत्र नोपलभ्यते' के.

✿ 'अन्यैस्त्वेतदत्र न पठ्यते।' के.

* 'जनेस्तू रश्चेत्यन्ये। जर्तुः स्याद्योनिर्हस्तिनोः।' के.

'अन्यत्रैतन्न दृश्यते।' के.

CC-0. In Public Domain. Digitization by eGangotri

जॄधातोः क्रिन्, ॠत इत्वे कृते रस्य वत्वं च स्यात्। जिव्रिः कालः। अत्र वान्तस्य 'हलि च' इति दीर्घो बाहुलकान्न स्यात्✿।

॥ ऋजेः कीकन्॥ ५७॥

ऋजीक ऋषिः≠।

॥ अर्भकपृथुकपाका वयसि॥ ५८॥

एते वयसि निपात्यन्ते। अर्हति लाळनमर्भकः। प्रथते वर्धते पृथुकः। रक्ष्यते पाकः। पाकस्यार्थभेदादुक्तिः।

॥ अवद्यावमाधमार्वरेफाः कुत्सिते॥ ५९॥

॥ चतेरुरन्॥ ६०॥

अकार उक्त्यर्थः। चतुर् शब्दः।

वार्द्वाराविति रेफान्तौ भोजेनात्र निपातितौ।
सहेः क्विप् च षषादेशोऽप्युक्तः षट्च्छब्दसिद्धये⊗॥

॥ लीङ्रीङोर्ह्रस्वश्च पुक् तरौ श्लेष्म[1]कुत्सितयोः॥ ६१॥

लीङ्रीङोः क्रमादर्थद्वये त र इति प्रत्ययौ ह्रस्वः पुक् च स्युः। लिप्तं श्लेष्मा। रिप्रं कुत्सितम्★।

॥ क्लिशेरी चोपधायाः, कन्, लोपश्च लो, नाम् च॥ ६२॥

क्लिशेः कन्नुपधायाः स्यादीत्वं लस्य च लुप्तता।
नामागमश्च मध्ये स्यात् कीनाशः क्लेशनाद् यमः॥

॥ अश्नोतेराशुकर्मणि वरट् च॥ ६३॥

1 'कुत्सनयोः'

✿ 'अत्र - मव्यतेर्यलोपो मश्चाऽऽपतुट्, चाऽऽल इति सूत्रमन्ये पठन्ति। ममापतालो विषये।' के.

≠ 'तनोतेर्डउः सन्वच्च इति सूत्रमन्येऽत्र पठन्ति।' के.

⊕ 'चतेरुरन्नित्यप्यन्यैरत्र न पठयते।' के.

★ 'श्लेष्मणकुत्सितयोरित्यन्ये।' के.

CC-0. In Public Domain. Digitization by eGangotri

अश्नोतेराशुत्वे द्योत्ये वरट्, उपधाया ईत्वं च। आशु स्वचिन्तितार्थं प्राप्नोतीश्वरः। टित्त्वादीश्वरी।

॥ आप्नोतेः क्विप् ह्रस्वश्च ॥ ६४॥

अप्शब्दः।

॥ अपि सर्तेरसिन् ॥ ६५॥

अप्सराः। पूर्वोऽस्यन्त इति भेदः*।

॥ सिचेः संज्ञायां कन्, नुम्हौ च ॥ ६६॥

सिचेर्नाम्नि कन् स्यात्, नुमागमोऽन्त्यस्य हश्च। सिञ्चति रुधिरेणाङ्गं, भुवं वा सिंहः।

॥ व्याङि घ्रातेर्जातौ ॥ ६७॥

कनः कित्त्वादाल्लोपः। भक्ष्यान्वेषणार्थं व्याजिघ्रति व्याघ्रः।

॥ छापूखडिभ्यो गक् ॥ ६८॥

छिद्यते यज्ञे छागः। पुनात्यास्यं पूगः। खड भेदने। खड्गः¤।

॥ हन्तेर्घुरच् ॥ ६९॥

हन्तेरच् प्रत्ययो घुर् इत्यादेशश्च स्यात्। घोरः#।

॥ ग्रहेरनिः ॥ ७०॥

न गृह्यते रसोऽनया ग्रहणिर्व्याधिः⊕।

॥ तनोतेर्डउः सन्वच्च ॥ ७१॥

सन्वत्त्वात् तितन् इति स्थिते टिलोपः। विस्तीर्णत्वात् तितउः शूर्पः। डउरित्युक्तिसामर्थ्यान्न सन्धिः★।

* 'सूत्रद्वयमिदमन्यैरत्र न पठितम्। चतेरुरन्, प्राततेररन्, अमेस्तुट् च, दहेर्गो लोपो दश्च नः इति सूत्रचतुष्कं स्वत्र पठितम्।' के.

¤ 'अत्र तत्सूत्रमन्ये न पठन्ति।' के.

\# हन्तेरच् घुर च इत्यन्येषां पाठ समीचीनः।' के.

⊗ 'एतत्पूर्वतया 'क्षमेरुपधालोपश्च' 'तरतेर्ड्रिः' इति सूत्रद्वयमन्यैः पठ्यते।' के.

★ 'इदमन्यैः प्राक् पठितम्।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ प्रथेरमच् ॥ ७२ ॥

अन्येभ्योऽधिकं प्रख्यायते प्रथमः।

॥ चरेश्च ॥ ७३ ॥

अन्ते चरति चरमः।

॥ पुरश्च ॥ ७४ ॥

पृ ऋधातोरप्यमच्। पालयत्यन्यान्, पूरयति वाभीष्टं परमः❋।

॥ मर्तेर्भुक्षिनक् ॥ ७५ ॥

अकाविती। ऋभुक्षिन्छब्द इन्द्राख्या।

॥ मङ्घेरच् नलोपश्च ॥ ७६ ॥

मघा नक्षत्रम्।

॥ खनेर्डलः ॥ ७७ ॥

खनति तुदति खलः।

॥ गवि गन् धृङो वः ॥ ७८ ॥

गोपूर्वाद् वृङो वः स्यात्, गोश्च गन्भावः। गवि स्वर्गे ध्रियतेऽवतिष्ठते गन्धर्वः, गवि गानरूपायां वाचि तिष्ठति वा। भुवि तिष्ठतीत्यश्वोऽपि।

॥ दन्भेः सिकन् मक् च ॥ ७९ ॥

धातोर्मगादेशः। दभ्नोति हिनस्त्यङ्गं मक्षिका।

॥ दमेरुभिर्दुक् चोपधायाः ॥ ८० ॥

दमयति रिपून् दुन्दुभिः।

॥ दिवेर्डिविः ॥ ८१ ॥

डित्त्वाट्टिलोपः। इकार इत्। दिव्शब्दः।

॥ मङ्गेरलच् ॥ ८२ ॥

मङ्ग्यते प्राप्यते सुखमनेन मङ्गलम्॥

॥ **इति पञ्चमः पादः** ॥

❋ 'इदमुत्तरसूत्रसप्तकं चात्रान्यैर्न पठितम्।' कै.

CC-0. In Public Domain. Digitization by eGangotri

अथ वर्णा आनीयन्ते ।

॥ अवतेर्विड्वलोपो दीर्घश्च वा ॥ १ ॥

विट सर्वलोपे धातोर्वलोपे च कृते दोर्घविकल्पात् अ आ इति सिद्धम् । अवति विश्वं अः विष्णुः ।

॥ इष्युषिभ्यां क्विप् [1]षलोपश्च ॥ २ ॥

दीर्घश्च वा स्यात् । कित्त्वादगुणः । इ ई । उ ऊ । इच्छत्यनेन इः कामः । ओषति दहति विश्वं उः शिवः ।

॥ र्अतिकिरत्योः कलोपश्च ॥ ३ ॥

अनयोः क्विप् कृ॒ऋधातोः कलोपश्च । ऋ । ॠ । क्विपः पित्त्वेऽपि बाहुलकाद् ऋधातोर्न तुक् । अर्यते गम्यते (शुश्रूषार्थं) देवैः ऋशब्दोऽदितौ ।

॥ तयोरेव लृ ॥ ४ ॥

तयोः ऋ ॠ इत्यनयोः लृत्वं च स्यात् । आन्तरतम्यादेकद्विमात्रौ । लृ ल्‍ॠ । लृवर्णस्य दीर्घाभावो लिपिपाठादन्यत्र त्यत्रेदं प्रमाणम् ।

॥ इणो गुणवृद्धी ॥ ५ ॥

ए । ऐ ।

॥ ऊहेर्व्यञ्जनलोपश्च ॥ ६ ॥

गुणवृद्धी च स्तः । ओ । औ ।

॥ अमेर्मसौ च ॥ ७ ॥

अमेर्व्यञ्जनलोपो मसौ च स्तः । म् स् इति शोषेसस्यरुत्वविसर्गौ । अम् अः ।

॥ कनिखनिगमिघसिकुङ्भ्यो डः ॥ ८ ॥

डित्त्वाट्टिलोपः । क । ख । ग । घ । ङ । कनति दीप्यते को ब्रह्मादिः ।

1 'व्यञ्जनलोपश्च' घ॰

CC-0. In Public Domain. Digitization by eGangotri

।। चमिछमिजन्युज्झिमिदेरुजलोपो ञ च ।। ९ ।।

एषां डः स्यात्, उज्झेरुकारजकारलोपो, मिदेर्मकारस्य ञादेशश्च । च । छ । ज । उज्झेर्झकारमात्रस्य शिष्टत्वादजभावाट्टिलोपाप्रसङ्गः । झ । मिदेर्मस्य ञत्वे टिलोपे च कृते ञ ।

।। ट्वलिठ्वलिड्वलिढौकिपणिभ्यो वपलोपश्च ।। १० ।।

एभ्यो डो, वलोपः, पणेः पशब्दलोपश्च स्यात् । ट । ठ । ड । ढ । ण ।

।। तनिथुडिदमिधनिम्नमिभ्यश्च ।। ११ ।।

डः स्यात् । त । थ । द । ध । न ।

।। पातिफक्कतिबृहिभृङ्भ्यश्च १२ ।।

प । फ । ब । भ । म ।

[redacted]तिलातिवातिभ्यश्च ।। १३ ।।

य । र । ल । व ।

।। शमिमुषिसहिहाभ्यो मुलोपश्च ।। १४ ।।

एभ्यो डो, मुषेर्मुलोपश्च । श । ष । स । ह ।

।। कायतिपिबत्योः +क×पौ च ।। १५ ।।

अनयोर्ड एतावादेशौ च स्तः । +क । ×प ।

। इति वर्णानीतिः ।

उक्तेषु प्रत्ययेष्वेव प्रकृत्याधिक्यगोचराः ।
भोजोक्तयः पुरा प्रोक्ता अवशिष्टा अथ ब्रुवे ।।

।। कायः किः ।। १ ।।

काकिः स्वरदोषः ।

।। वर्धेरकिः ।। २ ।।

छिनत्ति वर्धकिः तक्षा ।

CC-0. In Public Domain. Digitization by eGangotri

॥ कौतेर्डिखिः ॥ ३ ॥

किखिः शिशुक्रोष्टा । दीर्घान्त इति हरः ।

॥ श्रिञो ढिः ॥ ४ ॥

गुणः । श्रेढिः गणितव्यवहारः ।

॥ चमेरुच्चातः ॥ ५ ॥

चुण्ढिः क्षुद्रवापी ।

॥ मुषेः किदुनट् च ॥ ६ ॥

मुषेर्ढिः कित् स्यात् तस्योनडागमश्च । मुष खण्डने । मुषुण्ढिरायुधम् ।

॥ वस्यर्तिभ्यामातिः ॥ ७ ॥

वसातयो जनपदः । अभिगच्छत्यभिगम्यते वा युद्धेषु अरातिः ।

॥ अभौ यामाभ्याम् ॥ [illegible] ॥

अभियातिरभिमातिश्च शत्रुः । मातेरपि गतिवृत्त्या प्रग्वदर्थः ।

॥ यजो यश्च ॥ ९ ॥

जस्य यत्वम् । यजति देवान् ययातिः ।

॥ तनेर्डिथिः ॥ १० ॥

प्रतिपक्षं तायते तिथिः ।

॥ उषेरधिः ॥ ११ ॥

गुणः । उण्यत आतपैरोषधिः ।

॥ विदेः किद्रुट् च १२ ॥

ज्ञायते विचार्यते वा वैद्यैर्विद्रधिर्व्याधिः ।

॥ वल्ल्यर्तिकृतिभ्योऽरिः ॥ १३ ॥

संवृणोति तरुं वल्लरिर्लता । अररिः कपाटम् कर्तरिः खण्डनी ।

॥ धूञ्मूङ्माङ्शालिभ्यो लिग्लिणौकुलिञ्मलिचः ॥ १४ ॥

धूञो लिक् । धूयते वातेन धूलिः (ळिः) । मूङो लिण् । बध्यते

CC-0. In Public Domain. Digitization by eGangotri

मौलिः । माङ औकुलिच् । मौकुलिः काकः । शालेर्मलिच् । शाल्मलिर्वृक्षः ।

॥ गोपादिष्वनेरसिः ॥ १५ ॥

गोपानसिर्वलभी । एकानसिरुज्जयिनी । वाराणसिः काशी । अत्र 'पूर्वपदात्संज्ञायाम्' (८-४-३) इति णः । अस्य णत्वस्यानित्यत्वाच्चित्रानसिर्जलचरः ।

॥ व्रियो ह्रिक् ॥ १६ ॥

व्री वरणे । आव्रियते वृतिभिः, याच्यते वा व्रीहिः ।

॥ शलेरङ्कुः ॥ १७ ॥

शलङ्कुर्मुनिः ।

॥ शलेराटुच् ॥ १८ ॥

शलाटु कोमलफलम् ।

॥ तनिमनि[1]कनिभ्यो डुः ॥ १९ ॥

तण्डुर्नन्दीश्वरः । मण्डुर्मुनिः । कण्डुर्वेदना ।

॥ पनेर्दीर्घश्च ॥ २० ॥

स्तूयते पाण्डुः ।

॥ मृपल्योः कनुगानुकौ च ॥ २१ ॥

आभ्यां डुः, एतावागमौ च स्तः । मृकण्डुर्मुनिः । पलाण्डुर्लशुनम् ।

॥ गमेः कित् ॥ २२ ॥

कित्त्वाद् 'अनुदात्तोपदेश—' (६-४-३७) इति मलोपः । गच्छति चिकित्सया गडुः ।

॥ यमेर्दुक् ॥ २३ ॥

प्राग्वन्मलोपः । यच्छति रिपून् यदुः ।

॥ [2]धाञो धुन् धुट् च ॥ २४ ॥

1 'कणिभ्यो' घ. 2 'धुञो' घ.

CC-0. In Public Domain. Digitization by eGangotri

धुन्धुरसुरः ।

॥ जीवे रदानुक् ॥ २५ ॥

अस्माद् रदानुक्⊗ । जीरदानुः पर्जन्यः ।

॥ अभ्रेरमुः ॥ २६ ॥

सम्यगभ्रत्यभ्रमुः दिक्करिणी ।

॥ कर्करारुः ॥ २७ ॥

कर्कारुः कूश्माण्डः ।

॥ ओर्वेरादेरुदेतौ च ॥ २८ ॥

उर्वारुः । एर्वारुः । द्वौ चिर्भिटीभेदौ★ ।

॥ तुम्बेरुरुः ॥ २९ ॥

तुबि अदर्शने । सञ्चारशीलत्वात् क्वापि न चिरं दृश्यते तुम्बुरुः ।

॥ [1]कन्देरत उच्च[illegible] ॥

कुन्दुरुः सल्लकीनिर्यासः ।

॥ चमेरूरुः ॥ ३१ ॥

चमति तृणादि चमूरुर्मृगः ।

॥ शीङ्पीङ्शलिभ्यो लुलुगालुचः ॥ ३२ ॥

एभ्यः क्रमात् लुः, लुक्; आलुच् इति स्युः । शेलुः पीलुश्च वृक्षभेदौ । शलालुर्गन्धद्रव्यम् ।

॥ कमण्डलुगुहलुगुल्गुलवः ॥ ३३ ॥

केन जलेन मण्ड्यते कमण्डलुः । गुहलुर्मुनिः । गुड रक्षणे । रक्षति वाताद् गुल्गुलुः ।

॥ तरतेरक्षुः ॥ ३४ ॥

1 'कनेरत' (?) घ.

⊕ 'लोपो व्योः' इति वलोपः ।' के. ★ 'चिर्भिटी लताजातिः ।

CC-0. In Public Domain. Digitization by eGangotri

तरति[1] लङ्घति पशुं तरक्षुः व्याघ्रः। **प्रीकाभ्यां कङ्गुजुक्तः।** कित्त्वादियङ्, आल्लोपश्च। प्रियङ्गुः कङ्गुश्च धान्यभेदौ। **कशेश्चिपुगुक्तः।** प्राप्यते कशिपुः।

॥ तुवः किकन् ॥ ३५ ॥

अनावितौ। कित्त्वादगुण उवङ्। तुविक् पुत्रः। ककारान्तोऽयम्।

॥ ईडेरबिडिर्ह्रस्वश्च ॥ ३६ ॥

इडविड् विश्रवाः।

॥ भातेर्डवतुः ॥ ३७ ॥

अनेन सर्वादिगतभवच्छब्दः।

॥ उदके श्वयतेर्डितिः ॥ ३८ ॥

संज्ञात्वादुदकस्योदादेशः। उदकेन वर्धते उदश्वित्, तक्रम्।

॥ पाते[illegible]कृथिः ॥ ३९ ॥

कित्त्वादाल्लोपः। पृदिति थान्तः पृथुनृपाख्या।

॥ ककुप् त्रिष्टुबनुष्टुभः ॥ ४० ॥

एते भान्तः।

॥ अनसि वहेः क्विप्, डश्चानसः ॥ ४१ ॥

अनसोऽन्त्यस्य डत्वम्। क्विपः कित्त्वाद् वहेः प्रसारणम्। अनडुह् शब्दः।

॥ क्रोऽङ्को रो लश्च वा ॥ ४२ ॥

कृधातोरङ्कप्रत्ययः, गुणे कृते रस्य लत्वं च वा स्यात्। दिक्षिप्यन्ते वस्तून्यस्मिन् करङ्कः समुद्गः। कीर्यते वस्त्रादौ कल(ळ)ङ्कः।

॥ राला पाकाभ्यः कित् ॥ ४३ ॥

1 'लङ्घयति' घ.

CC-0. In Public Domain. Digitization by eGangotri

कित्वादाल्लोपः। रान्त्यस्मै दयालव इति रङ्कोऽशक्तः। आदियते राक्षसैर्लङ्का। पायति शुष्यत्यातपेन पङ्कः। ध्वनति कङ्कः।

॥ कलेरपिङ्कः ॥ ४४ ॥

कलपिङ्कः पक्षी।

॥ क्रमेरेलकः ॥ ४५ ॥

क्रमेळकः करभः।

॥ कनेरीनकः ॥ ४६ ॥

शोभते कनीनिका तारका।

॥ हृरुहिपिण्डिभ्य ईतकः ॥ ४७ ॥

हरीतकः, रोहीतकः, पिण्डीतकश्च वृक्षाः।

॥ कुषेः कित् ॥ ४८ ॥

कुषीतक ऋषिः।

॥ चण्डिभल्लिभ्यामातकन् ॥ ४९ ॥

चण्डातकं नतक्यादिवासः। भल्लातको वृक्षः।

॥ श्लेष्मातकाम्रातकाम्लातकपिष्टातकादयः ॥ ५० ॥

पिष्टातकः पटवासः। अन्ये वृक्षाः। पिष्टात इत्येवामरः। आद्युक्तेः कोशातक्यादि। जनेर्घः इत्यधिकृत्य,

॥ दृणातेः कित् ॥ ५१ ॥

ऋत इत्। 'हलि च' (८-२-७७) इति दीर्घः। दीर्घः।

॥ सर्तेरघच् ॥ ५२ ॥

सरघा मधुमक्षिका।

॥ उचेश्चक् ॥ ५३ ॥

उच्चम्।

॥ कवेरचच् ॥ ५४ ॥

कव्यते ग्रथ्यते कवचम्।

॥ क्रमेः क च ॥ ५५ ॥

मस्य कः। क्रामति वृक्षोदरं क्रकचः ॥

CC-0. In Public Domain. Digitization by eGangotri

।। मृङ इचच् ।। ५६ ।।

म्रियते व्यथतेऽनेन मरिचम् ।

।। नमेर्डीचच् ।। ५७ ।।

नीचः ।

।। लिषिलष्योरुचक् कश्च ।। ५८ ।।

षस्य कः । लिकुचो लकुचश्च वृक्षः ।

।। गुडेरू[1]चक् ।। ५९ ।।

रक्षति रोगेभ्यो गुडू(ळ)ची अमृता ।

।। चिम्योर्डोचच् ।। ६० ।।

चीयते वर्धते चोचः पनसः । मीयते प्रक्षिप्यते भूमौ मोचा रम्भा ।

।। डञ्चच् च ।। ६१ ।।

चिम्योर्डञ्चच् स्यात् । चञ्चा तृणपुरुषः । मञ्चः ।

।। विय[illegible]क् ।। ६२ ।।

जायतेऽस्माद् वी(बी) जम् ।

।। पुवो नुग्घ्रस्वश्च ।। ६३ ।।

पुञ्जः ।

।। कुवो बुक् च वा ।। ६४ ।।

कुधातोर्जक्प्रत्ययो नुक्, बुक् च स्यात् । कुवन्ति पक्षिणोऽत्र कुञ्जः । कूयते सर्वैः परिहस्य कथ्यते कुब्जः ।

।। कुलेरिजक् ।। ६५ ।।

संस्त्यायति व्रीह्याद्यत्र कुलिजं मानम् ।

।। कृञोऽञ्जच् ।। ६६ ।।

करञ्जस्तरुः । रलयोरभेदात् कल(ळ(ञ्जः ।

।। मुर्वेरजग्लोपश्च ।। ६७ ।।

1 'चच्' घ.

CC-0. In Public Domain. Digitization by eGangotri

वस्य लोप.। बध्यते चर्मणा मुरजः।

॥ कुटजोटजवलजबल्वजाः ॥ ६८ ॥

कुटजस्तरुः। वट्यते वेष्टयते पर्णैरुटजः। गच्छन्त्यनेन वलजं द्वारम्। बलेर्बुक्। बल्बजाः काशाः।

॥ झमेर्झः ॥ ६९ ॥

झमु अदने। झमत्युष्णं झञ्झा सशीकरो मेघवातः।

॥ किरतेराटग् लश्च वा ॥ ७० ॥

विक्षिपति क्रय्याणि किराटो वणिक्। किलाटो भक्ष्यभेदः।

॥ शृङ्गाटकवाटललाटविराटप्रपुन्नाटादयः ॥ ७१ ॥

शृङ्गाटश्चतुष्पथः। कपेर्वश्च। कवाटम्★। शोभते ललाटम्। प्रपुन्नाट उद्भिद्भेदः।

॥ चिरेरिटच् भश्च ७२ ॥

चिरि हिंसायाम्। द्व्यच्धात[illegible]अन्त्यत्वा[illegible]रस्य भत्वम्। चिर्भिटी लताभेदः।

॥ डिण्टन् ॥ ७३ ॥

चिरेर्डिण्टन् प्रत्ययः स्यात्। डित्त्वादन्त्येकारलोपः। हिनस्ति मृद्नाति युवानं चिरिण्टी[1] प्रौढा। 'वयसि प्रथमे' (४-१-२०) इति ङीप्। चिरण्टी तु दृश्यते।

॥ खञ्जेररीटः ॥ ७४ ॥

खञ्जरीटः पक्षी।

॥ वृणोतेरुटच् ॥ ७५ ॥

वरुटोऽन्त्यजातिः।

॥ नर्कुटमुकुटकुक्कुटादयः ॥ ७६ ॥

नृत्यति नर्कुटो वन्दी। आमुच्यते शिरसि मुकुटः किरीटः।

1 'ण्टी। वयसि' घ.

★ 'कं शिरः पाटयति इति व्युत्पादितः कपाटशब्दः पूर्वमुक्तः।' के.

CC-0. In Public Domain. Digitization by eGangotri

आदत्ते भक्ष्यं, कौति वा कुक्कुटः। आद्युक्तेः मकुटस्थपुटादि।

॥ बन्धेः कूटन् ॥ ७७ ॥

किस्वान्नलोपः। बध्नाति हृदयं बधूटी युवतिः। प्राग्वद ङीप्।

॥ दुरि द्रो दुर् च ॥ ७८ ॥

दुर्युपपदे दृणातेः कूटन्, दुरादेशश्च स्यात्। दुर्दुरूटो दुर्मुखः। दुरि दुलेः कुटनि रलयोरभेदाद् रत्वे दुर्दुरुट इति हरः।

॥ चपेरेटच् ॥ ७९ ॥

चपेटः, चपेटा वा हस्ततलम्।

॥ ग्रोणित् ॥ ८० ॥

गारेटो मुनिः।

॥ करोतेरोटच् ॥ ८१ ॥

करोटं भाज[illegible]

॥ बकोटाक्षोटककोटादयः ॥ ८२ ॥

क्रमाद् बकवृक्षनागाः। आद्युक्तेः शाकोटस्तरुः।

॥ लगि ग्रोरुडच् ॥ ८३ ॥

लगति हस्ते लगुडो यष्टिः। गिरति सर्पान् गरुडः।

॥ व्यडनीडक्रोडकहोडादयः ॥ ८४ ॥

व्ययति सुखं व्याडो दुःशीलः। नितरामयिते खगैः नीडम्। कीर्यते हाराद्यत्र क्रोडो बाहुमध्यम्। विक्षिपति भुवमिति वराहोऽपि। अन्त्य ऋपिः। इण्शावेणिभ्यो ण उक्तः। एति वनेष्वेणः। तनू-करोति शाणः। [1]वेण्णा नदी।

1 'कृष्णावेण्णा' घ.

✲ 'करोटीति कपालास्थिन प्रयुज्यते। 'स्रगपि नृकटोटीपरिकरः' इति पुष्पदन्तः।

CC-0. In Public Domain. Digitization by eGangotri

॥ हूणाभ्रूणक्षूणघृणादयश्च ॥ ८५ ॥

ह्वयति हूणो म्लेच्छः। भ्रियते भ्रूणो गर्भः। क्षूयते उद्घोष्यते क्षूणोऽपराधः। क्षरत्यार्द्रीभवत्यनया हृदयं घृणा। आद्युक्तेः मसृणघुसृणादि।

॥ अङ्गितङ्गिकङ्गिमङ्गिकृपिवृषिभ्यो णक् ॥ ८६ ॥

अङ्गन्त्यत्राङ्गणमजिरम्। तङ्गणो जनपदः। चलति हस्ते कङ्कणः। मङ्गण ऋषिः। कृप कृपायाम्। कृपाविषयः कृपणः। वृषणः।

॥ कृकणकु[1] (को) ङ्कणत्रवणोल्बणवङ्क्षणादयश्च ॥ ८७ ॥

कृकणो मुनिः। [2]कु(को)ङ्कणो जनपदः। त्रवणो देशः। वलेर्वस्योत्वं बुक् च। उल्बणमिति लकारमाह **नाथः**। उत्पूर्वाद् वणेरजिति तकारमाह माधव*। वञ्च्यते छाद्यते वङ्क्षण ऊरुमूलसन्धिः। आद्युक्तेः ज्योतिरिङ्गणः [illegible] पुङ्खणा ह[illegible]ङ्गः।

॥ कृपिविषिभ्यामाणक् ॥ ८८ ॥

कल्पते शक्नोति हन्तुं कृपाणः। विषाणम्।

॥ पर्याणकल्याणादयश्च ॥ ८९ ॥

पर्येति पृष्ठं पर्याणोऽश्वादिकुथः। कलयति सुखं कल्याणम्। आद्युक्तेः द्रेक्काणादि।

॥ गादाभ्यामेष्णक् ॥ ९० ॥

रात्रिगेष्णो रङ्गोपजीवी। सुगेष्णा किन्नरी। चारुदेष्णाः सात्यभामेयः। सुदेष्णा विराटपत्नी।

॥ हृञ ईतञ् ॥ ९१ ॥

हारीतः पक्षी। 'शकेरुन्तः' इत्यधिकृत्य-

1 'कुङ्कणा', 2 'कुङ्कणो' घ.

* 'जश्त्वेन दकारः। उद्वणम्' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ कषेर्डित् ॥ ९२ ॥

कषति हिनस्ति कुन्तः।

॥ कुलिमयिभ्यामूतक् ॥ ९३ ॥

कुलूतो जनपदः। मयूता वसतिः।

॥ कम्येरोती नलोपश्च ॥ ९४ ॥

वनेषु चर(ळ)ति कपोतः।

॥ आङि स्फरेर्डित् ॥ ९५ ॥

आस्फोता ओषधिः।

॥ ककिमकिभ्यामन्दन् ॥ ९६ ॥

ककन्दो मकन्दश्च राजा★।

॥ मुचेर्डुं कुन्दकुकुन्दौ ॥ ९७ ॥

मुञ्चति संसारान्मुकुन्दः। मुचुकुन्दो नृपः।

॥ य[illegible] ॥ ९८ ॥

यमुन्दः क्षत्रियः।

॥ ककेरुदन् णिच्च वा ॥ ९९ ॥

लोलति ककुदः स्कन्धपिण्डम्। काकुदं तालु।

॥ अर्तिबुदोर्बुक् च ॥ १०० ॥

अर्बुदं संख्या⊗। बुद्बुदम्।

॥ स्कन्द्यमिभ्यां धः ॥ १०१ ॥

स्कन्धः। अन्धः। सान्तौ पूर्वमुक्तौ।

॥ कुङोऽन्धच् ॥ १०२ ॥

कव(ब)न्धः।

॥ नौ स्यतेरधच् ॥ १०३ ॥

★ 'ककन्दो राजा। मकन्दश्च। इत्युचितम्। एवमन्यत्रापि' के

⊕ 'रोगश्च' के.

CC-0. In Public Domain. Digitization by eGangotri

कित्त्वादाल्लोपः। 'उपसर्गात् सुनोति–' (८-३-६५) इति स्यसेः षः। निषधः।

॥ मङ्क्तेर्नलोपश्च ॥ १०४ ॥

मगधः।

॥ इषेरुधक् ॥ १०५ ॥

इषुधो याच्ञा।

॥ खलेरीनच् ॥ १०६ ॥

सञ्चीयते सङ्कोच्य गृह्यते खलीनं प्रग्रहः।

॥ पठेर्णित् ॥ १०७ ॥

पठ्यते यादस्सु पाठीनो मत्स्यः।

॥ अडेरुपगुच्चोपधायाः ॥ १०८ ॥

उद्यच्छतेऽनेन तरितुमुडुपः प्लवः।

॥ अशेरूपच् [illegible] ॥ १०९ ॥

अश्यतेऽपूपः।

॥ निकुरिकुटिभ्यामुम्बक् ॥ ११० ॥

नितरां कुरति शब्दायते निकुरुम्बः अनृजु भवत्यनेन मनः कुटुम्बो दारादिः।

(इभप्रत्ययाधिकारे)–

॥ टिकेष्टस्तुट् च ॥ १११ ॥

कस्य टत्वम्। तुटष्टुत्वम्। टिट्टिभः पक्षी।

॥ ककेभरुच् ॥ ११२ ॥

ककुभस्तरुः।

ककेः कुक्च ॥ ११३ ॥

कुक्कुभः पक्षी।

CC-0. In Public Domain. Digitization by eGangotri

॥ दमेर्डोड्, डुट् च ॥ ११४ ॥

दमेर्दस्य डुत्वं, उभच्प्रत्ययस्तस्य डुट् च स्यात्। डुण्डुभः।

॥ क उम्भक् ॥ ११५ ॥

जलपूरणावस्थायां शब्दायते कुम्भः।

॥ कुथेरुमक् ॥ ११६ ॥

कुथ पूतीभावे। कुथुमं मृगाजिनम्।

॥ कुदकुकोर्नुम् च ॥ ११७ ॥

कुन्दुमो निचयः। आदीयते कुङ्कुमः।

॥ कषिकुलिलुलिकलिभ्य आयक् ॥ ११८ ॥

कषति पीडयति कषायो रसभेदः, वैवर्ण्यात् सुगन्धिश्च। संस्त्यायन्ति पक्षिणोऽत्र कुलायः। लुल(ड)ति लुठति पङ्के लुलायो महिषः। क्षिपत्यन्यवर्णान् [illegible]ला(ळा)यः।

॥ कौतेरय ॥ ११९ ॥

कवियं खलीनम्।

॥ कृञः कित् ॥ १२० ॥

कित्त्वादगुणे यण्। क्रियो मेषः।

[ञालीयर्यधिकृते]–

॥ वियस्तुट् च ॥ १२१ ॥

वियो ञालीयर् तस्य तुट् च। वृद्धिः। वैताली (ळी)यं वृत्तम्।

॥ वचेरथ्यक् तश्च ॥ १२२ ॥

कित्त्वादुत्वम्। चस्य तत्वम्। उतथ्य ऋषिः। तत्वं विनैव दृश्यते *।

॥ अनिकाभ्यां तरन् ॥ १२३ ॥

* 'उचथ्ये वपुषि थः स्वराष्ट्रमिति मन्त्रस्थोचथ्यशब्दस्य स्तुत्यार्थकत्वं राजविशेषार्थकत्वं च वेदभाष्य उक्तम्। ऋषिवाची तूतथ्य एव।

CC-0. In Public Domain. Digitization by eGangotri

अन्तरम् । कायति रोदिति कातरः ।

॥ इण्पूभ्यां कित् ॥ १२४ ॥

इतरः । पूतरो जलजन्तुः ।

॥ कलेरेबरः ॥ १२५ ॥

कल्यते बध्यते सिराभिः कले(ळे)बरः ।

(कलजधिकारे)–

॥ मित्रः खलच् चैच्च ॥ १२६ ॥

मित्रः खलच्प्रत्ययः, कलच् च स्यात्, 'मीनातिमिनोति—' (६–२–५०) इत्यात्वबाधनार्थमेत्वं च स्यात् । प्रक्षिप्यते जघने मेखला । मेकलो नर्मदाप्रभवोऽद्रिः ।

॥ श्रो नुम् ह्रस्वश्च ॥ १२७ ॥

शृणाति पोडयति बद्धं शृङ्खला ।

॥ कुडिकितिपणिणेलिपल्लिवल्लिमालिभ्योऽवक् ॥ १२८ ॥

कुडवो मानम् । निवसत्यत्र छलं कितवः । स्तुत्या शब्दमात्रलक्षणात् पणवः । पेलृ गतौ । हृदयङ्गमत्वात् पेलवो मृदुः । पल्लवः । वल वल्ल संवरणे, सञ्चरणे च । गोरक्षणार्थं सञ्चरति वल्लवः । माल(ळ)वाः ।

॥ कैरवभैरवकारण्डवादोनवादयः ॥ १२९ ॥

बिभेत्यस्मात् भैरवः । दीयते क्षीयत आदीनवो दोषः । आद्युक्तेः कोद्रवबडवादयः ।

॥ शृणातेरावः ॥ १३० ॥

शीर्यते शरावः ।

॥ कलेरशच् ॥ १३१ ॥

बध्यते मृदा कलशः ।

CC-0. In Public Domain. Digitization by eGangotri

॥ पलेराशच् ॥ १३२ ॥

[1]समिदर्थं प्राप्यते पलाशः ।

॥ कणिकुलिपलिबडिभ्यः किशच् ॥ १३३ ॥

ध्वनन्ति शुकादयोऽत्र कणिशं सस्यमञ्जरी । [2]कोलति निमज्जति रिपोरङ्गे कुलिशम् । पलिशं मृगव्यापादनस्थलम् । बडि(ळि)शम् ।

॥ तिनिशेतिशबालिशादयः ॥ १३४ ॥

तिनिशो वृक्षः । इतिश ऋषिः । बालिशो मूर्खः ।

॥ अङ्किमस्जिभ्यामुशच् ॥ १३५ ॥

अङ्कयति पदं करोति गजकर्णेऽङ्कुशः । मज्जति विले मज्जुशो नकुलः ।

॥ कलेर्मषक् ॥ १३६ ॥

[illegible] कल्मषम् ।

॥ कुलेश्च माषक् ॥ १३७ ॥

कुलेः कलेश्च माषक् । संस्त्यायति कुल्माषोऽर्धस्विन्नमाषादिः । बहुवर्णैः सम्बध्यते कल्माषो नानावर्णः ।

॥ जलेराषः ॥ १३८ ॥

जलाषो जलम् ।

॥ पीङो नसक् ॥ १३९ ॥

पीनसः श्लेष्मव्याधिः ।

॥ कृपियुवलिभ्य आसः ॥ १४० ॥

कर्पासः पित्तप्रकृतिः✽ । यवासो दुरालभा । वलासः श्लेष्मा ।

1 'प्राप्यते समिदर्थैः पलाशः' 2 'कुलति' घ.

✽ 'वृक्षविशेषेऽप्ययं प्रसिद्धः । के.

CC-0. In Public Domain. Digitization by eGangotri

॥ किलेः कित् ॥ २४१ ॥

किल श्वैत्ये । किलासं सिध्मम् ।

॥ कुरः पासः ॥ १४२ ॥

'हलिच' (८-२-७७) इति दीर्घः । कूर्पासः# ।

॥ पटिवीभ्यां टिसज्डिसचौ ॥ २४३ ॥

पटति गच्छति रिपून् पट्टिसमायुधम्* । वीयते खाद्यते हंसैर्बिसं मृणाळम् ।

॥ तालेरीसच् ॥ २४४ ॥

तालीसं गन्धद्रव्यम् ।

॥ त्रपेरुसच् ॥ १४५ ॥

त्रपुसी कर्कटिका । उसेति विधानसामर्थ्यान्न षः ।

॥ अलेरम्बुसः ॥ २४६ ॥

अलम्बुसो राक्षसः ।

॥ लूञो हः ॥ २४७ ॥

खण्ड्यते लोहः ।

॥ अनेरोकहः ॥ १४८ ॥

अनोकहो वृक्षः ।

॥ कटेराहः ॥ १४९ ॥

वृष्यते सिच्यते जलमस्मिन् कटाहः ।

॥ निरीण ऊहक् ॥ १५० ॥

निर्गच्छ[1]त्यनेन बहिः निर्यूहः⊗ ।

1. 'छति बहिः नि', घ.

\# 'स्तनकञ्चुकवाच्ययम्' के.

* 'पट्टसं पट्टिशमित्यपि क्वाचित्को लेखः' । के.

⊗ मत्तवारणापरपर्यायो द्वारभगः ।' के.

CC-0. In Public Domain. Digitization by eGangotri

॥ दस्त्यूहः ॥ १५१ ॥

दात्यूहः पक्षी ।

॥ वलेरर्क्षन् ॥ १५२ ॥

संवृणोति वर्णान्तरं व्याप्नोति वा वल(ळ)क्षों धवळः ।

॥ लाक्षाद्राक्षामिक्षादयः ॥ १५३ ॥

लान्त्येनां लाक्षा । द्रवति मध्वस्माद् द्राक्षा । आमिक्षा हविर्भेदः[1] । पीयूक्षा वृक्षः ।

॥ इति भोजोक्ताः ॥

नान्तं प्रापदुणादिशास्त्रमियता शब्दाननुक्तानतो
धातुप्रत्ययरूपतः प्रविभजेत् कार्यात् किदादीन् वदेत् ।
रूढाः साधव एव ते शकटापत्यादिभिर्धातुजाः
सर्वेऽपीत्युदितं ततो बहुलमित्यूचे स्वयं पाणिनिः ॥
उणादिवृत्तित्रितयं दण्डनाथकृतिं तथा ।
दृष्ट्वैतत् कृतमस्माभिर्देवनारायणाज्ञया ॥

[2]इति श्रीनारायणभट्टविरचिते
प्रक्रियासर्वस्वे
उणादिखण्डः
[3]सम्पूर्णः ।

1. 'दः । आधुकपेः पी', घ.
2. इति श्रीमत्केरलभूवलयभूषणदेवनारायणधरणिपतिकरुणाशरणेन नारायणचरणपरायणेन नारायणकविना विरचिते', घ.
3. 'समाप्तः' घ.

CC-0. In Public Domain. Digitization by eGangotri

सेनानीपुरभित्कबन्धमनुजास्यानां मिते संख्यया
कोळम्बे मृगराजमासि दिनकृत्संख्यामिते वासरे ।
स्वैरं केरलवर्मणा सुमनसामेतन्मुदे प्रक्रिया-
सर्वस्वं लिखितं समाप्तमभवत् खण्डादृते छान्दस

CC-0. In Public Domain. Digitization by eGangotri

ASARVASVAM

Narayana Bhattatiri

f Melputtur Narayana Bhattatiri
Siddhantakaumudi of Bhattoji
tical process involved in the
words in Sanskrit have been
with Bhattatiri is that he is
look with regard to gramme.
words which are not correct
s of Pani.. Usage first and
motto. The work has not
...rves due to
... edition is
... rid of this handicap.

upees Thirty

h Institute and
ts Library
f Kerala
Trivandrum.